Digitized by Arya Samaj Foundation Chennai and eGangotri

BHARTI

1960. G. K. V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

maj Foundation Che

ain. Gurukul Kangri

Digitized by Arya Samaj Foundation Chennai and eGangotri

113544

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

COMPILED

31

पालयन् धर्ममर्यादां यो जघान द्विषद्गणम् ।
धनुर्बाणकरः सोयं रामचन्द्रः प्रणम्यताम् ॥

वर्षम् १० | षष्ठोऽङ्कः | वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकांके चत्वारिंशत् नवपणाः (४० नयेपैसे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताजे गुणकारी आँवलों से तैयार

वैद्यनाथ च्यवनप्राश के सेवन से फेफड़ों के विकार, कफ, खांसी, श्वास, (दमा), शारीरिक और मानसिक दुर्बलता, रक्तहीनता, कैल्शियम की कमी, स्वर-भंग, मन्दाग्नि, अम्लपित्त, कब्जियत आदि रोगों में तत्काल और आशातीत लाभ होता है।

यह बचपन, जवानी और बुढ़ापे में सब के लिये सदा सेवनीय रसायन है।

वैद्यनाथ च्यवनप्राश
अष्टवर्गयुक्त

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना
वैद्यनाथ आयुर्वेद भवन प्राइवेट लि०
कलकत्ता • पटना • झाँसी • नागपुर • इलाहाबाद

भारतीय-औषधानां सर्वाधिकं बृह[त्]
विश्वस्तं निर्माणकेन्द्रम्
श्री वैद्यनाथ-
आयुर्वेद-भवनम्
(प्रायवेट लिमिटेड)
कलिकाता, पटना, झाँसी, नागपुरम्, इलाह[ाबाद]
सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयु[क्त]
भेषजानां सावधानतया, वैज्ञानिकरीत्या
प्रचुरपरिमाणे
निर्माणकारकम्
भारतवर्षे सर्वत्र एकमूल्ये
भेषजानीमानि लभ्यन्ते
राजस्थानस्य विक्रयकेन्द्राणि
कांसली आयुर्वेदिकस्टोर्स—जौंहरी बाजार, जयपु[र]
जोधपुर आयुर्वेदिकस्टोर्स—सर्राफा बाजार, जोध[पुर]
अजमेर आयुर्वेदिकस्टोर्स—स्टेशन रोड, अ[जमेर]

राजस्थान-मद्रास-मध्यप्रदेश सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारै स्वीकृता—

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ संख्या
१.	एष आगच्छति वसन्तः।	द्विवेदीमणिङ्कर शास्त्री "साहित्याचार्यः" जोधपुरम्	१३१
२.	रूसदेशीयो महामनीषी-आचार्यो वारान्निकोवः	अनुवादक—श्रीगणेशरामशर्मा, झालावाड़	१३३
३.	भारवेरर्थगौरवम्	श्रीसत्यव्रतः, अमृतसर	१३६
४.	सोवियतसंघे संस्कृतस्याध्ययनम्	सम्पादकः	१३७
५.	वेदस्य सर्वविद्यानिधानत्वम्	श्रीमुक्तरक्तशर्मा भारद्वाजः जयपत्तनाभिजनः	१४०
६.	मनोरमा	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	१४२
७.	जीवनस्य पृष्ठद्वयम्	सहसम्पादकः	१४४
८.	सम्पादकीयम्	सम्पादकः	१४७
९.	सन्ध्योपासनम्	श्रीहरिशास्त्री दाधीच, जयपुरम्	१४८
१०.	लघुकथा	श्रीकमलानाथशर्मा, जयपुरम्	१५०
११.	सूक्ति-सुधा	सम्पादकः	१५२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

113544
COMPILED
Digitized by Arya Samaj Foundation Chennai and eGangotri
113544

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | चैत्रमासः, सं० २०१७ (अप्रैलमासः सन् १९६०) | अङ्कः ६

एष आगच्छति वसन्तः ।

लेखकः—द्विवेदीमणिशङ्कर शास्त्री "साहित्यचार्यः" जोधपुरम्

प्राङ्गणं विश्वस्य विततम् ।
कः समैत्ययाऽयमन्तः ?
सचरैरचरैश्चिरप्रतीक्ष्य
एष आगच्छति वसन्तः ॥

परिचितोऽयं प्रहरति
द्वाराणि नः प्रतिवर्षमतिथिः ॥
स्वाङ्गुलीभिर्माङ्गलीभिः
वस्तुतोऽतिथिरेष सतिथिः ॥

एष भूमेर्नन्दनं ह्या-
नन्दनं रमणीयरूपः ।
रूपनाम्भ्यां मधुर्यः
मधुरतायाः मधुरकूपः ॥

रम्यतायाः रम्यहर्म्यं यथेन्द्राण्याः वैजयन्तः ।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

यंश्च साऽसूयं च सेर्ष्यं
ऋतुभिरखिलैः संनिरीक्ष्यः ।
उज्वलप्रतिभासमृद्धैः
कविशिरोमणिभिः समीक्ष्यः ॥

पश्य यस्य स्वागतायाऽ
भिनवपल्लवपुष्पसज्जा ।
प्रकृतिरखिला चञ्चलाऽऽस्ते
मोदमाना त्यक्तलज्जा ॥

केवलं यं नाद्रियन्ते, ते सहृदया एव सन्तः ।
प्राङ्गणं विश्वस्य विततं, एष आगच्छति वसन्तः ॥

संसृतेः शृङ्गारहारो
ह्यनुपमोऽयं कुसुमकारो
मत्ततायाः मद्यकारः
फलघटानां कुम्भकारः ॥

एष आकारोऽध्वगानाम्
मूकतावैद्यः पिकानाम् ।
मण्डपो विविधोत्सवानाम्
प्रेरणाकर उत्सुकानाम् ॥

नभोभागः इन्दुनेव कान्तिमधुना भुवि भवन्तः ।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

चम्पकैः पीताम्बरोऽयम्
भवति वनभावी प्रसूनैः ।
पवनपूरितपूतवेणु-
वादनैः वंशीधरोऽयम् ॥

एष वाद्यानां चपलता
वयसि वृद्धानां तरुणिमा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्यमाह्नो यौवनस्य
युवकयुवतीनामलघिमा ॥

स्वच्छजल-मृदुशीतलामल-सुरभिसमयानामुदन्तः।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

कीरकलकल-धीर-मधुकर–
नीरसारससारितासु ।
मधुरतममाकन्दमञ्जरि–
मसृण-मञ्जुल-निःस्वनासु ॥

"कुहू" कूजन्तीषु कोकिल–
सारिकास्वपसारिकासु ।
बालकैर्लोलालकैः
क्रीड़ापरैरनुकारितासु ॥

नीरवाः प्रागद्य निनदैः भान्ति कुञ्जास्ते हसन्तः ।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

म्लानतायाः स हि निरासः
कलाकान्तायाश्च ह्रासः ।
प्रकाशः पल्लववनाना–
मुपवनानां वरविकासः ॥

किन्नरी सुरसुन्दरीणाम्
मानुषी तरुणीमणीनाम् ।
एष आभरणानि सोतुम्
एक एवालं गिरीणाम् ॥

पुरस्कर्त्रा लेखका इव वायुनाऽत्यन्ते स्पृशन्तः ।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

शीतशोकोऽशोक एषः
त्वयि समायाते प्रसीदति ।
तस्य रमणीपद-प्रहार–
रसिकता ते किन्त्वसूयति ॥

कमल-कोमल-मालिकाः
नवमल्लिकाः सह झिल्लिकाः ।
हरिचन्दनान्यभिवन्दनानि
फलभरैः विदधति घनानि ॥

पादपाः वनिता लताभिः यथाऽनूढ़ाः मूल्यवन्तः ।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

रोम रोम स्फुरति तेऽद्य
मधु मधु स्रवसीव वन्ये ।
क्लान्तकलिका कणकणानां
अणुरणुः स्फुटतीव मन्ये ॥

नभः स्वच्छं नाऽपि चाऽभ्रम
गर्जितं वा नो पवित्रम् ।
तदपि किं मानसमयूरा
इमे नृत्यन्तीति चित्रम् ॥

झुं झुमज्झुं झुं रुवन्तोऽञ्चन्ति मधुपाः मधु पिबन्तः ।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

स्वराचार्यः कोकिलानाम्
विरहविस्मृतपञ्चमानाम् ।
नृत्यशास्ता नयनसुन्दर--
माधवीलतिकादिमानाम् ॥

दक्षिणानिलपूर्णगह्वर–
गुल्मगोमुखवाद्यलाता ।
प्रकृतिनटिनीपूर्णसंगी-
तस्य गुरुतां त्वं हि धाता ॥

त्वं तु सुषमा-वरदवीणा-मधुर-झङ्कारोऽस्यनन्तः ।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

यो जड़े नवजीवनं स–
म्पादयितुमास्तेऽनुरक्तः ।
किं स चेतनहृदयकमला–
नि प्रफुल्लयितुं न शक्तः ॥

नो प्रकृतिरुच्छ्वसितु पुरुषः
मुखसरोजानि विकसन्तु ।
नो लताः आशालतास्ता
दीनवृक्षाणां लसन्तु ॥

भावनापुञ्जाः सगुञ्जाः संतु सुखिनस्त्वां श्रयन्तः ।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूसदेशीयो महामनीषी-आचार्यो वारान्निकोवः

(मूल ले० श्रीवाराणसीदासश्चतुर्वेदमहाभागः अनुवादक—श्रीगणेशरामशर्मा, झालावाड़ (राजस्थान)

स्वर्गीय आचार्य श्री ए. ए. वारान्निकोवो यावज्जीवं हिन्दीभाषामधीयानस्तस्थौ। दशवर्षाणि यावत् कठोरघोर-परिश्रमानन्तरं स महाकवेस्तुलसीदासस्य रामायणं (रामचरितमानसं) रूसदेशीयभाषायामनूदितवान्। तस्यात्मजो, योऽधुना चतुस्त्रिंशद्वर्षवया विद्यते, यश्च स्वपूज्यस्य पितुः शिष्यत्वमपि अकरोत्, हिन्दीभाषायाः कृते बह्वधिकं कार्यमकार्षीत्। तस्य धर्मपत्नी सम्यक्रीत्या हिन्दीभाषां पठितुं भाषितुं च प्रभवति। तस्य पुत्रीमपि हिन्दीं पठन्तीमहं साक्षात् स्वयमपश्यम्। यस्मिन् कुले पुरुषत्रयात् हिन्दीभाषाया विधिवत्–अध्ययनं जायमानं भवेत्, तद्दर्शनं रूसदेशं गत्वापि चाकृत्वा ततो निवर्तनं बतैको महान्-अक्षम्योऽपराधः स्यात्, अतोमया पर्यटन-भ्रमणार्थं लैलिनग्राडस्थानमेव निश्चितम्। तत्र गत्वाहं सर्वप्रथमं कार्यमिदमकरवं यदात्मनो द्विभाषिण्या श्रीमीरा द्वारा वारान्निकोवस्य गृहं प्रतिध्वनियन्त्रेण सूचनामकारयम्। ततो ज्ञातं यत् सः स्वकीयं ग्राम्यनिवासस्थानं गतोऽस्तीति। ततः प्रतिनिवृत्ते तस्मिन् मामकीनः सन्देशस्तस्मै प्रदास्यत इति च। अनेनाहं चिन्तितोऽभवम्, यतो लैनिनग्राडस्थले द्वे दिने यावदेव मया स्थातव्यमभूत्। मम मनस्याशङ्काभूत् यत्कदाचिदहं तस्य साक्षात्कारं कर्तुं न पारयेयम्।

परन्तु मे सौभाग्यात् सः प्रतिनिवृत्त ततो लैनिन-ग्राडमागच्छत्। मय्यनुपस्थिते स मे विश्रान्तिगृहमागच्छत्, सन्देशं चेमं प्रादात् यत् सः सायं पुनरागमिष्यतीति।

अथ सन्ध्यासमये सः पुनरागच्छत्, महता प्रणयेन च माममिलत्। कियन्तं समयं यावत् वार्तालापानन्तरं सोऽब्रूत—'चलन्तु, महाभागाः! अस्मद्गृहं प्रति चलन्तु! मम गृहमितश्चतुःपञ्चफर्लाङ्गमात्रं दूरेऽवस्थित-मास्ते अप्यहं यानस्य प्रबन्धं करवाणि?'

मया किंचिदिव साभिमानमुत्तरितमः—'केवलं चतुः पञ्चफर्लाङ्गमात्रम्! श्रीमानपि बतात्यर्थं चेष्टते!! अहं तु क्रोशद्वयं वा सार्द्धक्रोशद्वयं वा सुखेन चलितुं शक्नोमि। मम पूज्यः पिता, यो हि त्रिनवतिवर्षाणि यावज्जीवन् बभूव स्वजीवने लक्षमील-मितं वा पद्भ्यामेव पर्यटितो भवेत्।" श्रीवारान्निकोव-महाशयो मन्दहासमकरोत्। आवां द्वावपि पद्भ्यामेवा-चलाव। तस्य च निवासकक्षाः 'पैरोवस्काया'–मार्गेऽव-स्थिता वर्तन्ते, तत्र चैकस्य विशालस्य भवनस्योपरि भागे स निवसति। तान् कक्षान् वीक्ष्य मे मनसि यो हि सर्वप्रथमो भावोऽभूत् सोऽयमभवत् यदेवंविधस्य साधनापरायणस्य साहित्यिकस्य पुरुषस्य कृते नेमे कक्षाः पर्याप्ताः सन्तीति।

श्रीवारान्निकोवस्य हिन्दी-पुस्तकालयो बहुपर्याप्तं विशा-लोऽस्ति। तद्दृष्ट्वा तत्र मे मनसि तं प्रति श्रद्धाभावः समुद्भूत्तदात्मनोऽदूरदर्शिताया हेतोरहं लज्जामपि चान्व-भवम्। यदि चाहं तानि सर्वाणि पुस्तकानि सावधान-मरक्षिष्यम्, यानि ममोपायनरूपाणि मया प्राप्तानि, यानि वा मम सविधे समालोचनार्थमागतानि, समरक्षिष्यं

पत्राणि नो, प्राणान् प्रमोदय
नो लताञ्चलमङ्गमञ्चय।
मुञ्च मादकमधुरिमाणं
प्रीतिपीयूषान्युदञ्चय॥

हसतु गगनं हसतु धरणी
हसतु हृदयं हृदय मस्तम्।
हसतु कृषको हसतु कलिका
त्वयि हसति हसतात्समस्तम्॥

जयतु कलिकाकोकिलावान् फुल्लवान् फलवान् वसन्तः।
प्राङ्गणं विश्वस्य विततं एष आगच्छति वसन्तः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदास्मादपि सुविशालतरः पुस्तकालयो मे समपत्स्यत । अस्तु । अहमेतच्छ्रुत्वा हर्षितोऽभवम् यत् श्रीवारान्निकोवस्य पूज्यः पिता 'विशाल–भारतस्य' तदानींग्राहकोऽभूद्यदाहं तत्सम्पादनस्य सौभाग्यमवाप्नवम्। तस्मिम् पुस्तकालये 'विशाल–भारतस्य' काश्चन प्राचीनाः सञ्चिकाश्चाप्यासन् ।

पितापुत्रयोः साहित्यिकं कार्यम्

आचार्यं श्रीवारान्निकोवं द्वितीयमहायुद्धकाले रूसदेशीयसार्वकारो लैनिनग्राडस्थलात् परिवर्त्य कजाकिस्थानस्यात्यन्तं रमणीयं स्वास्थ्य–केन्द्रं बोरोवोरानामकं प्राहिणोत्, येन सः स्वकीयं साहित्यिकं कर्मानुष्ठानमव्याहतं कर्तुं पारयेत् । यदि कोऽपि तदानीं तं कार्यसम्पादनतत्परमद्रक्ष्यत् तदा तस्यासनपुरतः काष्ठफलके पाण्डुलिपीनां घनीभूतं कूटमद्रक्ष्यत् । क्वचित् 'हिन्दी-शब्द-सागरस्य' सञ्चिका निहिता आसन्, पुनः क्वचन रामायणं तस्य च टीकाग्रन्थाः । स महानेव परिश्रमशीलोऽभूत् ! यदि तस्य जीवनस्य वर्णनं परिमितशब्दैः संक्षेपेण क्रियेत, तदा वक्तव्यमुचितं स्यात् 'श्रमस्तथा सङ्घर्षः' ।

तस्य पिता काष्ठशिल्पस्य कार्यं चकार । तस्य जन्म सन् १८६० ईषवीये वर्षे तथा स्वर्गवासः सन् १९५२ वर्षेऽभूताम् । एतत्कथने नांशतोऽपि चात्युक्तिर्भवेत् यत्तस्य जीवनस्येमानि ५०-५५ वर्षाणि निरन्तरं सङ्घर्ष एव व्यतीयुः । तस्य परिवारे नवसंख्याकाः शिशवोऽभूवन् । पितुर्धनस्यायेनैव तेषां सर्वेषां भरण-पोषणं न सम्भवति स्म । बालो वारान्निकोवो गृहे गृहकर्मसु च मातुः साहाय्यमकरोत् । अनुजानां, भगिनीनां च योगक्षेमनिरीक्षणं चकार, शाकपत्राणामुद्याने कार्यमकार्षीत्, अतोऽतिरिक्तं तेन श्रमजीवित्वमपि कर्तव्यमासीत् । सः प्रतिदिनं चतुः पञ्चप्रायाणां काकिणीनामल्पाल्पं धनमुद्धृत्योद्धृत्य पाठ्यपुस्तकान्यक्रीणात् । पाठशालास्वध्ययनं तत्कृते सम्भवं नाभूत्, ततस्तेन स्वगृह एवाधीत्याधीत्यानेकाः परीक्षाः समुत्तीर्णाः । तदानीं जारशासनस्य कालो बभूव । अधिकारिणो जना नैतदैच्छन् यद्बहुसंख्यका विद्यार्थिनो ननूच्चशिक्षामाप्नुयुरिति । चत्वारिंशत्सु केवलमेकस्यैव छात्रस्योच्चशिक्षाप्तये प्रवेशस्य नियमस्तैर्व्यधायि ! सौभाग्याद्वारान्निकोव एव सर्वोच्चो विद्यार्थी समसिद्ध्यत् । स च कीएवविश्वविद्यालयेऽध्ययनार्थं प्रेषितः । इत एव हि तस्य साहित्याध्ययनस्य यः क्रमः प्रारेभे तस्य विवरणं तत्पुत्रस्य शब्दैरेव श्रूयताम्—

"कीएवविश्वविद्यालये चतुर्वर्षाभ्यन्तरे स त्रीन् विभागानुत्ततार, पौरस्त्य–विभागः, स्लावीयो, रूसीयः शार्मण्यश्च । अस्मिन् समयेऽपि सः संस्कृतं, वेदभाषां, तथाऽवेस्ताभाषां चाधीयानो बभूव । भारत-यूरोपीय-भाषाणां तुलनामूलकं व्याकरणमधीत्य स यं ग्रन्थं लिलेख तमेकमुपाधिं प्राप्तुं प्रास्तौत् । तेन स एकं महत् स्वर्णपदकं जिगाय । ततः स विश्वविद्यालये किलाचार्य-पदस्याप्तये नियुक्तः । तदनन्तरं सः पेट्रोग्राड-(अधुना लैनिनग्राड) विद्यालयं प्रहितो यत्र स आचार्यश्चर्वत्स्कोयस्य ओल्देलबुर्गस्य च पथप्रदर्शने संस्कृत-प्राकृतयोरपि चाध्ययनं चक्रे । साकमात्मनोऽध्ययनेनाचार्यः श्री ए. पी. वारान्निकोवः स्वपितुर्भ्रातॄणां च सहायतार्थं चापि कार्यं कुर्वन्नासीत् ।

"आक्टूबरमासस्य महती समाजवादिनी क्रान्तिरस्य नवयुवकस्य विद्याव्यसनिनः पण्डितस्य मार्गमुन्मुक्तं चक्रे । स च शीघ्रमेवात्मनो ध्यानं जाग्रद्भारतं तस्य च महत्प्रतिभासम्पन्नां शांतिप्रियां जनतां प्रति पर्यचालयत् । आचार्यः श्री ए. पी. वारान्निकोवः प्राचीन-भारतस्य भाषाणां तत्संस्कृतेश्च सम्यगध्ययनं चकार । स जानीते स्म यद्भारतस्य साधिकारमध्ययने ह्याधुनिकीनां भारतीयभाषाणां तथा साहित्यानां चोपेक्षां कर्तुं न शक्यते । परन्तु यावत्क्रान्ति-अस्माकं देशेऽधुनातन-भारतस्य भाषाणां तथा तद्वाङ्मयानां चाध्ययनं न क्रियते स्म । क्रान्तेरनन्तरमपि च तादृशा लोका आसन् ये-- आधुनिक भारतस्याध्ययनस्य विरोधं चक्रुः । तैः साकं महता दार्ढ्येण सङ्घर्षं कुर्वाणः श्री ए. पी. वारान्निकोवो भारतस्य तत्त्वविज्ञानस्य (Soviat Indology)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकस्य नवविज्ञानस्य विकाशाय सुविस्तृतं पथनिर्माणं चकार। स खलु स्वतन्त्ररूपेण जीवन्तीनां भारतीय-भाषाणां—हिन्दुस्तानी (हिन्दी-उर्दू) महाराष्ट्रीत्रंगभाषा-पञ्चाम्बुभाषा-जिप्सीभाषाणां तथाऽन्यासामपि भाषाणा-मध्ययनमारेभे। सः शीघ्रमेव लैनिनग्राडस्य पौरस्त्य संस्थायां (Oriental Institute) तथा लैननग्राड विश्वविद्यालये भाषाणामासामध्यापनाय प्रमुखोऽध्यापको बभूव। न तस्य कार्यमेतासां भाषाणामध्यापनं यावत् सीमितमभूदपि तु स भारतीय-भाषाविज्ञानस्येतिवृत्तस्य, (यद्धि वैदिकसाहित्यमारभ्याधुनातनभारतीये साहित्ये पर्यवस्यत्) भारतीयभाषाणां तुलनात्मकस्य व्याकरणस्य, भारतीयकाव्यशास्त्रस्य, तथा बहूनामन्यान्यविषयाणां विशेषं पाठ्यक्रमं प्रणिन्ये, तेषामध्ययनमपि च प्रारेभे। लैनिनग्राडविश्वविद्यालये भारतीयभाषाणां पीठस्थाने सः स्वात्मनो जीवनस्यान्तिमं समयं यावदासीनो बभूव। श्रीवारान्निकोवस्य नेतृत्वे बहुसंख्यकानां भारततत्व-विज्ञानविशेषज्ञानां, भाषाविदामितिहासज्ञानामर्थशास्त्रिणां च सम्पादनमभूत्।

श्री वारान्निकोवो न केवलमात्मानमध्यापन-सम्बन्धि कार्यं यावन्मर्यादितं ररक्ष। तस्यायं विचारो बभूव यदध्यापनकार्यस्य योगोऽवश्यमेव हि सवैज्ञानिक-शोधकार्यं भवेदिति। स खलु स्वजीवने सार्द्धद्विशत-प्रायाणि शोधपत्राणि लिलेख प्रकाशं च निनाय। स आधुनिक भारतीयभाषा अधिकृत्य कानिचित् पाठ्यपुस्त-कान्यपि च लिलेख, येषु सर्वतोऽधिकं महत्वपूर्णं हिन्दुस्तानी भाषायाः पाठ्यपुस्तकं प्रतीयते। स किल भाषाविज्ञानस्य साहित्यिकसमालोचना सम्बन्धीनि च बहूनि पाठ्यपुस्तकानि प्रणिनाय। एषु पुस्तकेषु हिन्दी-गद्य-पद्य-समस्यां, साहित्यिक-उर्दू-सम्बद्धं विषयं चाधि-कृत्य लिखित एकः संक्षिप्तो निबन्धो, नवीनभारतीय-वाङ्मयविषयकःसंक्षिप्त एको निबन्धश्चेत्यादीनि वर्तन्ते। भारते रूसदेशीयसाहित्यस्य प्रसारे सक्रियां सप्राणां चाभिरुचिं दधानः श्री ए. पी. वारान्निकोवो 'रूसीय-साहित्ये भारतीयो दृष्टिकोणः', 'गोर्की तथा भारतीयं साहित्यम्', 'पुश्किनं प्रति भारतीयाः', 'साहित्यिका आलोचका' स्तथान्यान्यानि पत्राणि चापि प्राकाशयत्। स्वजीवनस्यान्तिमे वर्षे-आचार्यः श्री ए. पी. वारान्निकोवः स्वकीयां "भारतवैज्ञानिकभाषाशास्त्रीयपरम्परासम्बन्धीनि तुलनात्मकैतिहासिक्याः पद्धतेर्मूलतत्त्वानि" इतिनामिकां कृतिं रचयामा सतां च प्राकाश्यं नीतवान्। क्रमशः

अनुग्राहकैः—

त्वर्यताम्

संस्कृते अभिनवं सचित्रं वर्णनकाव्यम्

जयपुरवैभवम्

(लेखकः—भारतप्रसिद्धः कविशिरोमणिभट्टश्रीमथुरानाथशास्त्री)

राजथानस्य, जयपुरस्य च ऐतिहासिकं सचित्रं विनोदमयं काव्यगतं च वर्णनम्। हिन्दी-अनुवादः सहैव दत्तोऽस्ति।

भारतीग्रहाकाणां कृते मूल्ये ७% न्यूनता

मूल्यं ५) पृष्ठ संख्या ७००

प्राप्तिस्थानम्:-"भारती"ग्रन्थागारः, मञ्जुनिकुञ्जः, सी-स्कीम जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारवेरर्थगौरवम्

(ले० : सत्यव्रतः प्राध्यापकः डी० ए० वी० कालेज अमृतसर, पञ्जाब)

गीर्वाणवाणीसाहित्यसंसारे भारवेर्भा रवेर्भावद्विभाति। एतन्महाकविविनिर्मितकिरातार्जुनीय-नामकं महाकाव्यं बृहत्त्रय्याः शिरोरत्नभूतमिव दरीदृश्यते। प्रत्येक-कवि-कर्म-कुशल-लोको वाग्देवता-प्रसादाधिगतशक्तिसमन्वितः सन्नपारे काव्यसंसारे स्वस्ववैशिष्ट्यमहमहमिकया प्रदर्शयत्येव यथा च श्रूयतेः—

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥

यथा च वयं जानीमो यत् 'उपमायां कविमण्डलमण्डनकालिदासोऽप्रतिमः।' दण्डिनः श्रीहर्षस्य च पदानां लालित्यं वाग्विदग्धजनमनोहारभूतवलोक्यते। तथैवास्मन्महाकविः भारविस्तु अर्थस्य गौरवाय सुविदितस्तत्काव्यमर्मज्ञानाम्।

केचन कथयन्ति यत् काव्ये श्लिष्टशब्दानां योग एवार्थगौरवप्रतिपादकः परमिति समीचीनं न प्रतिभाति! यतः श्लिष्टनिबन्धना शब्दायत्ता। सापेक्षश्च नास्ति शब्दचमत्कारः अपितु शब्दलघुतायामप्यर्थस्य गुरुतैवार्थगौरवस्य सम्यक् प्रतिपादयित्री! तर्हि किं नामार्थगौरवम्? अत्र साधारण्येनोत्तीर्यते यत्राल्पशब्दैरर्थानामनल्पत्वं धार्यते तत्रार्थगौरवं प्रोच्यते। इदमेव वैशिष्ट्यं महाकविना स्वकीयकाव्ये नीतिविशारदयुधिष्ठिरमुखेनोद्धतभीमम्प्र युच्यतेः—

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥

तत्काव्यकनकपरीक्षणेऽपि भारवेरुपर्युक्तश्लोको निकषायते। तेनात्र निर्दिश्यते यत्काव्यपदप्रयोगे स्फुटताया अभावो न भाव्योऽर्थस्य च गाम्भीर्यमन्तर्निवेष्टव्यम्, पुनरुक्तिदोषोऽपि त्याज्यस्तथार्थसामर्थ्यमपि मन्दं न स्यात्। यद्यप्यर्थगौरवं पार्थक्येन संसूच्यते परमन्यान्यङ्गान्यप्यर्थगौरवस्य विषयीभूतानीति व्यक्तमेव।

भारवि-काव्यं च पूर्वोक्तचारुचतुरङ्गचमत्कृतिचाकचक्य-चर्चित-चारुचक्रमिव पदे पदे क्षणे क्षणे च चकास्ति! तस्यातीव प्रथितं पद्यमस्तिः—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥

पदक्रमोऽत्रातीव सरलः। अर्थस्य गम्भीर्यमस्माभिरवगम्यते यद्धैर्य्यधारणपूर्वकं कार्यं कार्यम, सत्वरं कृतं किमपि कार्यं कथमपि कदापि साफल्यपदं नादधाति। पाण्डवानां साफल्यमूलमन्त्रं त्विदमेव दृश्यते यत्तैरविचार्य्य न किञ्चिदप्याचरितं यदा चाचरितं तदा तैर्महद्दुःखदारिद्र्यदहनदग्धैः समयोऽतिवाहितः। संसारसंघर्षस्थल्यां पदे पदेऽस्माभिः प्रत्यक्षमनुभूयते यत्सुविचारितमेव कृत्यं फलमावहति।

यतो हि महाकविर्भारविः स्वयमपि नीतिशास्त्रस्योद्भटः पण्डित आसीदिति विदितमेव विदाम्। इदमेव प्रधानकारणं यत्किरातकाव्ये राजनीतिविषयकगहनगौरवमधोलिखितप्रकारेण विद्यतेः—

विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः॥

राजनीतेरत्र पयसामाशयेन तुलना कृता। यथा केचन तीर्थसोपानादिसाहाय्येन पिच्छिलेऽपि प्राकृतजलाशये प्रवेष्टुमर्हन्ति तथैव दुर्नयपङ्कपिच्छिलराजनीतिरपि सदुपदेशकसाहाय्येनावगाह्यते परमेतादृग् राजनीतिद्रष्टैव न सुखेन लभ्यते। प्रथितं हीदं यद्राजनीतिचणकृष्णप्रदर्शितपथमाश्रित्य पाण्डवैः स्वाधिकारः पुनः स्वायत्तीकृतः।

काव्यसंसारे भारविरालंकारिकार्थगौरवमयकाव्यनिर्माणशैल्याः पथप्रवर्त्तकः। महाकविमाघप्रशंसकाः समालोचयन्ति "माघे सन्ति त्रयो गुणाः", इदं त्ववितथं यन्माघकाव्येऽर्थगौरवादिकप्रख्यातगुणानां त्रयमेकत्रैवावाप्यते परमर्थगौरवस्य प्रौढत्वं तु भारवेःकाव्य एवावलो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोवियतसंघे संस्कृतस्याध्ययनम्

भारतमिदमार्याणां विज्ञानभूमिः। मानवसभ्यताया आदिमप्रवर्तकैरार्यैर्न केवलं भारते, अपि तु समग्रेऽपि भूमण्डले मानवकर्तव्यानां पद्धतिः परिष्कारश्च तथा प्रचारितो यथा समग्रेऽपि शिक्षितसमाजे परस्परं सद्भावना, शांतिपूर्वकं जीवनचर्या च चिरात्प्रसृता बभूव। मानवीयसभ्यताया आदिगुरुः सेयं संस्कृतभाषा। अनया हि आर्षग्रन्थानारम्य, वर्तमानकालपर्यन्तं मानवसमाजाय तादृशी शिक्षा वितीर्णा यस्यां हि आपामरं प्रसिद्धमभूत्-यत् 'रामादिवद् वर्तितव्यं, न रावणादिवत्। युधिष्ठिरार्जुनादिवद् वर्तितव्यं, न दुर्योधनादिवत्' इति। इयं संस्कृतभाषा भूमण्डले सर्वतः सभ्यताप्रचाराय, ज्ञानविज्ञानप्रवर्तनाय च ससमादरं पाठ्यते। भारतमिदं संस्कृतभाषाया उत्पत्तिक्षेत्रम्, प्रवर्द्धनभूमिश्च। अस्यां हि आदिकालादारम्य अद्यपर्यन्तं संस्कृतसरस्वत्या अध्ययनाऽध्यापने अविच्छिन्नं प्रवृत्ते। प्रतिवर्षं च संस्कृतसरस्वतीसेवका देशस्य कर्णधारान् भाषाया एतस्याः समुचितस्थानप्रदानाय प्रार्थयन्ते च भाषाया एतस्या गुणपरीक्षका अन्यान्येऽपि देशास्तामिमां भाषां निजनिजेषु शिक्षाविभागेषु ससमादरं स्वीकुर्वन्ति, प्रतिवर्षं च तस्याः प्रसारे अधिकाधिकमादरं दर्शयन्ति।

हिन्दुसभ्यतातः प्रतीपवर्तिभिः ईरान-काबुलप्रभृतिप्रदेशैरपि संस्कृतभाषाशिक्षा साग्रहं प्रचारिता, यस्याः

क्यते। माघस्तु शिशुपालवधे भारविमनुकरोति भारवेश्च काव्यकलामुल्लंघ्य स्वकीयां प्रतिष्ठापदवीं लोकहृदये स्थापयितुं यतते। परं न तत्र सफलः स पश्चात्पतित एव च निःश्वसिति। भावेरर्थगौरवमयी वीररसनिर्भरा दर्पभारभरितेयमुक्तिः कस्य न विलसति सचेतसश्चेतसि।

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः।
लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः॥

महतां चरितस्यैवेदं गौरवं यत्ते परप्रदत्तैश्वर्योपभोगे सुखं न मन्यन्तेऽपि तु स्वयं हतहस्तिभोग-भोक्ता सिंह इव स्वकरैरर्जितैश्वर्य एव प्रसादमधिगच्छन्ति।

यद्यपि कालिदासप्रभृतयः कतिपयकविकुञ्जराः काव्यस्यान्यगुणेषु भारविकाव्यतः कतिपयपदेषु वृद्धिं गताः परं काव्येऽर्थगौरवस्थापनाय तु भारविरेव सिंहायते! भारवेरिदं वैशिष्ट्यं प्रख्यापयन् प्रख्यातव्याख्याकारमल्लिनाथस्येदं वचोऽतीवोचितम्—

नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिकाः यथेप्सितम्॥

किरातकाव्येऽर्थगौरवस्य किं फलमिति भारवेरेव कथनेनवधीयताम्। तेनातीवोपयुक्तमुक्तम्—

परिणामसुखे गरीयसि व्यथकेऽस्मिन् वचसि क्षतौजसाम्।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः।

इदं पद्यं भारवेरर्थगौरवस्य प्रतिनिधिभूतमिव भाति। यथा स्वल्पमपि सदौषधं बहुगुणकरं परिणामसुखकरं रोगिणां कृते भवति तथैव भारवेः काव्यमपि महदभिप्रायान्वितमर्थगौरवाधायकं सन् नीरसहृदयेष्वपि रससुधाधाराप्रचारकम्।

यदि चाग्रहग्रहग्रस्ताः केचन समालोचकपुङ्गवाः भारवेरर्थगौरवं न विगणयन्ति तर्हि तेषां कृतेऽतीव शान्तिपूर्वकं सार्थगौरवं वचो महाकविनोच्यते—

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती!
ननु वक्तृविशेषनिस्स्पृहाः गुणगृह्याः वचने विपश्चितः॥

भारविर्भवभूतिरिव समालोचकान् प्रति निरपेक्षो नास्ति! यत्र भवभूतिः कथयति 'जानन्ति ते किमपि तान् प्रति नैष यत्नः' तत्र भारवेः 'ननु वक्तृविशेषनिःस्पृहाः गुणगृह्याः विपश्चितः' इति कथनमतीव गौरववत्तां महाकवेः प्रख्यापयति।

अत एवावितथमेवाभाणि सुकविकृष्णेनः—

प्रदेशवृत्त्यापि महान्तमर्थं प्रदर्शयन्ती रसमादधाना।
सा भारवेः सत्पथदीपिकेव रम्या कृतिः कैरिव नोपजीव्या॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृते राजस्थानादिभारतीयप्रदेशेभ्योऽपि सुप्रतिष्ठिताः, सुयोग्याश्चाध्यापकास्तेषु तेषु प्रान्तेषु प्रहीयन्ते। जर्मन-देशश्चिरात् प्रसिद्धो वेदोपनिषदादिग्रन्थरत्नानां समुचित-समादरकरणे। तत्र हि बहवः संस्कृतभाषानिष्णाता अद्यावधि संजाताः, यैर्हि भारतेऽपि स्वकृतित्वं प्रसेधितम्। एषु दिनेषु 'सोवियतसंघोऽपि' संस्कृते सुमहतीं स्वरुचिं प्रकाशयति। एतत्प्रदेशे मास्को, लैनिन-ग्राड, तिबिलिसी राजकीयविश्वविद्यालयेषु संस्कृतभाषा-ध्ययनस्य सुप्रशस्या व्यवस्था सर्वतो विलोक्यते। 'सोवियत विज्ञान एकादमी' अपि संस्कृताध्यापने भूयां-समुत्साहं वहते। अत्र हि सोयं विशेषो विलोक्यते यत् सोवियतसंघे संस्कृताध्यापनपरिपाटी आर्याणां प्राचीन-परम्परामाश्रित्यैव संप्रवृत्ता प्राप्येत। लेनिनग्राड विश्व-विद्यालये सेयं परम्परा आई० मीनायेव, तदनुगामि ई० ओवरमिलर, एस्० ओलुनवर्ग, श्वरवास्सिकी, एतेषां रचनाभिः संपृक्ता प्रचलति। संस्कृताध्ययनं भारतीय-विद्यानां शाखारूपेण तत्र प्रावर्तत। प्रोफेसरः श्वरवास्की बहूनि वर्षाण्यध्यापकोऽभवत् अस्य हि सुमहानाग्रहः आसीत् यत् तदिदमध्यापनं व्यवहारेऽपि संस्कृतभाषामिमां प्रवर्तयेदिति। किन्तु ए० वारान्निकोवमहोदयो वैदिक-संस्कृतोपरि विशेषाऽऽसक्तोऽभूत्।

प्राच्याध्ययनविभागे संस्कृताध्ययनस्य पाठ्यक्रमः पञ्चवर्षाणामस्ति प्रथमवर्षे पाठ्यपुस्तकमस्ति बूलरनिर्मि-तम्। यत्र छात्रा वैदिकं लौकिकं चेत्युभयविधमपि संस्कृत-मभ्यस्यन्ति। एतदग्रे कालिदासस्य मेघदूतम्, तस्य नाटकानामवतरणं च किञ्चिदधीयते। इतोऽग्रे अर्थशास्त्र-स्याध्ययनं प्रारभन्ते। प्रगतेषु वर्षेषु अकादमीशियनः सोयं वारान्निकोवमहोदयः प्राचीनं भारतीयं साहित्यम् भारतीयभाषाणां तुलनात्मकमध्ययनम्, संस्कृतव्याकरण-संस्कृतकवितयोश्च मूलम्, एवंविधान् विषयानवलम्ब्य विश्वविद्यालये भाषणकरोत्।

मास्कोराजकीयविश्वविद्यालये संस्कृताध्ययनं शिक्षणात्मकेन गवेषणात्मकेन च कार्येण संबद्धम्। 'भाषाविज्ञानविभागस्य' तुलनात्मक-ऐतिहासिकेति भाषा विज्ञानशास्त्रयोरुभयोरपि मध्ये वैदिक--लौकिक--संस्कृत-योरध्ययनं प्रावर्तत। किन्तु 'अक्टूबरक्रान्तेः' अनन्तरम् एम् पेतेर्सनेन संस्कृताध्ययने भूयसी समुन्नतिर्विहिता। १९११ तमे संवत्सरे 'भाषाविज्ञानविभागे' द्वौ संस्कृत-निबन्धौ एम्० ए० श्रेणिस्नातकैः प्रस्तुतौ एकः—"वैदिकसंस्कृते समासरचना" शीर्षकः, द्वितीयः—"ऋग्वेदे धातुगणः" इति विषयकः। मास्को--विश्व-विद्यालये अधीयानैः स्नातकैरतिमहत्त्वपूर्णानि कतिचि-त्कार्याणि संपादितानि। यथा एम्० पेतेर्सनद्वारा "प्राचीनभारतीयभाषासु योरोपीयभाषासु च सामान्य-भूतस्य रूपरचना"। एवमेव "संस्कृतभाषायां भाषणा-र्थकधातवः" इति निबन्धश्च।

१९५६ तमे खिष्टवत्सरे विश्वविद्यालयेऽस्मिन् पृथक् "प्राच्यभाषासंस्था" स्थापिताऽभवत्। अतएव एतदन-न्तरं संस्कृतशिक्षाक्रमोऽत्र अतीव विस्तारमवाप। भारतीयसाहित्याध्येतॄणां कृते, किं वा इतिहासस्य विशेषा-ध्ययनकर्तॄणां छात्राणां कृते संस्कृताध्ययनमनिवार्य-मभवत्।

संस्कृतस्य श्रेष्ठरचनानामनुवादः

'प्राच्याध्ययनसंस्था' संस्कृतसाहित्यस्य रचनाना-मनुवादे प्रकाशने च सर्वतो व्यापृता। महाभारतस्य "आदिपर्वणोऽनुवादः", तदुपरि टिप्पणीदानं च, बी. काल्यायनोवमहोदयेन संपादितं यद्धि १९५० तमे वर्षे एव प्रकाशितमभूत्, किन्तु एतस्य पूर्तिः काल्यायनोव-महाशयेन समपाद्यत। अत्रहि बौद्धसाहित्यप्रसिद्ध—'जातकमालायाः' अप्यनुवादः प्राकाश्यत। भारतीय-भाषाणां विषये यो हि लेखसग्रहो विश्वविद्यालयादस्मात् प्राकाश्यत, तस्मिन् द्वौ निबन्धौ संस्कृतविषयकावभूताम्। एतेषु वर्षेषु प्राचीनभारतीयसाहित्यस्य कतिचित् रचनाः प्रकाशिताः, याभिस्तद्देशीयानां संस्कृताध्ययने रुचिः प्रावर्धत। १९५५--५६ वर्षयोर्मध्ये 'नलदमयन्त्यो रूपा-ख्यानम्', "सावित्री-सत्यवतो" रुपाख्यानं च तद्भाषया-ऽनूदितं प्राकाश्यत। बी० सिरनोवमहाशयेन भगवद्-गीताया अनुवादो व्यधीयत, यो हि सोत्साहं तत्र प्राकाश्यत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूसरा चरण



१ अक्तूबर, १९५८ को सभी राज्यों व केन्द्र शासित क्षेत्रों के कुछ चुने हुए इलाकों में और नियंत्रित मंडियों में मेट्रिक बाटों का प्रयोग चालू किया गया था और इस प्रकार का परिवर्तन पूरा करने के लिए २ वर्ष का समय रखा गया था।

यह दो वर्ष की अवधि ३० सितम्बर, १९६० को समाप्त हो जाएगी और उसके बाद इन क्षेत्रों में मेट्रिक बाटों का प्रयोग अनिवार्य हो जाएगा।

इस प्रकार के परिवर्तन का दूसरा चरण शुरू करने और बाकी क्षेत्रों में मेट्रिक बाटों का प्रयोग शुरू करवाने के लिए योजनाएं बनाई जा रही हैं। समूचे केरल प्रदेश में मेट्रिक बाटों का प्रयोग शुरू हो चुका है और शीघ्र ही अन्य राज्यों में भी ऐसा ही होगा।

अपनाइये | **मेट्रिक प्रणाली**

सरलता व एकरूपता के लिए
भारत सरकार द्वारा प्रसारित

DA 59/541

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधानत्त्वम्

(ले०—यः कश्चिदपि मुक्तरक्तशर्मा—आङ्गिरसो भारद्वाजः--जयपत्तनाभिजनः)

निरस्तसमस्तोपाधिलक्षणस्य ब्रह्मण उपाधिदृष्ट्या प्राधान्येन वेद–विद्या–ब्रह्म–भावेषु परिणतिर्द्रष्टव्या। एकमेव ब्रह्माद्वितीयमुपाधिभेदेन वेदो भवति, विद्या भवति, ब्रह्म च। विशुद्धज्ञानमयं हि ब्रह्म। तस्यैतस्यैकस्यैव निरुपाधिकज्ञानस्य विषयावच्छेदेन ब्रह्मभावे शब्दावच्छेदेन, किंवा शब्दतन्मात्रावच्छेदेन वेदभावे, संस्कारावच्छेदेन च विद्याभावे परिणतिर्भवति। विषयावच्छिन्नं तदेव ज्ञानं ब्रह्मशब्देन, शब्दावच्छिन्नं तदेव ज्ञानं वेदशब्देन, विद्यासंस्कारावच्छिन्नं तदेव ज्ञानं विद्याशब्देन निगद्यते।

निष्कैवल्यं, निरञ्जनं, नित्याशान्तिगर्भितनित्यशान्तं, नेति नेतीति निर्धोतं, अद्वयमखण्डं, शास्त्रानधिकृतं, अवाङ्मनसगोचरं, सजातीय–विजातीय–स्वगतभेदशून्यं, सर्वोपाधिविनिर्मुक्तं, दिग्देशकालतोऽनन्तं, स्वानुभवैकगम्यं, अनुपास्यं, विश्वातीतं, अनन्तमहेश्वरक्रोडीकृतरूपं, परात्पराख्यं तदिदं विशुद्धं ज्ञानमेव ब्रह्म। तथा चोक्तमभियुक्तैः—

प्रत्यस्ताशेषभेदं यत् सत्तामात्रमगोचरम्।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥१॥इति॥

तदिदमेकमेवात्मज्ञानं विश्वोपाधिदृष्ट्या विषय–शब्द–संस्कारैः संस्कृतं सत् त्रेधा विभक्तं भवति सञ्चरक्रमे। तदेव तु प्रतिसञ्चरक्रमे विगतोपाधिकं सदेकमेवाद्वितीयं सम्पद्यते। तथा हि वाजसनेयिनः—आहुः

"त्रयं वाऽइदं नाम–रूपं–कर्म्म। तेषां नाम्नां वागिति, एतदेषामुक्थम्। अतो हि सर्वाणि नामान्युत्तिष्ठन्ति। एतदेषां साम। एतद्धि सर्वैर्नामभिः समम्। एतदेषां ब्रह्म। एतद्धि सर्वाणि नामानि बिभर्त्ति। ×××××। तदेतत् त्रयं सदेकमयमात्मा। आत्मा उ एकः सन्नेतत् त्रयम्। तदेतदमृतं सत्येन च्छन्नम्। प्राणो वा अमृतं, नामरूपे सत्यम्। ताभ्यामयं प्राणश्छन्नः॥"

—शत० १४ कां० ३ प्र०। ४ अ०। ४ ब्रा०।

अयं भावः। 'यस्य यदुक्थं सत्–ब्रह्म सत्–साम स्यात्, स तस्यात्मा' इति ह्यात्मलक्षणं पश्यन्ति वैज्ञानिकाः। उक्थमित्येतत् प्रभवस्थानम्, ब्रह्म प्रतिष्ठास्थानम्, साम च परायणं स्थानम्। रूपाणां प्रभवस्थानं मन एव तत्तद्विषयाकाराकारितं भवति। मनस एव सर्वाणि रूपाण्युत्तिष्ठन्ति। अतश्च मन एव रूपाणामुक्थम्। मनस्येव सर्वाणि रूपाणि प्रतिष्ठितानीति मन एव सर्वेषां रूपाणां ब्रह्म, प्रतिष्ठास्थानम्। मनस्येवान्ततः सर्वाणि रूपाण्यपिहितानि भवन्तीति मन एव सर्वेषां रूपाणामवसानस्थानीयं साम। तदित्थं--उक्थ, ब्रह्म, सामस्थानीयं, किंवा प्रभवप्रतिष्ठापरायणस्थानीयं मन एव सर्वेषां रूपाणामात्मेति संसिद्धम्। एवमेव कर्म्मणामुक्थब्रह्मसामस्थानीयः प्राण एव सर्वेषां कर्म्मणामात्मा। नाम्नामुक्थब्रह्मसामस्थानीया वागेव सर्वेषां नाम्नामात्मेत्यवगन्तव्यम्। "स वा एष आत्मा वाङ्मयः प्राणमयो

'पञ्चतन्त्रस्य' कतीनांचिदवतरणानामनुवादः १६३० तमे संवत्सरे पुरा समपद्यत। सम्प्रति १९५८ तमे वर्षे 'पञ्चतन्त्रीय' आभाणकानाम् ('कहावत') नवीनोऽनुवादः ए० सरकिन्महोदयेन प्राकाश्यत। 'सोवियत विज्ञान-एकादमी' सम्बन्धिन्याः 'दर्शनसंस्थायाः' एकस्मिन् विभागे 'प्राचीनभारतीयदर्शन प्रवेशिका' संप्रति चिकीर्ष्यमाणाऽस्ति, यदन्तर्गतानां वैदिकसाहित्यस्य कतीनांचिदंशानामनुवादकार्यमिदानीं पूर्यमाणमस्ति। एवं किल सोवियतप्रदेशे संस्कृतभाषा सेयं सानुरागं कृतपदा शिक्षितमहोदयानां हृदये। आर्याणां जन्मभूमौ, संस्कृतस्य चिरविहारक्षेत्रेऽस्मिन् भारतेऽपि मन्ये भवेत् संस्कृतभारत्याः स्वस्वरूपोचितः प्रसारः। विदधातु भारतेपि भगवान कृपादृष्टिं चिरन्तनीमिति किं विशेषविस्तरेण।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोमयः" इति हि बृहदारण्यकश्रुतिराह। (बृ० उप० १।५।३।)। मनस्तावत्--ज्ञानशक्तिघनं, प्राणोऽयं क्रियाशक्तिमयः, वाक् चैषार्थमयीति कृत्वा ज्ञानक्रियार्थमयः स एष आत्मा मनःप्राणवाङ्मूर्त्तिः सन् नाम-रूप-कर्म्मभिर्विश्वरूपेण विश्वं भवति, त्रित्वपरित्यागाच्च स एव विशुद्धो भवति। विशुद्धरूपेणात्मा एकः, विश्व-दृष्ट्या आत्मा उ एकः सन्नेतत् त्रयम्। विषयावच्छिन्नं ज्ञानं ब्रह्म, शब्दावच्छिन्नं ज्ञानं वेदः' संस्कारावच्छिन्नं ज्ञानं विद्या-इति हि फलितोर्थः। एकस्यैव ज्ञानब्रह्मणस्त्रीणि रूपाणि ब्रह्म--वेदः--विद्या च। अतएव 'त्रयो वेदाः'-'त्रयं ब्रह्म'-'त्रयी विद्या'-इत्थमभिन्नरूपेणोपचरन्ति स्म महर्षयः।

विषयदर्शनेन, शब्दश्रवणेन, ज्ञानीयकल्पनया चान्तःकरणावच्छिन्ने प्रज्ञाप्राणमये सर्वेन्द्रियलक्षणे वासना-भावनाविधावपूर्वौ संस्कारावुत्पद्येते। सोऽयं संस्कारपुञ्ज-एव सृष्टेरुद्बोधकः सन् तत्तद्विषयप्रवृत्तिहेतुरिति हि दार्शनिकः समयः। स्वात्मस्थितसंस्कारेभ्य एव ते ते लौकिकव्यवहारा याथातथ्येन संगच्छन्ते। यद्यात्मनि संस्काराणामात्यन्तिकोऽभावःस्यात्तदा विशुद्धोऽयमात्मा मुक्तः स्यात्, न कञ्चन परिपश्येत्। यावद्ध्यात्मनि संस्कारास्तावदेव संसारः। एवमेव प्रत्यक्षदृष्टं यदिदं पञ्चीकृतभूतमयं पाञ्चभौतिकं महाविश्वं, तदिदं ब्रह्मणः संस्कारात्मकमेव विवर्त्तमिति जीवेश्वरयोः साम्यं द्रष्टव्यम्। 'पुरुषो वै प्रजापतेर्नेदिष्ठम्' इत्याहुः।

उक्तं पूर्वं-यत् संस्कारावच्छिन्नं ब्रह्म एव विद्येति। ततश्च यत् किञ्चिदयं परिपश्यामस्तत् सर्वं ब्रह्मणो विद्यात्मकं विवर्त्तमेवेति निःसदिग्धं वक्तुं शक्यते। सैषा वेद-ब्रह्म-मयी संस्कारात्मिका विश्वरूपा महाविद्यैवोपनिषत्सु 'अपरा विद्ये' ति नाम्ना प्रसिद्धा। विशुद्धा तु निरुपाधिका पराविद्या अन्या, यया तदक्षरमधिगम्यते। गीतादर्शने अव्ययनाम्ना प्रसिद्धस्य, तैत्तिरीयोपनिषदि च कोश-ब्रह्मनाम्ना निरूपितस्य सच्चिदानन्दब्रह्मणो द्वे-एव विद्ये वेदितव्ये भवतः। अव्ययपुरुषः पुरुषः। तस्य परा प्रकृतिरक्षरः पुरुषः,अपरा प्रकृतिस्तु क्षरः पुरुषः। विश्वाधिष्ठाता क्षरः पुरुषः जीवसृष्टेरधिष्ठाता अक्षरः पुरुषः। अव्ययस्तु जन्ममृत्युचक्राणामसंस्पृष्टः सन्नजो विश्वातीतः। तथा चाह स्मृतिः—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार, इतीयं मे भिन्ना प्रकृतिरष्टधा ॥१॥
अपरेयम्.................................
.......इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ! ययेदं धार्य्यते जगत् ॥२॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥३॥
—गीता ७।४, ५, ६,

ब्रह्मेन्द्रविष्णवग्निसोमैः कृतरूपोऽयं पञ्चकलोऽक्षरः पुरुषः पराप्रकृतिर्नाम। प्राणाब्वागन्नादान्नेभ्यः कृतरूपोऽयं पञ्चकलः क्षरः पुरुषोऽपराप्रकृतिर्नाम। ताभ्यां नित्ययुक्तः, आनन्दविज्ञानमनःप्राणवाग्भिः कृतरूपः पञ्चकलोऽयमव्ययः पुरुषः पुरुषो नाम। असीमस्तु परात्परोऽर्द्धमात्रिकत्वेन सर्वमात्रिक इति, स एव त्रिपुरुषः पुरुषः 'षोडशीपुरुष' नाम्ना प्रसिद्धो वेदे। तथा हि यजुःश्रुतिः-

प्रजापते ! न त्वदेतान्यन्यो
विश्वा रूपाणि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु
वयं स्याम पतयो रयीणाम् ॥१॥
—यजुःसंहिता २३।६५।

यस्मान्न जातः परो अन्यो अस्ति
य आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया संरराणस्त्रीणि
ज्योतींषि सचते स षोडशी ॥२॥
—यजःसं० ८।३६।

परापरप्रकृत्योरधिष्ठाता स एष अव्ययपुरुषोऽक्षरक्षरभेदनिबन्धनेन पञ्चकलोऽपि परमार्थतो निष्कल एवेत्यस्याव्ययत्वं साधूपपद्यते। तथा चोक्तं गोपथब्राह्मणे—

सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥
—गोपथब्राह्मणे पू० १। १६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारीस्तम्भः--

मनोरमा

(ले० श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्)

या धर्मे परमा दक्षा स्वामिभक्तावुमोपमा ।
पुरोगमा सतीनां सा धन्या मान्या मनोरमा ।।

पतिसेवापरायणा महाविदुषी मनोरमा सोमवंशोद्भवस्य महाराजस्य कार्त्तवीर्यार्जुनस्य बभूव साध्वी धर्मपत्नी । आसीत् स कार्तवीर्यः परमधार्मिको धरापतिः, येन ससागराऽखिलाऽपीयमिलाऽजनि । यद्विषये महाकविः कालिदासोऽप्याह—

संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः ।
अनन्यसाधारणराजशब्दो बभूव योगी किल कार्त्तवीर्यः ।।
(रघु० ६।३८)

यदा स परशुरामेण सह योद्धुमभूत्सन्नद्धस्तदा तद्वृत्तमुपलभ्य धावमाना तदीया पत्नी मनोरमा मध्येसभं विराजमानं राजानं प्राप्य तद्युद्धमवरोद्धुं प्रार्थयाञ्चकार । तदा महाराजः कार्त्तवीर्यार्जुनः स राजसभायां स्ववल्लभां मनोरमामागतां तां हर्षपूर्णलोचनाभ्यां समीक्षमाणोऽवोचत्—"प्रिये ! राजधर्मपरायणो जमदग्निर्मया युद्धे निहतः । अतोऽधुना तदात्मजः परशुरामः स्वसम्बन्धिभिः सह नर्मदानदीतटं प्राप । मां च युद्धार्थमाहूतवान् । स शिवाऽनुग्रहलब्धशस्त्रास्त्रबलेन एकविंशतिवारं निःक्षत्रियां क्षितिमिमां कर्तुं प्रतिज्ञातवान् । अत एव परशुरामस्य स्मरणेन भवति मम चेतसि महान् संक्षोभः । सर्वमपि दिनं मामकं वाममङ्गमपि परिस्फुरति । अधुना त्वमेव ब्रूहि किमहं करोमीति ।"

एतच्छ्रुत्वा विलोचनयुगलेनाश्रुजलं विमुञ्चन्ती बभाषे—पतिदेव ! मम प्राणेभ्योऽपि प्रियो भवान् । अतो मम नेदं शिक्षणमपितु सविनयं निवेदनमस्ति यत्—परशुरामो न केवलं भगवतो नारायणस्यांशज एव, अपितु संसारस्य संहर्तुर्महाप्रभावशालिनः शूलिनः शिष्योऽप्यस्ति । प्रतिज्ञातं चानेनैकविंशतिवारं भुवो भारायमाणं क्षत्रियकुलं संहर्तुम् । अतस्तेन सह तव युद्धं सांप्रतमसाम्प्रतमिति ।

किं च 'लोकरावणो रावणोऽपि मया जितः' इति मनसि मैवं मंस्त, यतो हि 'धर्म एव हतो हन्ति, धर्मो रक्षति रक्षितः' इत्युक्तरीत्या पापपरायणः स रावणो निजपापेनैव पराजयं प्राप्तः । एवमधर्मपरायणस्तु जनः स्वयमेव विनश्यति । जीवन्नपि स मृततुल्य एव । सर्वत्र व्यापको भगवान् परमात्मा रात्रिन्दिवं जनानां शुभाऽशुभानि कर्माणि पश्यति—यद्यपि विमूढजना नैतद्विदन्ति । महाराज ! स्त्रीपुत्रधनादयः पदार्थाः पयःफेननिभा विनश्वराः । अतो मतिमन्तो मानवाः स्वप्नदृष्टपदार्थवत्

आनन्दः प्रथमा कला विज्ञानं द्वितीया, मनस्तृतीया, प्राणश्चतुर्थी, वाक् च पञ्चमीत्येतासु पञ्चसु कलासु मनःप्राणवाचां संघातः सत्तेति कृत्वा तिसृणां कलानां सम्भूयैका कला सत्तात्मिका । विज्ञानं चिदाख्या द्वितीया, आनन्दश्च तृतीयेति पञ्चकलात्मकोऽयमव्ययः प्रकारान्तरेण सच्चिदानन्दभेदेन त्रिकल एव निष्पद्यते । सोऽयं मनःप्रधानः पञ्चकलस्त्रिकलो वाऽव्ययपुरुषो मुमुक्षाबलप्रधानया अक्षरविद्यया 'स्वानन्दविज्ञानभागाभ्यां प्रसन्नो भूत्वा ग्रन्थिविमोकद्वारा मुक्तिसाक्षी भवति । सिसृक्षाबलप्रधानया च क्षरविद्यया तु स एव प्राणवागभागाभ्यां प्रसन्नो भूत्वा ग्रन्थिबन्धनद्वारा सृष्टिसाक्षी भवति । भूतयोनिः क्षरभावो विश्वम्, कूटस्थो भूतभावनोऽक्षरपुरुषो विश्वसेतुः । भूतेश्वरोऽव्ययश्च विश्वालम्बनं सर्वेषामात्मा । तथा चाहरागमे स एवाव्ययपुरुषोऽव्यक्तमक्षरं व्यक्तक्षरभावे परिणमय्य सर्वमिदं सृजति, यदिदं किञ्च । रात्र्यागमे तु व्यक्तक्षरभावमव्यक्ताक्षरभावे परिणमय्य सर्वमिदं संहरति, किञ्च । तथा चाह पुरुषावतारो भगवान् श्रीकृष्णः —

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ।।

—गीता ८। १८। —(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगन्मिथ्येति मत्वा विशेषतया धर्मचिन्तने तपोऽनुष्ठाने चैव कालमतिवाहयन्ति।

अपि च भवता—भगवता दत्तात्रेयेण दत्तो ज्ञानस्योपदेशोऽपि विस्मृतः—इदानीम्? स्मर्यते यदि सः, तदा ब्राह्मणवधस्य विचार एव भवन्मनसि कथमुदपद्यत? मृगयामाचरन् क्षुत्पिपासाकुलितो यदा श्रमापनोदाय मुनेर्जमदग्नेराश्रममुपयातो भवान्, तदा नानाविधैः सुमधुरैर्मिष्टान्नादिभिः पदार्थैः साधु भवन्तं सत्कृतवान् सः। परं तदर्थं किं प्रत्युपकृतं भवता, केवलमाश्रयदः स एव हतस्तपस्वी। यो देवब्राह्मणगुरुजनान् द्वेष्टि, तस्मिन् इष्टदेवोऽप्यप्रसन्नो भवति, अचिरादेव च स विपदां गणेनाऽभिभूयते।

अतो दत्तात्रेयचरणस्मरणं विधेयम्। गुरुभक्त्या जनानां गुर्व्योऽपि सर्वा विपदः क्षणादपगच्छन्ति। अतः परशुरामस्य शरणं यातु भवान्। यदा यदर्थं ब्राह्मणा देवताः प्रसीदेयुस्तदा क्षत्रियस्य कृते प्रत्यूहव्यूहोऽपि नाऽनिष्टं फलं जनयितुं शक्नुयात्। महाराज! देवानामपि ब्राह्मणाः श्रेष्ठाः। अतस्तानेव भजतु भवान्। ब्राह्मणेषु सत्सु प्रसन्नेषु देवाः स्वयं प्रसीदन्ति। एवं निवेद्य मनोरमा तन्मुखारविन्दं पश्यन्ती वारं-वारं परिदेवितुं प्रावर्तत। कञ्चित् कालं तस्या इयमेव दशाऽतिष्ठत्। पुनः पतिमुवाच—प्राणनाथ! क्षणं तावत् स्थीयताम्, अहमुपोषिताभ्यामिवाभ्यां विलोचनाभ्यां यावत् कामं भवन्तं पश्येयम्। एतत्तु विदन्त्येव भवन्तो यत् पतिव्रतायाः स्त्रियाः स्वस्य स्वामिनि सुतादपि स्नेहः समधिको भवतीति।

अथ कार्त्तवीर्यार्जुनः प्रत्युवाच—श्रुतं सम्यक् सर्वं तव वचः, परं शोकाभिभूतस्य जनस्य भाषितं सभायां न श्रद्धेयं भवति। सुन्दरि! सुखं, दुःखं, भयं, शोकः कलहो वा—एते सर्वेऽपि जनानां शुभाशुभकर्मणामनुसारेणैव जायन्ते। सर्वोऽप्ययं कालस्यैव महिमा। काल एव कदाचन नरेभ्यः प्राज्यं राज्यं प्रयच्छति, कदाचिच्च मृत्युम्। कालस्य कारणादेव संसारे जना जायन्ते। सर्वनियन्ता सर्वशक्तिमान् भगवान् कर्मणामस्माकं फलं ददाति। तदाऽऽज्ञां विना न कोऽपि कमपि प्राणिनं हन्तुं प्रभवति। यस्य परमात्मनः संकल्पमात्रेण जगदिदं जज्ञे, तस्यैवाज्ञया लोकस्याऽखिला अपि पदार्थाः सन्ति समुत्पन्नाः, तदाज्ञयैव लयं यान्ति। न मानवस्येच्छयात्र किमपि भवति। अतो भवती निवर्ततामस्मादाग्रहात्। न बुद्ध्वाऽहमात्मानं परशुरामाऽग्नौ पातयामि। एतदप्यहं सम्यग् वेद्मि यत् परशुरामस्य प्रतिज्ञा निष्फला न भविष्यति, स मां जेष्यति—इति। अतो नाहं परशुरामस्य शरणमुपयास्यामि।

एवं मनोरमया मुहुर्मुहुर्विबोध्यमानोऽपि महाराजः स यदाऽसंख्यसैनिकबलेन सह युद्धाय सन्नद्धो बभूव, तदा तस्याश्चेतसि महती चिन्ताऽजनि। अमङ्गलस्यैव चिन्हानि तस्याः दृष्टिपथमायान्ति स्म। तदा सा स्वसंबन्धिवर्गं समाहूय श्रीहरिं च हृदि ध्यात्वा मत्वा च संसारमसारं योगक्रियया पाञ्चभौतिकं कलेवरं तत्याज। एवं सा स्वस्वामिनः पूर्वमेव पतिलोकं प्राप, परमस्यामवस्थायामपि तस्या लोचने पत्यौ एव विलग्ने आस्तामिति शम्।

★

दत्तात्रेय कृष्ण साण्डू ब्रदर्स चेम्बूर प्रायव्हेट लि.

चेम्बूर – बम्बई ३८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारावाहिकं कथानकम्

★ जीवनस्य पृष्ठद्वयम् ★

पूर्वकथाः— —ले० मानसी

(आत्मकथाया लेखिका बाल्यादेव संस्कृते रुचिमग्रहीत् । सा 'इण्टर' परीक्षायां संस्कृतविषयं गृहीतवती, किन्तु अध्यापनाय बालिकाविद्यालये समुचिता व्यवस्था नाऽऽसीत्, अतोस्याः पिता यो हि स्वयं सम्पन्नः, सम्भ्रान्तः एकस्याङ्गलविद्यालयस्याऽऽध्यक्षश्चासीत्—एकम् एम. ए. (संस्कृत) परीक्षार्थिनं एतां पाठयितुं नियुयोज । राकेशनामाऽयं युवकः सुशीलः, गम्भीरः, शान्तश्चाऽऽसीत् । तत्सकाशादियं कालिदासग्रन्थानामध्ययनमकरोत्— तस्मै च मनस्येव श्रद्धां समर्पितवती । बी० ए० परीक्षा अपि अनया तस्यैव प्रेरणया, अध्यापनेन च दत्ता । किन्तु परीक्षापरिणामस्य निर्गमनात्पूर्वमेव एका घटनाऽघटत । राकेशेन वृत्तिं गवेषयता तन्नगरं परित्यक्तम् । सोयमासीदस्या उपरि महानाघातः, तथाऽप्यनयाऽध्ययनं न परित्यक्तम् । तदानीमेव एतस्या विवाहस्य चर्चा प्राचलत् । जनकेनोक्तं यदस्मिन्नेव वर्षे तस्या विवाहो भवेत् । किन्तु एतद्विषये नैतया कापि जिज्ञासा प्रकटिता । शनैः शनैर्विवाहदिवसः समीपमागतः । तथापि नेयमजानात् क एतां परिणेतुमागच्छति । वाग्दानं सम्पन्नं, यस्मिन् श्वश्रूं श्वशुरं चेयं दृष्टवती । विवाहदिने लग्नपण्डपस्था इयं चिन्तितवती यदयं नरो यः कोऽपि भवतु—राकेशं विस्मृत्यैनमेव हृदये पूजयिष्यामि । अन्तःपटेऽपसृतेऽनया दृष्टं यद्यस्तां परिणीतवान्, स राकेश एवाऽभूत् । इयं चकिताऽस्थात् । अनया ज्ञातं यत्सोऽधुना प्रशासकीयसेवायाम् (I.A.S) अधिकारी वर्त्तते । विवाहानन्तरं राकेशेन निश्चितं यत्स देहरादूननगरे पत्न्या सह सप्ताहमतिवाहयेत् । तत्रैव राकेशेन जीवनस्य सर्वेऽपि वृत्तान्तोऽस्यै कथितः । कथं तेन प्रशासनिकपरीक्षा उत्तीर्णा—कथं च तत्पित्रा एतस्याः पितुः समीपे राकेशस्य विवाहप्रस्तावः प्रेषितः इत्यादि । एतदनन्तरं तत्सुतस्य 'राजीव' स्व पदार्पणं तद् गृहेऽभूत् । तथाप्यनयाऽनुभूतं यत्संस्कृतकवितां प्रत्यनयोर्दम्पत्योः स्नेहः स्थायी, अपरिहार्योऽस्ति । राकेशोऽधिकतरं प्रवासी एवाऽस्थात् ।)

एषु दिवसेषु—विप्रयोगसमये—वसन्तावतारवेलासु—शरदुज्जृम्भणकाले—सर्वदैव "मेघदूतम्"—"उत्तर-चरितम्" "भामिनीविलासः" इत्यादयोऽमरकृतयो मम च राकेशस्य च मनः—संतर्पणसाधनान्यभूवन् । रात्रौ शयनात्प्राक् यदा राजीवोऽपरस्मिन् प्रकोष्ठे पठन्नभूत्—तदा काव्यानाममीषां नाटकानां च रसस्वादो मम कर्त्तव्योऽभूत् । राकेशोप्येतानि न व्यस्मरदिति मया हेतुनानेनानुमितं यत्तस्य प्रत्येकं पत्रे—

"नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि
यदि कोमलता तवाङ्गकानामथ का नाम कथापि
पल्लवानाम् ।"

"अद्यपि तां, (मां !) रहसि दर्पणमीक्षमाणां
संक्रान्तमत्प्रतिनिभं मयि पृष्ठलीने ।
पश्यामि वेपथुमतीं च ससंभ्रमां च
लज्जाकुलां समदनां च सविभ्रमां च ॥"

इत्यादिभिः संचारिभावैः सह मदीया प्रशंसा मदीया स्मृतिर्वा उल्लिखिताऽभूत् ।

× × × ×

शनैः शनैर्मयाऽनुमितं यदद्य मम राकेशस्य च यो व्यासङ्गोऽस्ति, प्राचीनकाव्यानि, ग्रन्थांश्च प्रति—स मन्ये दशवर्षानन्तरं नावशिष्येत । यदि राजीवस्य कनीयान अरविन्दः, अथवा कनीयसी सरोजिनी कदाचन समायाता तर्हि सर्वमिदं शशशृङ्गवद्विलीनं भविता । राकेशाय मया मदीयाऽऽशङ्का लिखिता । सोऽपि किंचन तथैव चिन्तयन्नासीत् । तेन प्रस्तुतं यद्यदि मया यत्र कुत्रापि, विद्यालये, महाविद्यालये विश्वविद्यालये वा अध्ययनस्याध्यापनस्य च क्रमः प्रारभ्यते—तदा सर्वमिदं सरलं भवेत्, समयस्य पूर्णोपयोगः, मस्तिष्कस्य च पूर्णो व्यायामः स्यात् । मया निश्चितं यत्कुत्रापि महाविद्यालये प्राध्यापकपदं लभेय चेत्समग्रापि आशालता पुनर्हरिता स्यात् । विद्यार्थिजीवने अध्यापकान् अध्यापिकाश्च वीक्ष्य तान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रति काचन श्रद्धा समुदिताऽभूत्—त एव मम जीवनस्य आदर्शा अभूवन्। एम० ए० परीक्षामुत्तीर्य अहमपि प्राध्यापिका भवेयमिति मदीया चरमा महत्त्वाकांक्षाऽऽसीत्।

सर्वमिदं वर्षद्वयान्तर एव भूयादिति राकेशेन सूचितं यतस्त्रिंशद् वर्षाण्यतीत्य न कोपि राजकीये विद्यालये प्राध्यापकपदं लब्धुं शक्नुते। मया सर्वत्र राजकीयशिक्षाविभागेषु लोकसेवायोगस्य विज्ञप्तीनामुत्तरे-स्वतन्त्रविद्यालयेषु विश्वविद्यालयेषु च संस्कृताध्यापकपदाय प्रार्थनापत्राणि प्रहितानि।

यदि सर्वः स्वमनोवाञ्छितं वाञ्छासमकालमेव प्राप्नुयात्तर्हि लोकस्य गतिर्विपरीता भवेत्। वर्षमेकं यावन्मया चातकव्रतिन्या प्रतीक्षिता मदीया विधिलेखा। न किमप्यागतम्। किन्त्वेकदा राकेशस्य तडित्पत्रमधिगतम्—"अभिनन्दनानि।" अकस्मादेव, अप्रासङ्गिकमिदं कीदृशमभिनन्दनमस्तीति नाहं ज्ञातुमपारयम्। तत एकमपरं तडित्पत्रम्—"अहमागच्छामि।" आगत्यैव तेन सूचितं यत्तस्य सहयोगिनाऽपरेण शिक्षाधिकारिणा यदा ज्ञातं यत्तस्य पत्नी वर्षेणैकेन प्राध्यापकपदं वाञ्छति किन्तु न सफलीभवति तदा तेन मासेनैकेनैव स्वविभागे प्राध्यापकपदं मत्कृते सुरक्षितीकृतम्। स मदीयानि योग्यतापत्राणि वाञ्छति। सोयं खलु लोकस्य क्रमः!! अद्यत्वे योग्यता पङ्गुतामापन्ना--शक्तिप्रयोगं, साहाय्यं च विना नासावग्रे प्रसरति। सर्वमिदं दर्श-दर्शं मया लोकसरणिः सम्यगनुभूता, सम्यगालोचिता।

यदीदमहमज्ञास्यम् यद् यस्मात् सर्वमिदं समीप्सितं प्राप्स्यामि-स कल्पतरुर्मत्पार्श्वे, मद्धृदये एव वर्त्तते तर्हि किमित्येतावन्ति प्रयत्नशतान्यकरिष्यम्! किन्तु नेदमहमवाञ्छम्-यदहं मदीययोग्यताबलस्यापेक्षया मत्पत्युर्योग्यताबलेन पदं प्राप्नुयाम्। किन्तु पर्यन्ते यज्ज्ञातं तदेव वस्तुगतं सत्यं, नग्नसत्यम्—भीषणसत्यमस्ति।

× × ×

अद्य राजीवस्य सत्रान्तः। मद्विद्यालयस्यापि सत्रान्तः। राकेशेन तस्मिन्नेव नगरे राजकीयविद्यालये मम नियुक्तिः कारिताऽस्ति यत्राऽऽवां तिष्ठावः, यत्र च न्यूनान्न्यूनं वर्षत्रयं यावत् स्थास्यावः। अधुना स वरिष्ठसेवा-शृंखलायामायात इति तस्य सम्मानः, आयः, परिकरः सर्वमपि समेधितम्।

मदीयं जीवनमहमद्यत्वे भृशं स्निह्यामि। प्राध्यापकस्य जीवनम्, शान्तेः, ज्ञानस्य, मननस्य च मन्दिरम्। मद्विद्यालये परीक्षाः समाप्ताः। सत्रं समाप्तिं गन्तुकाममस्ति अधुना मासद्वयमहं अग्रिमसत्रवाय किंचन पठिष्यामि। राजीवं किंचन पाठयिष्यामि। राकेशं सेविष्ये। यस्य जीवनस्य मधुरः स्वप्नो मया छात्रावस्थायां दृष्टः तदद्यावकलं मत्संमुखे सत्यायितमिति मम चक्षुषी विश्वासमेव न कुरुतः। कीदृशोऽयं स्वप्नोऽभूत्? कीदृशमिदं जीवनमभूत्? मानवस्य जीवनं साफल्यस्य वैफल्यस्य च गाथामात्रम्। गाथा एताः लोकः परस्तात्पठति—इतिहासः पठति, तदनन्तरमेता अनन्ते शून्ये विलीयन्ते। अद्याहं जीवनस्य गाथानां तृतीयं पृष्ठं परिवर्त्तयितुकामाऽस्मि। जीवनस्य द्वे पृष्ठे निर्गते। यत्र नीलवर्णाः, पीतवर्णाः, कलुषाः समुज्ज्वलाः-विविधा रेखाः विविधानि चित्राणि निर्मितवत्यः। यदाहं तानि चित्राणि पश्यामि-हृदयं सहसैव अननुभूतपूर्वया—अवर्णनीयया कयाचन "द्रुत्या" द्रवति-कश्चनानुभवमधुरो भावोद्रेकः प्रतीयते।

(समाप्तम्)

●●

संशोधनम्

श्रीवेणीशङ्करशर्ममहाभागस्य पूज्याः पितरः श्रीमन्तः पण्डितबालीरामशर्माणः संप्रति सानन्दं विराजन्ते परं भारत्या गते चतुर्थेऽङ्के विहार-दैनिकपत्रानुसारेण किमपि विरुद्धं प्रकाशितमभूत्। एतदर्थं भारती-परिवारः—एतेषामायुषो वृद्धिं भूयो भूयो भगवन्तं भवं प्रार्थयते इति—प्रबन्धसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फोन—२६११६३ मिल्स—६२५४३ ग्रामस्—'हिन्द' ग्राम

हिन्द मिल्स लिमिटेड

१५, दुगल रोड, बैलार्ड एस्टेट

बम्बई १

निर्मातारः—

कुन्चुकवस्त्रं (शर्टिङ्गस), शय्यावस्त्रं (शीटिंगस-लिपाई), लम्बवस्त्रं (लांगक्लॉथ ड्रिलस, मुलस, क्रेप-मुजरी वस्त्राणां धौतानां शाटिकानाम्, 'काकेट चिन्हितानां' तथा स्पेशल फाइबर सूत्राणां च।

हरिनगर सूगर मिल्स लि०

★★★ फैक्टरी ★★★

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा–रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई–२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन सुगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अष्टमकक्षापर्यन्तं निःशुल्कं शिक्षा प्रदीयेत

फर्वरीमासस्य नवमतारिकायां लोकसभायां डा० श्रीमालिमहोदयेन प्रकाश्य घोषितं यत् 'देहलीनगरनिगमेन' षड्वर्षाण्यारभ्य चतुर्दशवर्षपर्यन्तावस्थानां बालानां कृते अष्टमश्रेणिपर्यन्ता शिक्षा निःशुल्कं प्रदीयेत, इति निश्चितम् । राजधान्याः प्रशासनम् 'साम्प्रतमन्यान्यविद्यालयेषु अपि सेयं योजना प्रचाल्येत,' इति विचारयति । एतेभ्यो विद्यालयेभ्यः शिक्षाशुल्कद्वारा ऊनविंशतिलक्षमुद्राणामायो भवति । निःशुल्कशिक्षाप्रचालने सति सेयं क्षतिपूर्तिः कथं क्रियेत, एतत्संबन्धे विचारः प्रक्रान्तः । षड्वर्षतः चतुर्दशवर्षपर्यन्तावस्थानां बालानां निःशुल्कं शिक्षा स्यादिति या व्यवस्था निर्धारिता तदनुसारमेव सेयं योजना प्रारभ्यते । राजधान्यामिव अन्यान्यराज्येष्वपि योजनाया अस्याः प्रचालनविषये तानि तानि राज्यान्येव निश्चयं शक्नुयुः कर्तुम् । केन्द्रप्रशासितप्रदेशानां विषये तदिदमेव संप्रति संपन्नं यत् पूर्वं तेषु प्राथमिकी शिक्षा निःशुल्काऽऽसीत्, सांप्रतं सा अष्टमश्रेणिपर्यन्ता निरधार्यत ।

शिक्षाकर्णधाराः शनैः शनैर्देशे यदि शिक्षां सर्वतः प्रचारयितुमिच्छेयुस्तर्हि सा निःशुल्कमेव प्रयुज्येत । भवतु भगवानेतत्कृते शिक्षितानां सहायक इति किं वा विशेषतो वक्तव्येन ।

लोकसभायां मनुस्मृतेः सापमानं खण्डशः करणम्

मार्चमासस्य चतुर्थ्यां तारिकायां भारतस्य लोकसभायां वी० के० गायकवाडद्वारा श्रीमत्या मनुस्मृत्याः सनिकारं यद्विपाटनमक्रियत, तदिदं कुकृत्यमशेषाया हिन्दुजनताया धार्मिकभावनाया उपरि सुस्पष्टः प्रबलप्रहारः । स्थाने स्थाने हिन्दुजनताया एतस्य घोरतरो विरोधः प्रावर्तत । रविवासरे 'गांधीप्राङ्गणे' आर्यसमाजस्य यो वार्षिकोत्सवः समवर्तत, तस्मिन् अभूतपूर्वो विशालो जनसमुदायः समम्मिलत् । अध्यापकश्रीवेदव्रतेन सर्वजनतायाः प्रातिनिध्येन समर्थितं यत्—"लोकसभायां कस्याश्चत् उत्तरदायित्वपूर्णप्रामाणिकव्यक्तेर्द्वारा मनुस्मृतेर्विपाटनं न केवलं हिन्दुजातेरपमान एव,अपितु भारतस्य धर्मनिरपेक्ष भावनाया उपरि घोरः संप्रहारः सोयम् ।" अनेन हि सुस्पष्टं प्रतीयते यत् काश्चित्सांप्रदायिकसंस्थाः स्वीयानां क्षुद्रस्वार्थानां पूर्तये सर्वस्मिन्नपि देशे सांप्रदायिकं वैमनस्यमुत्पादयितुं वाञ्छन्ति, सामाजिकीम् एकतां छिन्न-भिन्नां च कर्तुं ते प्रगूढं प्रयतन्ते । अस्तु, डा० युद्धवीरसिंहस्याध्यक्षतायां संजाते राष्ट्ररक्षासंमेलने सोयं प्रस्तावः पारितोऽभूत्—"यस्मिन् समये राष्ट्रिय-एकतायाः परमावश्यकतास्ति तस्मिन् एकताभञ्जिका एवंविधा प्रवृत्तिः सुस्पष्टमराष्ट्रिया ।" प्रस्तावे सर्वकारः, समग्रा जनता च एवं-विधानां कुत्सितप्रयत्नानां विषये सर्वथा सतर्का भवेदिति मुहुर्मुहुः सूचितम् ।

चन्दौसीनगरेऽपि हिन्दुमहासभायाः कार्यसमितेरावश्यकमधिवेशनं श्रीअनन्तरामशर्मणः अध्यक्षतायां समभवत्, यस्मिन् संसत्सदस्यस्य गायकवाडस्य मध्येसभं मनुस्मृतेः पृष्ठविदारणस्य, सर्वतो निन्दा समघोष्यत । सर्वैरपि सदस्यैर्गायकवाडस्य कृते कठिनदण्डव्यवस्था सर्वकारात्समयाच्यत, येन हि भविष्यति यः कश्चिदपि कस्यचित्समाजस्य, धर्मस्य वा संमाने सहसैव आघातमानेतुं न समुत्सहेत । कस्यचित्समाजस्य धर्मपुस्तकानां तिरस्कारे वा दुस्साहसं न बध्नीयात् ।

एवमेव स्थानीयधर्मसभायाः पक्षादपि गायकवाडस्याऽस्य आपत्तिजनकव्यवहारस्य कृते सामूहिकः भृशं रोषः प्रकटीकृतोऽभूत् ।

चित्रं त्विदमेव यत्—या किल मनुस्मृतिः सर्वैरपि संमान्यते, यस्य किल मनोराधारेण विदेशीयैः समुद्रपारवासिभिः पाश्चात्त्यैरपि दाय-शासनादि संविधीयते स्म,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपदेशमालायां

सन्ध्योपासनम् पंचमो मणिः

पूर्वानुवृत्तम्

(ले० महोपाध्याय आशुकविः श्रीहरिशास्त्री दाधीच, जयपुरम्)

तदेतेन कर्मणा परमात्मा प्रसीदति। सन्ध्याकर्तॄणां तेजः प्रतापः बुद्धिर्बलमोजश्च वर्द्धते प्रभावश्चेदृशो वर्धते यत् सर्वे तस्य मतं वचनं च मन्यन्ते, कोऽपि विरोधं न कर्तुं प्रभवति।

अस्य तेजसि प्रभाव-विषये च एका वृद्धपरम्परागता कथा लिख्यते, श्रूयताम्—

एकस्मिन् नगरे कस्यचित् धनवतो वणिजः एको युवा पुत्र आसीत्। स च तन्नगरनिकटे एव एकस्मिन् उपवने विहर्तुम् गतवान्। तत्र हि कस्यचन ब्रह्मराक्षसस्य (प्रेतस्य) निवासः कस्मिंश्चित् वृक्षे आसीत् सः वणिक् पुत्रः तत्र विहरन् तस्य वृक्षस्य अधस्तात् लघुशंकां कर्तुं प्राप्तः। निकटस्थैः लोकैः अत्र न मूत्रितव्यम् इति निषिद्धोपि यौवनमदा विष्टत्वात् तद् वचनं अनादृत्य तत् प्रेतस्थानरूपवृक्षस्य आलवाले मूत्रितवान्। एतेन कुत्सितेन कर्मणा तद् वृक्षनिवासी स ब्रह्मराक्षसः कुपितो भूत्वा तं जग्राह, तस्मिन् प्रवेश।

तं युवानं भ्रमयाभास तेन स विक्षिप्त इव बभूव तत्सार्थिनः सर्वे मित्रादयस्ततो भीता पलायिताः। तद्गृहंगत्वा तत्पितरं प्राहुः। सोऽपि वणिक् बहुव्याकुलमनास्तत्र प्राययौ, तन्माता तत्पत्नी चापि बहुव्याकुला बभूवतुः। वृषभयानेन तं कथं कथमपि कष्टेन स्वगृहमानीतवन्तः। ग्रामस्था अपि सर्वे तं दृष्ट्वा तदुपायं शुशुचुः। चक्रुश्च नानाविधान् योगान् परं स स्वस्थो नाभवत्। एवं बहुदिनानिव्यतीतानि कश्चिद् ब्राह्मण आगत्य

सर्वसंमान्या सा किल मनुस्मृतिः आर्याणां जन्मभूमौ भारत एव सावमानं खण्ड्यते !! सापि न यत्रकुत्रचित्। अपितु भारतस्य शासनमूलभूतायां 'लोकसभायाम्', देदीप्यमाने स्वराज्ये, लोकतन्त्रशासने। किं विशेषतः सूचनेन। शासनकर्णधाराः स्वयमिदं सर्वमवधारयेयुरित्यलम्।

★

इससे परमात्मा प्रसन्न होता है। सन्ध्या करने वालों का तेज, प्रताप, बुद्धि, बल, ओज कान्ति बढती है। प्रभाव ऐसा बढता है कि सभी उसके मत को वचन को मान लेते हैं। कोई उससे विरोध नहीं कर सकता है।

तेज और प्रभाव वृद्धि की एक कथा वृद्ध परम्परा से श्रुति प्राप्त है इस प्रकार है सुनिए—

एक नगर में एक धनवान बनिये का एक जवान लड़का किसी वहीं के बाग में विहार करने गया था। वहां एक ब्रह्मराक्षका (प्रेत का) स्थान वृक्ष में था वह लड़का वहीं उसी स्थान पर पहुंच गया और वहां लघुशंका करना चाहा निकट बैठे लोगों ने कहा यहां पेशाब मत करो कुछ दूर जाकर करो पर जवानी के नशे में चूर हुए उस लड़के ने कुछ भी न सुना न माना। वहीं उस प्रेत के स्थान रूपवृक्ष के थांवले में (जो वृक्ष के नीचे पानी सींचने को गोलगडढा कर लिया जाता है उसे थांवला कहते हैं) पेशाब कर दिया। इस कुत्सित कर्म से वहां वृक्ष में रहने वाला ब्रह्मराक्षस क्रुद्ध हो उसे गृहीत कर लिया उसमें प्रविष्ट हो गया।

उस लड़के को घुमाया वह पागल सा हो गया, उसके साथी मित्रादि सभी उससे डरे और भग गये। उसके घर जाकर उसके पिता से समाचार कहे, वह बनिया भी बहुत व्याकुल होता हुआ वहां आया। उसकी माँ व पत्नी भी अत्यन्त घबराती हुई वहाँ पहुंची। बैलगाड़ी में डालकर अपने घर लाये। गांव वालों ने भी उसे देखा और अनेक उपाय सोचे, कई प्रयोग किए, पर वह अच्छा नहीं हुआ इस तरह बहुत दिन बीत गए। किसी ब्राह्मण ने आकर झाड़ना शुरू किया। ग्यारह दिन तक वह भी करके चला गया। इसी तरह और लोगों ने भी कुछ न कुछ किया। ऐसे तीन महीने बीत गये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्जनं (झाडा) समारभत एकादशदिनानि यावत् सोपि-कृत्वा जगाम, एवं अन्ये तदपरे इतरे वा कोऽपि कश्चित् किमकरोत् कश्चिच्च किमिति मासत्रयं व्यतीतम्।

यात्राप्रसंगेन कश्चित् पथिकस्तस्मिन् नगरे समागतः। स च ब्राह्मणो विद्वान् सन्ध्योपासननिरतो गायत्री जपनिष्ठश्चासीत्।

स तस्यैव वणिजो गृहात् प्रच्छन्न आयातः। स्वतः संप्राप्तं ब्राह्मणं दृष्ट्वा वणिक् तस्मैस्वागतं व्याजहार यथाशक्ति तदातिथ्यं कर्तुमारभत यावत् तदर्थं वणिक-पत्नी रसवत्यां भोजनसामग्री प्रारभत तावत् स स्नात्वा सायं सन्ध्योपासनं कर्तुमुपाविशत्।

स ब्राह्मणो यत्र वेदिकायां (चबूतरे पर) सन्ध्या-मुपास्त तत्रैव (समीपएव) स वणिकपुत्रः प्रेताविष्टः सुप्त आसीत्। ब्राह्मणो यथाविधानं सन्ध्यां कुर्वन् गायत्री-मन्त्रेण भगवते भास्करायार्घ्यं चन्दनकुसुममिश्रितेन जलेन समर्पितवान् तदर्घ्यदान पतितजलस्य विन्दवः तद्वणिक्पुत्रस्य शरीरे लग्नाः। तज्जलविन्दुसम्बन्ध-मात्रेणैव स वणिक्पुत्रः स्वयं सचेता इव स्वस्थ इव प्रबुद्धः।

तस्य विप्रस्य पादौ वन्दितुमुत्सुकोभवन् तन्निकट मागतः। तेन ब्राह्मणेन निसिद्धोदूरमेव तस्थौ। प्रोवाच भगवन् भवत्तेजो महत् अस्ति। अद्यमे प्रेतत्वं मुक्तम् शुद्धोहं जातः। पूर्वजन्मनि विप्रोऽहं दुष्कर्मा अनधीतवेदः अनाकलितशास्त्रतत्त्वः केनापि श्मशानसाधकेन साधितः। तत्सेवापि मया बहुवर्षाणि कृता। मृत्यु-मापन्नेन तेन इदं निर्दिष्टोऽत्र ग्रामे आरामे वृक्षमेकमाश्रितो-ऽभवम्। यदा त्वं गायत्रीमन्त्रितजलं प्राप्स्य तथा तव मोक्षोनान्यथेति।

एतावत् कालं न कश्चित् भवादृशो महात्मा गायत्री-निष्ठः सन्ध्योपासननिरतः प्राप्तः। सोयमद्य मद्भाग्योदय-वशाद् भवान् प्राप्तः। अयं च वणिकपुत्रः मम वृक्षाल-वाले मूत्रोत्सर्गापराधेन कोपावस्थितेन मया गृहीत आसीत् सोयं एतद्द्वारा ममोद्धारस्य सम्पन्नतया शीघ्रं मुच्यते।

यात्राप्रसंग से कोई पथिक उस नगर में आया। वह ब्राह्मण संध्योपासन करने वाला गायत्री का उपासक था। उसी वैश्य के घर को पूछता हुआ आया। स्वतः घर पर आये हुए ब्राह्मण को देख बनिये ने स्वागत किया और यथाशक्ति अतिथिसत्कार करने लगा। जब तक बनियानी भी उसके लिए रसोई में भोजन बनाने लगी। तब तक वह ब्राह्मण स्नान कर सायं सन्ध्योपासन करने बैठ गया।

वह ब्राह्मण जिस चबूतरे पर संध्या कर रहा था वहीं वह प्रेताविष्ट बनिए का लड़का सो रहा था। ब्राह्मण ने जब संध्या करता हुआ गायत्रीमन्त्र से भगवान सूर्य के लिए चन्दनपुष्पमिश्रित जल अर्घ दिया तब अर्घदान में गिरते हुए पानी की कुछ बिन्दुएँ बणिक् पुत्र के शरीर पर जा लगीं, उन पानी की बिन्दुओं के लगने मात्र से ही स्वयं सचेत और स्वस्थ होकर जग गया और उस ब्राह्मण के चरणों की वन्दना करने हेतु उत्कण्ठा से उसके पास आया। उस ब्राह्मण से मना किया हुआ दूर से ही खड़ा हुआ बोला—महाराज! आपका तेज बहुत बड़ा है आज मेरा प्रेतपना छुट गया। मैं शुद्ध हो गया हूं। मैं पूर्वजन्म में ब्राह्मण दुष्कर्म करने वाला, वेदादिविद्याहीन, मृतदशा में किसी मसान साधने वाले से सिद्ध कर लिया गया। उसकी सेवा भी मैंने बहुत वर्षों की और मरते समय उसने मुझे इस वृक्ष पर आश्रय देकर यह कहा जब तुझे गायत्रीमन्त्र से जल प्राप्त होगा तेरा मोक्ष होगा, अन्यथा नहीं।

इतने काल तक आप जैसा कोई भी महात्मा गायत्री निष्ठ और नियत संध्योपासना करने वाला यहां नहीं आया। आज मेरे भाग्योदय से आप मिले हो। इस बणिक् पुत्र ने मेरे वृक्ष के थांवले में पेशाब कर दिया था इस अपराध से क्रोधित होकर मैंने इसे ग्रहण किया। अब इसी के द्वारा मेरा उद्धार हुआ है, इसीलिए इसको जल्दी ही छोड़ता हूं।

—क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुकथा

(ले० कमलानाथशर्मा, जयपुरम्)

दिल्लीराजधान्यामेकस्मिन् गृहे, नीचैस्तले कुटुम्ब-सहितोऽहं न्यवसम् । एकस्मिन् प्रकोष्ठके वेत्रासने उपविश्य अहमध्ययनादिकमकरवम् । ममोपवेशनस्थानस्य साक्षादुपरि एकं पवनस्य प्रकाशस्य च कृते वातायनमासीत् । एतत् महामहतीभिर्बहुभिरिष्टिकाभिर्निरुद्धमासीत्, येन शीतं वा धूलिर्वा गृहे न प्रविशेत् ।

राजधानी दिल्ली में एक मकान में, नीचे के खनमें मैं कुटुम्ब सहित रह रहा था। एक कमरे में कुर्सी पर बैठकर मैं पढ़ा लिखा करता था। मेरे बैठने की जगह के ठीक ऊपर हवा और उजाले के लिए एक उजालदान था। यह बड़ी बड़ी बहुत सी ईंटों से बंद किया हुआ था, जिससे सरदी वा धूल कमरे में न आवै।

एकदा रात्रौ अकस्मात् प्रचण्डो वायुः प्रावहन् । वर्षाऽपि किञ्चित् अजायत । आसीद् घोरः शीतकालः । अस्मिन् समये अहं निजोपवेशनस्थाने स्थितः अध्ययने लीनः आसम् । गृहस्य द्वारकपाटानि निरुद्धान्यपि घोरवातेन प्रचण्डं शब्दायमानान्यासन् । किन्तु निजप्रकोष्ठे स्थितोऽहमात्मानं सुरक्षितम् व्यचारयम् ।

एक दिन रात को अकस्मात् बड़ी तेज हवा चलने लगी। कुछ कुछ वर्षा भी होने लगी। यह घोर सरदी का समय था। इस समय मैं अपने बैठने की जगह बैठा पढ़ने में लीन था। घर के दरवाजों के किवाड बन्द थे। तो भी भयंकर हवा से जोर जोर से खड खडा रहे थे। किन्तु मैं अपने कमरे में बैठा अपने को सुरक्षित मान रहा था।

ओरियण्ट पेपर मिल्स

निम्नलिखितानि वस्तूनि निर्मीयन्ते

बन्धनायः–

(१) एम्. जी. रिब्ड क्राफ्ट

(२) एम्. एफ्. अनरिब्ड क्राफ्ट

(३) अक्लेद्य (वाटरप्रूफ) क्राफ्ट

(४) क्रेप क्राफ्ट

लेखनाय, मुद्रणाय चः–

(१) श्वेतपत्रम्

(२) क्रीमरङ्गस्य

(३) अर्धश्वेतीकृतपत्रम्

(४) अश्वेतीकृतं पत्रम्

आवरणाय–पेटकानां, पुटकानां च निर्माणाय कार्टनबोर्ड, ग्रेबोर्ड, जुप्लेक्स, ट्रिप्लेक्स, कार्ट्रिज, टिकटबोर्ड, आवरणबोर्ड प्रभृतिवस्तूनि निर्मीयन्ते ।

ओरियण्ट पेपर मिल्स (सीमितम्)

प्रबन्धाभिकर्त्तारः–बिरलाबन्धवः [स्वतन्त्रम् सीमितम्] बजरङ्गनगर, (उडिसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतस्मिन् समये मम प्रकोष्ठकस्य द्वारकपाटं कश्चित् खटखटायते स्म। अहमालस्याक्रान्तः आसम्। द्वारोद्घाटनार्थं विचारं कुर्वन्नपि आलस्याददतिष्ठम्—व्यचारयं यत् कदाचिद् वायुवशादेव सोयंखटात्कारो भवेत्। किन्तु वारं वारं द्वाराघातेन प्रेरितोहं द्वारमुदघाटयम्—हन्त अपश्यं—यन् मम विदेशवासी एकःसुहृद् वर्षया व्याकुलस्तिष्ठति। यथैवाहम् अग्रसरो भयामि, तथैव पृष्ठे, मम वेत्रासनोपरि महाभयंकरःशब्दः समभवत्। मया दृष्टम्—ममोपवेशनस्थानोपरि प्रकाश—वातायन याः इष्टकाः स्थिता आसन् ता घोरवात्यया अकस्मात् पतिताः सन्ति। हन्त एकपलात्पूर्वं यदि सेयं घटना अभविष्यत्तर्हि मम शिरश्चूर्ण—विचूर्णमभविष्यत्। नवीनागतः सुहृदपि अवाक् तदिदमाश्चर्यमपश्यत्। दैवेनैव प्रचण्डायां वात्यायां मम रक्षार्थमेव तस्मात् स्थानादहमुत्सारितः अभूवम्। अहह! अद्यापि तामीश्वरकृपां चक्षुषोः समक्षमहं पश्यामि।

इस समय मेरे कमरे के दरवाजे के किवाड़ को किसी ने खड़खड़ाया। मैं आलस्य में भरा था। दरवाजा खोलने का विचार करता हुआ भी आलस्य के कारण बैठा रहा। मनमें सोचा कदाचित् हवा से ही यह खटका होगा। किन्तु बार बार दरवाजा खटखटाने से प्रेरित हुए मैंने दरवाजा खोला। ओहो, मैंने देखा कि मेरे विदेशवासी एक मित्र वर्षा से घबराये खड़े हैं। जैसे ही मैं आगे बढ़ता हूँ, वैसे ही मेरे पीछे, मेरी कुर्सी पर बड़ा भयंकर शब्द हुआ। देखा— मेरी बैठने की जगह के ऊपर उजालदान में जो ईंटें चुनी हुई थीं, वह इस घोर आंधी में अकस्मात् गिर गई हैं। हाय, एक क्षण से पहले यदि यह घटना होती तो मेरा सिर चूर चूर हो जाता। नये आये मित्र भी अवाक् यह आश्चर्य देखते रह गये।

दैव (ईश्वर) ने ही इस प्रचण्ड आंधी में, मेरी रक्षा के लिये ही, मुझको उस स्थान से हटाया। आहा! आज भी उस ईश्वरकृपा को मैं अपनी आँखों के सामने देखता हूँ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते ।
स्वल्पमप्यनुगन्तव्यं मार्गस्थो नाऽवसीदति ॥१

सज्जनों के मार्ग में यदि पूर्णरूप से नहीं चला जा सकता हो, तोभी थोड़ा थोड़ा भी (जितनी शक्ति हो) उस मार्ग पर चलना चाहिये । मार्ग में स्थित आदमी कभी नहीं भटक सकता ॥१

सद्भिरेव सहाऽऽसीत सद्भिः कुर्वीत संगतिम् ।
सद्भिर्विवादं मैत्रीं च नाऽसद्भिः किञ्चिदाचरेत् ॥२

सज्जनों के साथ ही बैठे, सज्जनों के साथ हीं संगति करे, सज्जनों के साथ ही विवाद और मित्रता करे । असज्जनों के साथ कुछ भी काम न करे ॥२

जानन्ति पशवो गन्धाद् वेदाज्जानन्ति पण्डिताः ।
चाराज्जानन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥३

पशु सूंघकर चीजों की पहचान करते हैं, पण्डित लोग वेदादि शास्त्र से जानते हैं । राजा लोग गुप्तचरों से जानकारी प्राप्त करते हैं । किन्तु अन्य लोग नेत्रों से मनुष्य का भाव पहचानते हैं ॥३

राजा बहादुर मोतीलाल पूना मिल्स लि०

तडित्पत्रम् :—रामोपून

कार्यालयः] २५५६६७
२५२६५८

आर. बी. चिह्नितवस्त्राणि

धौतानि, सुन्दर जैकार्डवस्त्राणि, पुष्पांकितशाटी, लम्बवस्त्रम्, मलमल्लवस्त्रम्, नवपद्धतिपुष्पाङ्कितानि वस्त्राणि, अतिविशिष्टानि

मैनेजिंग एजेन्ट्स—

मुकुन्दलाल बंसीलाल एवं पुत्रा

विक्रयाभिकर्त्तारः—

पित्ती एजेंसीज् प्राइवेट (सीमितम्)

हमाम हाउस, हमाम स्ट्रीट फोर्ट, बम्बई १

प्रकाशकः—जयबहादुरसिंह   पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)

मुद्रकः—... जयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

यत्कृपया भूवलये वैदिकधर्मः सुरक्षितः समभूत् ।
निखिलजगद्गुरुरेष श्रीशंकरदेशिको जयति ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वर्षम् १८ | वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकप्रते

सप्तमाङ्कः

Digitized by Arya Samaj Foundation Chennai and eGangotri

'गागर में सागर'



अणु-शक्ति के आविष्कार ने आज भौतिक स्तर पर भी ज्ञान-योग आश्रित रस-रसायन के सूक्ष्मीकरण सिद्धान्त को समझना आसान कर दिया है। एक विशिष्ट द्रव्य या धातु को यदि निरन्तर सूक्ष्म से सूक्ष्म (बारीक) किया जाय तो उस पदार्थ में निहित शक्ति प्रकट होने लगती है; रस-रसायनों के विलक्षण प्रभाव का यही रहस्य है। बैद्यनाथ रस-रसायन सैकड़ों हजारों अग्निपुटों, औषध-संस्कारों और स्वरसभावनाओं के द्वारा सूक्ष्मीकरण की शास्त्र-सम्मत प्रक्रिया से तैयार होते हैं।

बैद्यनाथ रस-रसायन

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

बैद्यनाथ सिद्ध मकरध्वज, बैद्यनाथ बसन्तकुसुमाकर रस, बैद्यनाथ पूर्णचन्द्र रस वृहत्, बैद्यनाथ श्वास चिन्तामणि रस वृहत्, बैद्यनाथ योगेन्द्र रस आदि आदि बैद्यनाथ रस-रसायन स्वयं स्फूर्त शक्तिपुंज होते हैं।

श्री बैद्यनाथ आयुर्वेद भवन प्राइवेट लि०
कलकत्ता · पटना · झाँसी · नागपुर · इलाहाबाद

भारतीय-औषधानां सर्वाधिकं बृ
विश्वस्तं निर्माणकेन्द्रम्

श्री बैद्यनाथ-आयुर्वेद-भवनम्
(प्रायवेट लिमिटेड)

कलिकाता, पटना, झांसी, नागपुरम्, इलाहा

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्त भेषजानां सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्ये भेषजानीमानि लभ्यन्ते

राजस्थानस्य विक्रयकेन्द्राणि

कांसली आयुर्वेदिकस्टोर्स—जौहरी बाजार, जयपु
जोधपुर आयुर्वेदिकस्टोर्स—सर्राफा बाजार, जोध
अजमेर आयुर्वेदिकस्टोर्स—स्टेशन रोड, अजमे

राजस्थान मद्रास-मध्यप्रदेश सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारै स्वीकृता—

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ संख्या
१.	अमरवाणीप्रशस्तिः	श्रीशठकोपः, संस्कृतपण्डितः, अङ्गोलु, (आन्ध्राः)	१५५
२.	वेदेषु राहुल सांकृत्यायनस्य भ्रमनिवारणम्	श्रीमल्लिनाथ चौमालः, चूरू	१५७
३.	रूसदेशीयो महामनीषी-आचार्यो वारान्निकोवः	अनुवादक—श्रीगणेशरामशर्मा, झालावाड़	१६१
४.	"चीन ! अपसर भारतात्त्वम्"	श्री "पद्म" ओझा शास्त्री, ब्यावर (राजस्थानम्)	१६३
५.	जरत्कारुः	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	१६७
६.	मधुर—मिलनम्	श्रीनहनूलाल गौतमः 'निर्मम', कोटा	१६८
७.	वेदस्य सर्वविद्यानिधानत्वम्	श्रीमुक्तरक्तशर्मा भारद्वाजः जयपत्तनाभिजनः	१७१
८.	सम्पादकीयम्	सम्पादकः	१७२
९.	सन्ध्योपासनम्	श्रीहरिशास्त्री दाधीच, जयपुरम्	१७३
१०.	परोपकारी महात्मा	श्रीकमलानाथशर्मा, जयपुरम्	१७४
११.	सूक्ति-सुधा	सम्पादकः	१७५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी।
भागीरथीव भावाढ्या भारते भातु भारती॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | वैशाखमासः, सं० २०१७ (मईमासः सन् १९६०) | अङ्कः ७

अमरवाणीप्रशस्तिः

रचयिता:-शठकोपः, संस्कृतपण्डितः, संस्कृत हाईस्कूल, अङ्गोलु, (आन्ध्राः)

मातर्गीर्वाणवाणि त्वममरनगरीप्राङ्गणे ब्रह्ममुख्यै-
र्देवैस्संलाल्यमाना, चिरमवनितले स्तूयमाना महद्भिः।
वाल्मीकिव्यासमुख्यैर्मुनिभिरनुदिनं कालिदासादिभिश्चा-
नीतालङ्कारशोभा कविभिरनुपमा सन्तु नस्ते नमांसि ॥१॥

मातः काऽस्ति त्वदन्या जगति बहुजनैर्भर्त्स्यमानाऽपि या त्वं
वात्सल्यस्यन्दुरोजा शिशुमिव जननी दृश्यमानस्तनापि।
शान्ता, लीना प्रजाः प्रीणयसि बहुविधज्ञानविज्ञानदुग्धैः
स्तोतुं त्वां कः समर्थो जगति विबुधगी! लोकशोकापनेत्रीम् ॥२॥

न खलु विबुधलोके मानवानां विहारः
न च सुररमणीभिः सौख्यभोगप्रसक्तिः।
इति किल करुणार्द्रीभूतचित्ता स्वयं त्वं
धरणिममरवाणि! प्राप्य नाकीकरोषि! ॥३॥

यदि विबुधनिवासान्नागता त्वं हि देवि!
भगवत इह तत्त्वं कोऽपि न ज्ञातवान् स्यात्!
कृतनिरयनिवासा उज्झितात्मस्वरूपाः
जननमरणकूपे मानवाः पातिताः स्युः ॥४॥

तव जननि जगत्यां प्राप्य सम्पर्कमन्याः
विधुमिव कुमुदिन्यो भान्ति भाषा नितान्तम्।
न खलु भवति शक्तस्त्वां विना कोऽपि वक्तुं
भवसि सकलभाषाजन्मभूमिर्यतस्त्वम् ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यक्षरं बहूनर्थानाश्रित्यामरभारति !
विराजसेऽनल्परत्नाद्याश्रयः सागरो यथा ॥६॥

निन्दन्तु केचिदनिशं भवतीं पुमांसो
मातस्तथाप्यपचयो न हि तेऽस्ति नूनम् ।
उल्का स्फुरत्वहनि नक्तमपीह लोके
वारांनिधिर्न खलु शोषमुपैति सद्यः ॥७॥

को वाल्मीकिः कश्च वा कालिदासः
को वा व्यासो नास्ति चेत्तेऽनुकम्पा ।
कालेऽतीतेऽप्यम्ब यत्तान् स्मरामः
दैवी वाक् ! ते सन्तनोति प्रभावम् ॥८॥

राकेटाख्यविमाननिर्मितिकलापारङ्गताः सन्तु वा
व्योम्न्युड्डीय सुधांशुमण्डलमथो वेगेन ते यान्तु वा ।
स्वर्गं वा सशरीरमेव मनुजा गच्छन्तु, गीर्वाणवाक् !
तत्राऽप्यम्ब तव प्रसादमतुलं काङ्क्षेयु रुचैस्तमाम् ॥९॥

शमयसि भवतापं ब्रह्मविद्याप्रबोधै-
र्जनयसि हृदि मोदं कालिदासादिकाव्यैः ।
गमयसि शुभमार्गे मानवान् धर्मसूत्रै-
र्जगति विबुधवाणि ! त्वत्समा काऽस्ति मान्या ! ॥१०॥

कामं सन्तु सहस्रशो भुवि गिरः कस्ताभिरर्थोऽस्ति नः
शक्ता तोषयितुं त्वमेव मनुजान् शब्दैः सुधास्यन्दिभिः ।
वर्षासु प्रवहन्तु नाम सरितः कूलङ्कषाः किं फलं
ग्रीष्मे या पथिकान् नदी खलु जलैस्तृप्तान् करोत्युत्तमा ॥११॥

रे रे मानव मारणायुधविनिर्माणे यदि श्राम्यसि
स्वात्मा किं भविता विचारय मनाक् तस्यैव विस्फोरणात् ।
नेह बोधितपञ्चशीलविषये यद्यस्ति वाञ्छा तवा-
ध्यात्मज्ञानविवर्धिनीं सुरगिरं भ्रातर्भजेस्सत्वरम् ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदेषु राहुल सांकृत्यायनस्य भ्रमनिवारणम्

(लेखकस्य मौलिको दृष्टिकोणः)

(ले० पं० श्रीमल्लिनाथ चौमालः, चूरू)

साम्प्रतं भारतवर्षे विशेषतया अस्मदीये राजस्थानीय-प्रान्ते च प्रायशः श्रूयते शिक्षितानाम् अशिक्षितानाञ्च वदनकुहरात् सनिर्वेदम् 'अवनतः किल इदानीम् अस्मदीयः संस्कृतज्ञविदुषां समाजः। विधेयश्चास्य संस्कारः, संस्कृतिर्हि अपनयति वस्तूनां मलम् ।।' संस्कृतानि वस्तूनि स्वच्छानि भास्वरमनोहराणि च भवन्ति इति विनिःसरति वाक्। मन्ये नात्र विमतं केषामपि प्रेक्षावतां विदुषाम्, यत् तत्वतः एव वयम् अधुना अवनता इति।

यतः साम्प्रतं वयं सुप्तप्राया मौनधारिणश्च संजाताः। तदस्माकं मौनित्वं दृष्ट्वैव मनश्चञ्चलाः नास्तिकाः प्रोत्साहिता जाताः। अस्माकं मौनित्वं दृष्ट्वैव ते अस्मदीय सनातनधर्मिणां निधीन् वेदपुराणादिकान् दूषयन्ति। तत्रानेकान् घृणितान् आक्षेपानपि कुर्वन्ति। जनतायाः मनसि विविधां घृणामुत्पादयन्ति। अस्मिन् विषये किंचिन्नमात्रं सफला अपि भवन्ति।

पूर्वं ये पत्रसंपादकाः सनातनधर्मावलम्बिनः आसन् तेपि तेषां नास्तिकानां संसर्गेण इदानीं नास्तिकप्रायाः संजाताः। ते सनातनधर्मिभिर्लिखितान् लेखान् स्वकीय-पत्रेषु न प्रकाशयन्ति। किन्तु नास्तिकैर्लिखितलेखान् शीघ्रातिशीघ्रं सहर्षं सोत्साहं प्रकाशयन्ति। नास्तिकाश्च राहुल-सांकृत्यायनादयः अनेके संति। परन्तु राहुलः तेषां मध्ये वर्तमानसमये मुख्योस्ति। स बौद्धधर्मावलम्बी, वेदानां निर्माणसमये भ्रममुत्पादयति। स कथयति वेदाः सार्धं-सहस्रवर्षेभ्यः प्राचीना न संति। किन्तु अर्वाचीना एव। अन्यच्च आर्या भारतवर्षे कस्माचिदन्यस्थानादेव समागताः। अस्मिन् विषये स कटिबद्धः। तेन "आजकल" नामके "जौलाई" मासीये ईशवीय सन् १९५५ तमे खिष्टाब्दीये पत्रे एको लेखो लिखितः तस्य शीर्षकं—

"सप्त-सिन्धु ऋग्वेदिक आर्यों की भूमि"। "उनके रक्तसम्बन्धी पडौसी ईरानी "स" का उच्चारण "ह" किया करते थे। इसलिए सप्तसिन्धु की भूमि में आबसे। अपने भाइयों के देश को हप्तहिन्दु कहा करते थे।"

अत्र राहुलेन आर्याणां सप्तसिन्धुप्रदेशे आगमने "स"कारस्य "हकारोच्चारणमेव हेतुर्निर्दिष्टः। परन्तु एतत् भ्रमपूर्णम्, अज्ञानपूर्णम् च। यतः "स"कारस्य "ह"कारोच्चारणं तु अवैस्तिकधर्मावलम्बिनां दक्षिण-ध्रुवस्थाने उत्पन्नानाम् अनार्याणां पारसिकानां वर्तते। यतः अवेस्तग्रंथे अहूरमज्देन देशानां तालिका लिखिता। तत्र पञ्चदशसंख्यायां लिखितम्—"जिस पन्द्रहवें अच्छे देश को मैंने उत्पन्न किया वह 'हप्तहिन्दु' था।" अत्र अहूरमज्देन "स"कारस्य "ह"कारोच्चारणं कृतम्। अतो ज्ञायते "स"कारस्य "ह"कारोच्चारणं अवैस्तिक (जेन्द) भाषायाः वर्तते, नापि च ईरानदेशीय भाषायाः। यथा उत्तरीयध्रुवस्थानोत्पन्नानां आर्याणां वेदाः प्राचीना आदिकालिकाश्च सन्ति, तथैव दक्षिणध्रुवस्थानोत्पन्नानाम् अनार्याणामपि अवैस्ताग्रन्थाः प्राचीनादिकालिकाश्च सन्ति। अर्थात् वेदाः अवैस्ता च एककालिका एव। अतः राहुलसांकृत्यायनस्य "स"-कारस्य "ह"कारोच्चारणात्मको हेतुः भ्रमभूलक एव, अज्ञानमूलकश्चापि। आवैस्तिकाश्च वैवस्वतमन्वन्तरे दक्षिणध्रुवस्थानात् केनचित्तुषारपातात्मकेन भौतिक-उपद्रवेण त्रस्ताः ईरानदेशस्य परसियाप्रान्ते आगताः। परसियाप्रान्ते च कस्मिश्चित् पूर्वस्मिन्काले हैहयवंशीयाः क्षत्रियाः निवसन्ति स्म। ते परशुरामेण निहताः तस्मात् स्थानात् निष्काशिताश्च। तेनैव कारणेन स प्रांतः परसियानाम्ना प्रसिद्धो जातः। सा भूमिश्च मगजाती-येभ्यो ब्राह्मणेभ्यो दत्ता, ये च ते ब्राह्मणा भारतवर्षे शाकद्वीपात् आगमनेन शाकद्वीपीया जाताः। अधुनापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते शाकद्वीपीया ब्राह्मणाः प्रसिद्धाः सन्ति। तत्र गत्वा ते अवैस्तिका अनार्याः परसियादेशे स्थितत्वात् पारसीकाः संजाताः।

यदा भारतवर्षे आर्यावर्ते च आर्याः पूर्णरूपेण अधिकसंख्यायां च निवसन्तिस्म, तदा ईरानदेशः अरण्यमयो जनशून्यश्च आसीत्। आरण्यानाम् आधिक्यात् आर्यावर्तदेशे स्थिता जनाः तं देशं आरण्यदेशं कथयन्तिस्म। स एव आरण्यदेशः आरण्यशब्दस्य अपभ्रंशः ईरानदेशः संजातः। स देशः पारसीकानां आदिकालिको देश एव। अर्थात् ते अनार्या दक्षिणी-ध्रुवस्थानात् ईरानदेशे आगताः। तेन ते पारसीका इति, प्रसिद्धा जाताः, नहि ते परसियादेशस्य आदि निवासिनः। तेन राहुलसांकृत्यायनस्य "स"कारस्य "ह" कारोच्चारणात्मको हेतुर्भ्रममूलक एव। अग्रे लिखितम्:—

(२) राहुल—"आर्य भारत में बाहर से आये, यदि यह न माना जाय तो आर्यों की भाषा पश्चिम की जिन भाषाओं से अपना एक परिवारिक सम्बन्ध बतलाती है, उन्हें भारत से गया मानना होगा। जिसके कारण और अनेक समस्याएँ उठ खड़ी होंगी, जिनका समाधान अति कठिन है। अधिकतर यह खयाल आर्य और हिन्दी यूरोपीयभाषाओं तत्सम्बन्धी दूसरी सामग्रियों की ओर पर्याप्त ध्यान न होने के कारण ही होता है। उसी के कारण हमारे इतिहासवेत्ता कलियुग और महाभारतकाल की धारणा करके इतिहास को हजारों वर्ष पीछे लेजाने की कोशिश करते हैं। वस्तुतः क्षुद्र एसिया में हित्तित ग्रीस में युनानियों और ईरान में ईरानी आर्यों के प्रवेश के समय पर ध्यान देने से आर्यों का भारत में प्रवेश ई० पू० १५०० से पहिले नहीं मालूम होता। और ऋग्वेद के पुरातनतम प्रसिद्ध ऋषि भारद्वाज, वशिष्ठ और विश्वामित्र उससे बहुत पीछे, कम से कम सात सौ वर्ष पीछे हुए होंगे।"

अत्र राहुलेन आर्याणां भारतप्रवेशः १५०० वर्षेभ्योपि पश्चाल्लिखितः। तेन एतदपि लिखितम्। आर्याणां भाषायाः मश्चिमकीय (पाश्चात्य) भाषाभिः साकं परिवारिकः सम्बन्धोस्तीति प्रतीयते। एतदपि भारतात् गता मन्तव्या भविष्यन्ति। येन कारणेन अनेकाः समस्या अपि आगमिष्यन्ति, यासां समाधानम् अतिकठिनं भविष्यति। अत्र राहुलेन पश्चीमीयविद्वद्चितं भाषाणां जालं गृहीत्वैव एतत् लिखितम् इति प्रतीयते। वस्तुतः आदिकालिक्यौ भाषे तु द्वे एव, एका आर्यभाषायस्या उत्पत्तिः उत्तरीध्रुवस्थानोत्पन्नानां आर्याणां वर्तते, या वैदिकी भाषा आसीत्। अन्या च दक्षिणध्रुवस्थानोत्पन्नानां अनार्याणां भाषा, या च अवैस्तिकी (जन्द) भाषा आसीत्। यां च प्राचीनाः पारसीं भाषां वदन्तिस्म। आभ्यां भाषाभ्यामेव संसारे सर्वासां भाषाणां समुत्पत्तिर्जाता। एषः विषयः राहुलेन न ज्ञातः यत् सृष्टेरादौ कः समुदायः भूपिण्डस्य कस्मिन् स्थाने समुत्पन्न इति ज्ञानं नेबिना कोपि भाषाणामुत्पत्तिं तथा जनसमुदायस्य उत्पत्तिं ये ज्ञातुं शक्तः।

राहुलस्य मते क्षुद्रएशियायां "हित्तित" ग्रीस देशे युनानीनां (यवनानां), ईरानदेशे ईरानीआर्याणां प्रवेशः परिपूर्णतया ध्यानेन दत्तेन प्रतीयते। आर्याणां भारतप्रवेशः १५०० ईश्वीपूर्वात् पुरातनो नास्तीति।

अत्र राहुलेन किमपि नूतनं न प्रतिपादितम्। पूर्वोक्तानां एतेषां "हित्तित" आदीनां तत्तद्देशे प्रवेशः केवलं प्रतीतिमात्रं प्रतीयते। तत्र प्रवेशस्तु भारतीयेषु ऐतिहासिकग्रन्थेषु अपि लिखितो वर्तते।

यथा—

"शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः।
वृषलत्वं गता लोके ब्राह्मणाऽदर्शनेन च॥"४३
पौण्ड्रकाश्चौड्रद्रविडा काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीना किराता दरदाः खशाः॥४४
मुखबाहूरुपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः॥४५

मनु० अ० १०

एतेषां श्लोकानां सारांशः। सृष्ट्यादौ ब्रह्मणाऽऽदिष्टाः प्रजापतयः महर्षयो राजर्षयश्च सृष्टिवृध्यर्थं समस्ते उत्तरीयगोलार्धरूपे द्युलोके स्थितेषु सप्तद्वीपेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पौण्ड्रक, औड्रद्रविडकम्बोज यवन, शक, पारद, पह्लव, चीन, किरात, दरद, खशाएते देशाः स्थिता आसन्। तत्र भारताद् बहिर्गताः क्षत्रियजातयः पूर्वोक्तदेशानां संज्ञात एव तेषां जातिर्जाता। अतः पौण्ड्रकदेशे जनाः पौण्ड्रका जाताः, कम्बोजदेशं गताः कम्बोजा (कम्बोडिया) जाताः, युनान (ग्रीस) देशे गता यवना जाताः। शकदेशे गताः शका जाताः, पारददेशं गता दरदा जाताः, खशदेशे गताः खशा जाताः। एता भारताद् गता आर्यजातयः तत्तद् देशेषु स्थितत्वात् तत्तद्देशनाम्ना प्रसिद्धा जाताः। एताः क्षत्रियजातयः आर्यजातयः सत्योऽपि शनकैः क्रियालोपात् दस्युनाम्ना अनार्याः घोषिताः अनार्या जाता इत्यर्थः।

अतो राहुलेन "हित्तित" आदि जातीनां तत्तद्देशेषु प्रवेशो लिखितः। स तु मनुस्मृतिलिखितजातीनां प्रवेशमात्रमेव विद्यते, राहुलेन किमधिकं लिखितम्? एतासां जातीनां तत्तद्देशप्रवेशस्तु मनुना स्पष्टमेवोक्तः, परन्तु ताः जातयः पूर्वं तु आर्यजातयः एव आसन् परन्तु तत्देशगमनादनन्तरं ता अनार्यजातय एव घोषिता जाताः ता आर्यजातयः इति वक्तुं शक्यन्ते। ता जातयः राहुलेन आर्यजातयः लिखिताः। इति न, किन्तु तास्तु अनार्यजातय एव। अनार्यजातिभिः क्षुद्रएशियायां, ग्रीसदेशे, ईरानदेशे च प्रवेशः कृतः किन्तु ता जातयः अनार्यभूता एव भारतीयैः घोषिताः।

राहुलेन प्रतिपादितम् यत् कलियुगस्य महाभारतस्य च धारणाया इतिहासम् अतिप्राचीनकालात्मकं प्रतिपादयन्ति। इतिहासंप्राचीनकाले नयन्ति च। सोयं भ्रमः, नहि च कलियुगस्य धारणामात्रमेव। किन्तु कलियुगं तु गणितविज्ञानसिद्धं वर्त्तते। यथा कलियुगे भूमेः याम्योत्तरपरिभ्रमणस्य वार्षिकी गतिः ४५ विपलात्मिका वर्त्तते। अत्रैतदुक्तं भवति, चक्रे चत्वारि पदानि भवन्ति यथा—

त्रिभिर्भैः पदं तानि चत्वारि चक्रे।

सि.शि. गणिताध्याय

अर्थात् राशित्रयस्य एकं पदं भवति, तानि पदानि चक्रवृत्ते चत्वारि भवन्ति तत्र प्रत्येकस्मिन् पदे नवति (९०) नवति अंशा भवति। ततः ८०×६०×६०×६०= १९४४०००० । १९४४००००÷४५=४३२००० एतत् एव कलियुगस्य मानम् गणितविज्ञानसिद्धम्; एतत् कलियुगस्य मानम् वर्त्तते। तदा राहुलेन लिखितं धारणात्मकं कलियुगस्य मानम् कथं सिद्ध्यति। युगानां आदौ अन्ते च एकं अन्यदपि वैचित्र्यं भवति। तस्मिन् सर्वे ग्रहा वसन्तसंपाते एकत्रैव स्थिता भवन्ति। तथा एवमपि वक्तुं शक्यते–सर्वे ग्रहा मेषराशौ स्थिता भवन्ति। युगादिमानेषु एतत् वैचित्र्यं दृष्ट्वैव प्राचीनैर्युगादिकल्पना कल्पिता। अतः कलियुगस्य कल्पना धारणामात्रं न किन्तु वैज्ञानिकी वर्त्तते। अतः राहुलेन लिखितं 'धारणा इति' सोयं भ्रमः! तथा महाभारतरचनाकालस्य मया अन्यत्र निर्णयः कृतः। स च 'भारती' मासिकपत्रे प्रकाशितः (अष्टमांके संवत् २०१५ तमे वर्षेद्रष्टव्यः)। भारद्वाज, वशिष्ठ, विश्वामित्र आदीनां सप्तशतवर्षेभ्यः अनन्तरं जातानां लेखः प्रमाणशून्यः।

राहुलः—"काफी काल बीते बिना उनके उच्चारण में भारी परिवर्तन नहीं हो सकता, जो कि ऋग्वेद में देखा जाता है। भारतीय आर्य हिन्दी-यूरोपीय वंश की पूर्वी या शतं-शाखा के अन्तर्गत आते हैं। जिसमें ही रूसी आदि-स्लाव और ईरानी भी सम्मिलित हैं। ईरानी और स्लाव मूर्धन्य वर्णों (टवर्ग आदि) का उच्चारण नहीं कर सकते। जबकि ऋग्वेद की प्रथम ऋचा में ही "अग्निमीले[३]" में ही आगया है। आर्यों के मुँह से मूर्धन्य वर्गों का उच्चारण सप्त सिन्धु के पुराने निवासियों–मोहनजोदरो, हडप्पा के लोगों के घनिष्ठ सम्पर्क के कारण ही हुआ। ईरानी आर्य अपने मूल स्थान "आर्याना वेइजा" का स्मरण रखते थे। पर भारतीय आर्य उसे भूल गये थे। यह ऋग्वेद के मौन धारण से मालूम होता है। इसमें यह भी कारण हो सकता था कि उनका प्रसार बीच के स्थानों को बिलकुल छोड़कर नहीं हुआ। इसलिए उन्हें मूल स्थान मे निर्वासित होने का ख्याल नहीं हो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सकता था। आखिर ऋग्वेद के आर्यों के सबसे पश्चिम में रहने वाले परन्तु मलान आदि जन भारत के पश्चिम द्वार खैबर और बोलन के ओर पीछे तक बसे हुए थे। उनके भी परिचय आर्यजन से होंगे। पर प्रकरण में न आ सकने के कारण ऋग्वेद के ऋषि उनका नाम स्मरण नहीं कर सके।"

राहुलेन यत् एतत् प्रतिपादितम् अधिककालव्यतिगमनं विना तेषाम् उच्चारणे एतादृशं परिवर्तनं भवितुं नार्हति यत् ऋग्वेदे दृश्यते। भारतीय-आर्याः हिन्दी-यूरोपीयवंशस्य पूर्वीयानां, शतंशाखानाम् अन्तर्गता वर्तन्ते, यस्यां रूसी, आदिस्लाव तथा ईरानीशाखापि सम्मिलितास्ति।

अत्र भारतात् यूरोपदेशे गता आर्याणां शाखा एव हिन्दी यूरोपीयशाखा वर्त्तते। एवमेव रूसदेशे ईरानदेशे च गता आर्याणां शाखा स्लाव आदि नाम्ना विद्वद्भिर्लिखिता। सा यदि मूर्धन्यवर्णानां उच्चारणे असमर्था आसीत् तस्य उदाहरणं च ऋग्वेदस्य प्रथमा ऋचा "अग्निमीळे" इति मन्येत, तर्हि ऋग्वेदस्य एव द्वितीय ऋचायां मूर्धन्यवर्णानाम उच्चारणम कथं जातम्? यथा "अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरुत" इत्यत्र कथं तस्य एव प्रथमऋचायां आगतस्य मूर्धन्यवर्णस्य ईड्यस्य उच्चारणम् कर्तुं समर्था अभूवन्? अतः राहुलस्य एषा युक्तिरपि भ्रममूलिकैव।

यत् मोहनजोदरो, हडप्पा स्थाननिवासिनां सम्पर्केणैव तेषां उच्चारणे परिवर्तनं जातं इति राहुलस्य युक्तिर्न सम्यग् यतस्तेषां आर्याणां उच्चारणं तु प्राकृतमेव न हि तेषां सम्पर्केण। मोहनजोदारो, हडप्पास्थानेषु तु आर्या एव निवसन्तिस्म, न तत्र केऽपि अन्ये। यथा धारणया राहुलेन, तत्र अन्येषामेव निवासो लिखितः।

अग्रे लिखितं ईरानीआर्याः स्वकीयमूलस्थानं "आर्यानावेईजा" नामकं देशं जानन्तिस्म, परन्तु भारतीय-आर्याणां सन्देशः स्मृतिपथात् तिरोहितः। अत्र एतत् वक्तव्यम् यद् अनार्यान् आर्या इति वदन्ति ते आर्या नासन् किन्तु अनार्या एव, ये दक्षिणध्रुवस्थानात् ईरानदेशे आगताः। तेषामेव आर्यानावेईजां देशः दक्षिणध्रुवस्थाने आसीत्, नहि च ईरानदेशे। अतः एषाऽपि राहुलस्य युक्तिर्भ्रमपूर्णा एव। अतः निश्चितं वर्त्तते यत् राहुलेन अस्मिन् विषये यत्किंचिदपि लिखितं तत्सर्वं भ्रमपूर्णं अज्ञानपूर्णं एव ज्ञातव्यम्। तत् असत्। यतः "आर्यानावेइजा" देशस्तु कस्मिंश्चित् पूर्वस्मिन्काले दक्षिणध्रुव स्थाने एव आसीत्। तत्रैव पारसीकाः निवसन्तिस्म। तस्मात् स्थानात् शीतेन पीड़िताः ते उत्तरीय गोलार्द्धरूपध्रुलोकान्तर्गत-पारसीयादेशे आगतास्तान् राहुलः आर्या इति वदति। परन्तु स भ्रमः एव।☆

त्वर्यताम् !!! संस्कृते अभिनवं सचित्रं वर्णनकाव्यम् अनुग्राहकैः—

जयपुरवैभवम्

(लेखकः—भारतप्रसिद्धः कविशिरोमणिभट्टश्रीमथुरानाथशास्त्री)

राजथानस्य, जयपुरस्य च ऐतिहासिकं सचित्रं विनोदमयं काव्यगतं च वर्णनम्। हिन्दी-अनुवादः सहैव दत्तोऽस्ति।

भारतीग्राहकाणां कृते मूल्ये ७% न्यूनता

मूल्यं ५) पृष्ठ संख्या ७००

प्राप्तिस्थानम्:—"भारती" ग्रन्थागारः, मञ्जुनिकुञ्जः, सी-स्कीम जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूसदेशीयो महामनीषी आचार्यो वारान्निकोवः

(मूल ले० श्रीवाराणसीदासश्चतुर्वेदमहाभागः, अनु० श्रीगणेशरामशर्मा, झालावाड़, राजस्थान)

पूर्वानुवृत्तम्—

आचार्यः श्रीवारान्निकोवः संस्कृते तथाधुनिकीषु भारतीयासु भाषास्वनुवादकार्यमपि च पर्याप्तं चक्रे। अजीजुद्दीनलिखितस्य 'गंगोत्री' इत्यस्य, श्रीलल्लूलाल-लिखितस्य 'प्रेम-सागरस्य', एवमेव श्रीप्रेमचन्द्रस्य कथानां रूसीयभाषायामनुवादमकरोत्। तस्य सर्वश्रेष्ठा कृतिस्तुलसीदासकृतरामायणस्यानुवादो विद्यते। अस्यानुवादस्य योजनां स ईषवीये सन् १९३६ वर्षे एव सज्जीकृतवान्। तस्य पुत्रस्य शब्देषु—

"इत्थंविधस्योच्चस्तरस्य महत्त्वपूर्णस्य च कार्यस्यार्थेऽभूद्दशवर्षेभ्योऽधिकं समयं यावदविश्रान्तं सततं परिश्रमः। सर्वादौ स गद्यानुवादमेकं सज्जीकृतवान। ततः सः स्वकीयमनुवादकार्यं कुर्वन्नासीत्, पुनस्तत्काव्यरूपं चकार। अत्र कर्मणि स मूलग्रन्थस्य विचारान्, चित्रमयतां, छन्दांसि, कलात्मकं पक्षमित्यादीन् सर्वांस्तांस्तान् विशेषानशेषान् यथार्थतः परीक्षणतुलाकोटीमारोप्य सम्यक् सुरक्षितुं प्रयेते। सोवियतपाठकाः प्रोक्तं तदिदं काव्यं पूर्णतयावबोद्धुं प्रभवेयुस्तदर्थं सः स्वकीयेनानुवादेन साकं बह्वीष्टीकाष्टिप्पणीश्च संयुयोज, यासु भारतीयसंस्कृतौ, पुराणेषु, काव्यादिषु च प्रकाशं निचिक्षेप। महाकवेस्तुलसीदासस्य काव्यकृतीनां विश्लेषणं कुर्वाणेन श्री ए. पी. वारान्निकोवाचार्येण तर्कयुक्तिसंगतया रीत्यास्य कवेः प्रगतिशीलं जीवनकार्यं स्पष्टीकृतम्। सः प्रादर्शयत्, यद्धि जनतान्त्रिका विचारास्तुलसीदासस्य काव्ये किलौतप्रोता विद्यन्त इति।

"सोवियतजनताया एकः सुविस्तृतो भागो रामायणस्य तमेतमनुवादं महतौत्सुक्येन सरुचि समनुससार। रामायणस्यास्यानुवादस्य सम्बन्धिन्यो घोषणाः सोवियत-समाचारपत्रैराकाशवाणीभिश्च सदा सर्वदा सततं जायमाना अभूवन्। प्रकाशितेऽनुवादे सोवियतजनताः पुस्तकमिदमत्यन्तमुच्चैः समाद्रियन्त तस्य च स्वागत-सत्कारमकुर्वन्।"

स्वात्मनोऽस्य सफलकार्यस्य कृतेऽयमाचार्यमहोदयः सोवियत-सङ्घस्य सर्वोच्चं पुरस्कारं 'आर्डर आव लैनिन' लेभे।

यद्यप्यसौ साहित्यिकस्तपस्वी न कदापि भारतभूमेः साक्षाद्दर्शनस्य सौभाग्यमाप, तथापि तद्गृहमेव हि वस्तुतो 'भारतं' बभूव। तस्यात्मजो यदा भारतस्य रूसदेशीये दूतावासे सांस्कृतिक कार्यकर्तृ रूपेणात्राऽऽययौ तदाऽसंशयं तस्यात्मा स्वर्गे संतोषमनुभवन् स्यात्।

तस्यात्मजो न केवलं स्वस्य पूज्यस्य पितुः परम्परामक्षुण्णामरक्षत्, प्रत्युत तामग्रगामिनीं व्यवर्द्धयत्। एकदा केनचिद्भारतीयेन सम्पादकेन पत्रं विलिख्य पृष्टमासीत्—"भवदभिधानं श्रीवारान्निकोव इति वर्तते, तथा चानेनैव नाम्ना केनचिदेकेन रूसदेशीयसज्जनेन श्रीतुलसीदासस्य रामायणस्यानुवादो रूसीयभाषायां कृतोऽभूत्। अपि भवांस्तस्य सम्बन्धी?"

श्रीवारान्निकोवेनोत्तरितम्—"मम तैः साकं त्रिविधाः सम्बन्धा वर्तन्ते—स मे पूज्यो जनकोऽभूत्, मम गुरुरासीत्, मम गृहिण्याश्चापि स गुरुर्बभूव।"

स्थानाभावादत्र लघ्वाकारे लेखे श्रीवारान्निकोवाचार्यस्यात्मजस्य श्रीवारान्निकोवमहाशयस्य साहित्यिककार्याणां पूर्णं विवरणमिह दातुं न पार्यते, तथाप्येतत्तु समुल्लेख्यमेव यद्बन्धुवरेणानेनानेके लेखा लिखिताः सन्ति, बहूनां केषांचनानुवादाश्चापि विहिता वर्तन्ते।

स्वर्गीय पण्डित श्रीकामताप्रसाद गुरोर्हिन्दीव्याकरणस्यानुवादस्तेन स्वपत्न्याः साहाय्येन कृतोऽस्ति, तथा स्वपूज्यस्य पितुर्हिन्दुस्तानी-भाषाया व्याकरणस्य नवसंस्करणमपि च सज्जीकृतमास्ते। हिन्दुस्तानी भाषा, (रूसदेशीय भाषायां) स्व० प्रेमचन्द्रस्य 'बड़े घर की बेटी' इत्यस्याः कथाया एकमध्ययनम् (हिन्द्याम्), हिन्दीशब्दावल्यामांग्लभाषाशब्दाः, हिन्दीसाहित्यस्य युगनिर्धा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रणम्, हिन्दीभाषायां संकरशब्दाः (आंग्लभाषायाम्), हिन्दीभाषायां पर्यायवाचकाः शब्दा इत्यादयो निबन्धास्तैर्लिखिताः।

अतोऽतिरिक्तं महति सोवियतविश्वकोषे नामदेवस्य तुकारामस्य, सूरदासस्य, तुलसीदासस्य, हेमचन्द्रस्य, बङ्किमचन्द्रचट्टोपाध्यायस्य, नजीर-हालिकव्योस्तथा प्रेमचन्द्रादीनां चत्वारिंशत् परिचयाश्चाप्यैतैर्लिखिताः। तस्यान्येषां लेखानां सूची महती विस्तृतास्ते। मत्प्रार्थनानुरोधात्तेनैकं श्राद्धकर्मानुष्ठानं चापि स्वीकृतम्। अर्थात् सः स्वस्य पूज्यस्य पितुर्जीवनचरितमपि लेखिष्यतीति।

तस्य गृहिणी (यस्याः शुभाभिधानमेकेन भारतीयेन महोदयेन सरस्वतीदेवीति कृतमासीत्) सत्यमेव हि सरस्वतीव तत्सहधर्मिणी विद्यते, सा च तस्य साहित्यिककर्मानुष्ठानेषु पूर्णतया तत्साहाय्यमाचरति। तद्गृहे चायपानमाचरतो मम विनोदोपहासः प्रास्फुरत्। मयोक्तम्—"अत्र रूसदेशे सर्वाश्चापि महिलाः स्थूलविग्रहाः प्रपुष्टपीनकायाः स्वस्थाश्च परिदृश्यन्ते!" श्रीमती सरस्वतीदेवी तत्कालमेवोदतरत्—"यदा श्रीमतां देशे भोजनसमस्यायाः समाधानं भविष्यति तदा श्रीमतामपि महिला ईदृश्य एव स्थूलदेहाः स्वस्थाश्च भविष्यन्ति !!" अहं निरुत्तरोऽभूवम्। सामान्यतश्चतुर्वेदाः (चौबे) हासपरिहासप्रकरणे न कदापि प्रत्युत्पन्नमतित्वमपजहति परन्तु तदानीमहं स्वादीयसां विषकूटानामास्वादने तथा तन्मयोऽभवं यथा साकं विषकूटैरहमपि च पराजयमन्वभूवम्।

यदा देहल्यां, हिन्दीभवने, आचार्यश्रीवारान्निकोवमहाभागस्य प्रतिकृतिचित्रस्यानावरणसमारम्भोऽभूत्तदाप्यहमेकं मधुरं परिहासविनोदमकरवम्—'वयमाशास्महे, यच्छ्रीमदाचार्यमहोदयस्य पौत्रः कदाचिद्भारते रूसदेशीयराजदूतत्वेन समागमिष्यति!" अयं हि बत खेदावसरो यत्तस्य भाविनो राजदूतस्य दर्शनं लैनिनग्राडस्थलेऽहमाप्तुं नाशक्नवम्, यतः स तदानीं स्वपितामह्याः सविधे ग्राम्ये निवासस्थलेऽवसत्।

महान्तं दीर्घं समयं यावदस्माकं मिथो वार्तालापा अभूवन्। ततो मम निवर्तनसमये श्रीवारान्निकोवोऽब्रवीत्, 'वयं ध्वनि-ग्राहके यन्त्रे (टेप-रिकार्ड) श्रीमतां वाणीं सुरक्षितुमभिलषामः। अस्मत्कृते किमप्युच्यतां भोः!' तदानीमहं केवलमेतावदेव न्यवेदयम्—'अहं प्रसङ्गेनानेनातीव प्रसन्नतामन्वभवं यदत्र लैनिनग्राडमागत्य स्वर्गीयस्य-अलकसे वारान्निकोव-महाभागस्यात्मजस्य बन्धोर्वारान्निकोवस्य तत्पत्न्यास्तत्पुत्रस्य च दर्शनावसरो मया लब्धः! इत्थं मे प्रतिभाति, यदहं स्वदेशे स्वकीयं गृहमेवाध्यासीनोऽस्मीति। अस्य पुस्तकालये किलोत्तमोत्तमानां हिन्दी-ग्रन्थानां संग्रहं विलोक्य मम हृदयं हर्षभरनिर्भरमभूत्! श्रीवारान्निकोवमहाशयेन साकं मे प्राचीनोऽस्ति परिचयः। स खलु भारतवर्षे रूसदेशस्य भारतस्य च सांस्कृतिकसम्बन्धान् दृढीकर्तुं यां साधनां चकार, तामहं जाने। तस्यास्मिन् पवित्रे भवनेऽहमात्मनः प्रतिज्ञामिमां पुनरावर्तयितुमिच्छामि, यदहं मम मातृभूमौ (भारतवर्षे) रूसदेशस्य श्रेष्ठानां साहित्यिकीनां कृतिनां प्रचाराय यावच्छक्यं नूनं प्रयतिष्ये इति। साकमनेनाहमेतामाशामपि करोमि यद्बन्धुवरोऽसौ श्रीवारान्निकोवोऽपि चात्मनो देशवासिनो भारतीयसंस्कृतेरुत्तमानि तत्त्वानि बोधयितुं पूर्णतया प्रयतिष्यते।"

श्रीवारान्निकोवमहाशयस्यायमाग्रहोऽभूद्यदहं पञ्चदशविंशतिप्रायान् दिवसान् यावत्तस्य ग्राम्ये निवासस्थाने निवसेयम्, परन्तु तदानीं समये बतेदमतीव दुष्करमासीत्। सम्भवत आगामिनि वर्षे खल्वावां द्वावपि संगम्य गोर्कीमहाभागस्य जीवनचरितं सम्पादयिष्यावः। तदैव च तस्यादेशस्य परिपालनं भविष्यति।*

*टि० संस्कृतपण्डिताः, संस्कृतपत्रपत्रिकाणां पाठकाश्च संस्कृतेतरं वाङ्मयं तुच्छं नगण्यं चेति पूर्वाग्रहं दधतो विविधभाषाणां साहित्यिकानि पत्राणि प्राय उपेक्षन्ते। परन्तु सेयं धारणा तेषां पक्षे स्वयं संस्कृतभाषायाश्च कृतेऽपि नोचिता। यतो वैज्ञानिकसाधनानां सौलभ्यादिदानीं विश्वमिदमेकदेश इवाजायत। अधुनान्ताराष्ट्रियत्वं सर्वतो घनिष्ठतां व्रजद्विद्यते। ततः संस्कृतज्ञैरपि नानाभाषाणां साहित्यपठनं परमावश्यकं जातम्। अस्तु, संस्कृत-पत्राणां पाठकाः नूनं जानन्तः स्युर्यच्छ्रीमान् पण्डितप्रवरो वाराणसीदासश्चतुर्वेदमहाभागो हिन्दी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"चीन ! अपसर भारतात्त्वम्"

लेखकः—श्री "पद्म" ओझा शास्त्री साहित्यसदन ब्यावर (राजस्थानम्)

मानवाः पश्यन्तु विश्वे संस्कृतिर्नष्टा विनम्रा
उपरितस्ते शान्तिदूताः शासकाः खलु पूर्णभ्रष्टा.
किं सदाचाराद् बहिर्भूता वयं ? ननु व्याकुलोऽहम्
चीन ! अपसर भारतात्त्वम ॥

श्रूयते यद् भारतेऽस्मिन् हिमकिरीटे ते निपातः
विस्मृतं किं शम्भुरधिशेते धरायां पूर्णव्रातः
हन्त ते लद्दाखयात्रा, चौरवेषेणागतस्त्वम्
चीन ? अपसर भारतात्त्वम् ॥

धिक् सदा त्वां शासनाधिष्ठातृदेवीं, शापलीले !
स्मर तदानीं का दशा बोभूयते ते पञ्चशीले
रूससाहाय्यात् त्वदीयं भेदयामः पापकुम्भम्
चीन ? अपसर भारतात्त्वम् ॥

विस्मृतं किं तव गुरुः सिद्धार्थकः क्वाजनि ? पुनस्ते
का दशासीत्तत्र यद् "फाह्यान" भारतमागतो मे
ईदृशस्तव पादघातो नोचितः, संहारकस्त्वम्
चीन ? अपसर भारतात्त्वम् ॥

योद्धुमिच्छसि चेत्तदा स्मर स्वेष्टदेवं, कृतप्रतिज्ञा
संगरेऽधीता स्वयं श्रीकृष्णचन्द्राद् युद्धविद्या
भारते त्वं पश्य, वीराः प्राचरन् परिधाय कवचम्
चीन ? अपसर भारतात्त्वम् ॥

धारासभायां नेहरुर्निगदति, यदा ते सन्धिपत्र-
मागतं चेत् स्वागतं बोभूयते तेद्यपलपित्रं
अगपते त्यज नगपतिं जानीहि कालं नाद्य यात्म
चीन ? अपसर भारतात्त्वम् ॥

भाषायाः प्रौढो विद्वान् साहित्यमहारथेष्वेको विजयतेतमाम् । स च बहूनि वर्षाणि यावत् "विशालभारत" इतिनाम्ना सुप्रसिद्धस्य हिन्दीमासिकपत्रस्य सम्पादनं कृतवान् । 'अखिलभारतवर्षीय-हिन्दी-पत्रकारसंघस्य' प्रधानपदे चाप्ययमवियत । स खल्वन्ताराष्ट्रियपत्रकारेष्वपि ख्यातिमान्, सिद्धलेखनीको महालेखको ग्रन्थकारश्चास्ते । स चास्माकं भारतवर्षस्य संसत्सदस्योऽपि वर्तते । वर्षेऽस्मिन् स भारतीयशिष्टमण्डलस्यान्यतमसदस्यत्वेन रूसदेशमगच्छत् । तत्र गत्वा सः आचार्य श्रीवारान्निकोव-महाभागस्य निवासगृहमपश्यत् ।

आचार्यस्य पुत्रेण तद्वध्वा च साकं मिलित्वा तेन हि यदनुभूतं, यच्च दृष्टं, तत्संस्मरणरूपेण १८, आक्टोबर ५६ तिथेः 'साप्ताहिक हिन्दुस्थान' पत्रे लेखबद्धं प्रकाशितवान् । संस्कृतपत्रिकाणां पाठकानां कृते विषयोऽसौ ज्ञानवृद्धये, विनोदाय, श्रेयसे च स्यादिति मन्यमानोहं श्रीचतुर्वेदमहाभागं तथा साप्ताहिकहिन्दुस्तानपत्रस्य सम्पादकं प्रति च सादरं कृतज्ञतामाभारं च प्रकटयामि ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



और अब तरल पदार्थ मापने के मेट्रिक पैमाने

तरल पदार्थ मापने के मेट्रिक पैमाने—लिटर—का प्रयोग अप्रैल, १९६० से शुरू हो गया है।
रंग-रौगन और पेट्रोल उद्योग ने मेट्रिक प्रणाली अपना ली है।
अब रंग-रोगन लिटरों के हिसाब से बिका करेगा और पेट्रोल का वितरण भी लिटरों के हिसाब से होगा।

परिवर्तन तालिका

१ गैलन = लगभग ४½ लिटर

१ लिटर = १,००० मिलिलिटर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तरल प्रौंस	मिलिलिटर (मिलि०) (निकटतम मिलि० तक)
१	२८
२	५७
३	८५
४	११४
५ (=१ गिल)	१४२

गिल	मिलिलिटर (मिलि०) (निकटतम मिलिलिटर तक)
१	१४२
२	२८४
३	४२६
४ (=१ पिण्ट)	५६८

पिण्ट	लिटर (लि)	मिलिलिटर (निकटतम मिलि० तक)
१	...	५६८
२(=१ क्वार्ट)	१	१३६

क्वार्ट	लिटर	मिलिलिटर (निकटतम मिलि० तक)
१	१	१३६
२	२	२७३
३	३	४०९
४ (=१ गैलन)	४	५४६

मिलिलिटर	तरल प्रौंस निकटतम ¼ (तरल औंस तक)
१०	¼
२०	¾
३०	१
४०	१½
५०	१¾
६०	२
७०	२½
८०	२¾
९०	३¼
१००	३½

मिलिलिटर	पिण्ट	गिल	तरल प्रौंस (निकटतम ½ तरल औंस तक)
२००	–	१	२
३००	–	२	½
४००	–	२	४
५००	–	३	२½
६००	–	४	१
७००	१	०	४½
८००	१	१	३
९००	१	२	१½
१०००(=१ लिटर)	१	३	–

गैलन	लिटर	मिलिलिटर (निकटतम १० मिलि० तक)
१	४	५५०
२	९	९०
३	१३	६४०
४	१८	१८०
५	२२	७३०
६	२७	२८०
७	३१	८२०
८	३६	३७०
९	४०	९१०
१०	४५	४६०

गैलन	लिटर	मिलिलिटर (निकटतम १०० मिलि० तक)
२०	९०	९००
३०	१३६	४००
४०	१८१	८००
५०	२२७	३००
६०	२७२	८००
७०	३१८	२००
८०	३६३	७००
९०	४०९	१००
१००	४५४	६००

लिटर	गैलन	क्वार्ट	पिण्ट	गिल (निकटतम गिल तक)
१	–	–	१	३
२	–	१	१	२
३	–	२	१	१
४	–	३	१	–
५	१	–	–	३
६	१	१	–	२
७	१	२	–	१
८	१	३	–	–
९	१	३	१	३

लिटर	गैलन	क्वार्ट	पिण्ट (निकटतम पिण्ट तक)
१०	२	१	–
२०	४	१	१
३०	६	२	१
४०	८	३	–
५०	११	–	–
६०	१३	१	–
७०	१५	१	१
८०	१७	२	१
९०	१९	३	–
१००	२२	–	–

अपनाइये मेट्रिक प्रणाली

सरलता व एकरूपता के लिए

भारत सरकार द्वारा प्रसारित DA-59/577

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओरियण्ट पेपर मिल्स

निम्नलिखितानि वस्तूनि निर्मीयन्ते

बन्धनाय:-

(१) एम्. जी. रिब्ड क्राफ्ट
(२) एम्. एफ्. अनरिब्ड क्राफ्ट
(३) अक्लेद्य (वाटरप्रूफ) क्राफ्ट
(४) क्रेप क्राफ्ट

लेखनाय, मुद्रणाय च:-

(१) श्वेतपत्रम्
(२) क्रीमरङ्गस्य
(३) अर्धश्वेतीकृतपत्रम्
(४) अश्वेतीकृतं पत्रम्

आवरणाय-पेटकानां, पुटकानां च निर्माणाय कार्टनबोर्ड, ग्रैबोर्ड, डुप्लेक्स, ट्रिप्लेक्स, कार्ट्रिज, टिकटबोर्ड, आवरणबोर्ड प्रभृतिवस्तूनि निर्मीयन्ते ।

ओरियण्ट पेपर मिल्स (सीमितम्)

प्रबन्धाभिकर्त्तार:- **बिरलाबन्धव: [स्वतन्त्रम् सीमितम्]** ब्रजरङ्गनगर, (उडिसा)

Telephone
23-2572 (4 Lines)

Telegrams
"AMASIS"

ANDERSON WRIGHT, LTD., ANDERSON WRIGHT & Co.

(Established 1872)

ANDERSON WRIGHT (RAMGARH) PRIVATE LTD.
7. WELLESLEY PLACE CALCUTTA
POST BOX 140

Merchants & Agents :

JUTE MILLS
Khardah Co. Ltd.
SUGAR FACTORY
Ramnugger Cane & Sugar Co. Ltd.
COAL COMPANY
Kathara Coal Co. Ltd.

INSURANCE
Commercial Union Assurance Co. Ltd.
Union Assurance Society Ltd.
STEAMER AGENCY
India-Natal Line

PIECE GOODS
Horrockses (Sales Ltd.
EXPORTS
Jute Goods, Kapok, Silk Waste and Sundry Indian Produce.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जरत्कारुः

(लेखक : दीनानाथ त्रिवेदी 'मधुपः' जयपुरम्)

यस्याः पतिर्जरत्कारुर्महाकारुणिको मुनिः।
वासुकेर्भगिनी चारुर्जरत्कारुस्तपोधना ॥

बभूव यायावराऽभिधस्य मुनेर्वंशे जातो ब्रह्मचारी महातपस्वी जरत्कारुनामधेयो महर्षिः। सर्वदा स भ्रमणमेव करोतिस्म। यत्र सूर्योऽस्तमगात्, तत्रैव स्थितो भवतिस्म। एवं सततपरिभ्रमणवशात् स बहुविधतीर्थाटनमपि चकार। कदाचन स निराहार एव, कदापि पादपानां पत्त्राण्येव भक्षयित्वा यापयति स्म कालम्। तथापि स परिभ्रमणं न कदाचित् तत्याज।

एकदाऽऽहिण्डमानः स एकस्मिन् महागर्ते—ऊर्ध्वचरणानधोमस्तकान् लम्बमानान् निजपितृपितामहादीन् ददर्श। एवमधो विलम्बमानान् तान् पप्रच्छ—के यूयं? कथं गर्तेऽत्र लम्बध्वे? पितरः प्रोचुः—अस्मद्वंशविलोपकालः संप्राप्तः सांप्रतम्। अत एवाऽस्माकमियं दुरवस्था। वर्ततेऽस्माकमप्येको मन्दभाग्यो मन्दमतिर्जरत्कारुनामा पुत्रः। मूढः स केवलं तप एव तपति, पुत्रोत्पादनाय च स स्वविवाहं न करोति। तदनन्तरमस्मदीयवंशमूलोच्छेद एव भविष्यति—इत्यत एवेयमस्माकमधोगतिः। साधो! कोऽस्ति भवान्? त्वं हि सन्मित्रमिवाऽस्मद्दुरवस्थाकारणमप्राक्षीः। अतो वयं वेदितुमिच्छामो यत् त्वमस्माकं दुर्गतेः कारणं किमिति पृष्टवानसीति महत्कौतूहलं हि नः।

जरत्कारुरुवाच—सम्मान्याः! जरत्कारुरहमेवास्मि मन्दभाग्यः। भवन्तः सन्ति ममैव पूर्वजाः। श्रीमद्भिरेव भण्यतां किं मया विधेयमिति? पितृभिरुक्तं—पुत्र! स्ववंशमभिवर्धय त्वम्, यतस्तवाऽस्माकं च भाविनि काले न स्यात्दुरवस्था, यतो हि पुत्रिणः पुरुषस्य यादृशी सद्गतिर्जायते, न तादृशी महता तपसाऽपि सिद्ध्यति। अतो हे पुत्रक! काञ्चिद् योग्यां कन्यामुद्वाह्य कुरु सन्तानोत्पत्तिम्। अयमेवोपदेशोऽस्माकं तव कृते। कर्मणाऽनेनैव भविष्यति भूरि भद्रमस्माकमिति।

जरत्कारुणोक्तम्—यद्यपि विषयभोगाभिलाषया विवाहं तथा धनोपार्जनं करिष्यामि, न कदापि, तथापि भवतां हितं सम्पादयितुन्तु भवद्वचोऽनुपालनं विधास्याम्येव। परमस्त्यत्रापि समयबन्धोमम। विवाहमहं तथैव कन्यया सह करष्यामि, या मन्नाम्नी स्यात्, तस्याः सम्बन्धिनश्च स्वयं स्वेच्छया तां मह्यं चेद् दद्युः एतादृशी तुल्यनाम्नी काचन कन्या लप्स्यते चेत्तदाऽवश्यं विवाहोऽपि तया सह विधास्यते मया।

किं च हे पितरः! अहमस्मि धनहीनः। को दास्यति मह्यं प्राणप्रियामात्मनस्तनयाम्। आम्, यदि भवतां शुभाशीर्भिः कोऽपि कन्यां दास्यति स्वां, तर्हि तामहं स्वीकरिष्यामि, तस्यां मत्तो या सन्ततिः सम्पत्स्यते, साऽवश्यं भवतः समुद्धरिष्यति। भवन्तः सर्वेऽपि स्वर्गं गत्वा शाश्वतिकं सुखमवाप्स्यन्ति—इति।

ततः स जरत्कारुः कन्यामन्वेष्टुं निर्जगाम, परं न कुत्रापि आत्मयोग्यां कन्यां लेभे। अन्ते स निर्जनं वनं गत्वा यदा तत्र त्रिवारमीश्वरं भार्यार्थं प्रार्थयामास, तदा तन्निकटमागत्य वासुकिः स्वभगिनीं पत्नीत्वेन तस्मै दातुं बभूव सन्नद्धः। जरत्कारुणा कथितम्—महाभाग! प्रतिज्ञातमस्ति मया यत् यस्याः कन्याया ममैव नाम स्यात्, तत्सम्बन्धिनश्च तां मह्यं स्वेच्छया दद्युश्चेत्, तदैवाहं तया सह विवाहं करिष्यामीति। अतः कथ्यतां किन्नामधेयेय भवतो भगिनीति।

वासुकिः प्रत्युवाच—जरत्कारो! गुणैर्गरिष्ठायाः कनिष्ठाया ममास्या भगिन्या नामापि 'जरत्कारुः' इत्येवास्ति। अहं स्वेच्छया सहर्षञ्च तुभ्यं दातुमिच्छामि। अतस्त्वमिमां भार्यात्वेन गृहाण।

एवं नागाधिराजेन वासुकिना प्रत्तां तद्भगिनीं जरत्कारुनाम्नीं लब्ध्वा स जरत्कारुर्विधिना तया सह विवाहं कृतवान्। अस्मिन्नेव क्षणे द्वौ समयबन्धौ (शर्तें) तेन कृतौ—यत् सर्पराज! अतः परं स्वभगिन्याः सर्वविधमपि साहाय्यं भवतैव सम्पादनीयं भविष्यति तथा जरत्कारुरियं तथाविधं किमपि कार्यञ्च न कुर्यात्, यन्ममाऽप्रियं स्यात्। कदाचिदियमेतादृशं कर्माऽऽचरिष्यति चेत्तदा त्वरितमहमेनां त्यक्त्वा कुत्रचिद् यास्यामीति।

★ —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुर-मिलनम्

(ले० : श्रीनन्हूलाल गौतमः 'निर्ममः' एम० ए० (पूर्वार्द्ध) शास्त्री (उत्तरार्द्ध) राजकीय कालेज, कोटा)

निशायाः शान्तं वातावरणमासीत् । चन्द्रज्योत्स्ना भूमौ प्रस्फुटिता आसीत् । राकेशस्य शीतलस्वच्छचञ्चल रश्मयः वसुन्धरायाः स्वोल्लासमयं नृत्यं कुर्वन्त्यः आसन् । निर्मलः स्वपित्रा चन्द्रशेखरेण अन्यसम्बन्धिभिश्च सह स्वच्छज्योत्स्नायां भ्रमणार्थं निरगच्छत् । निर्मलः हृष्ट-पुष्टाङ्गः विंशतिवर्षवयस्कः एम.एस्.सी. परीक्षायाः छात्रः आसीत् । तस्य नेत्रे उन्मत्ततया पूर्णे आस्ताम्, तस्य मुखाकृतिश्च वर्तुला आसीत् । स आंग्लपरिधानैः सुशोभितः आसीत् ।

निशायाः तस्मिन् निस्तब्धसमये पिता स्वसम्बन्धिभिः सह निर्मलस्य विवाह-विषये चिन्तयन् आसीत् । कश्चित् अवदत्, अधुना तु निर्मलः विवाहयोग्यो न वर्तते. अधुना तस्मै तस्य अध्ययनाय अवसरं देहि । केनचित् महोदयेन तारस्वरेण उक्तं—

"धन्यः अयं समाजः !

यस्मिन् विंशतिवर्षवयस्कायाः बालायाः विवाहस्तु आवश्यकः युवके च त्रिंशत् वर्षाणि अविवाहिते सति हानिः न वर्तते ।"

अस्य वार्तालापस्य समाप्तिस्तदा अभवत् यदा निर्मलेन स्वपितुः सम्मुखे अपरिचितया बालिकया सह विवाहस्य अस्वीकृतिः दत्ता ।

कोऽपि सज्जनः निर्मलात् ईदृशीं आशां न करोति स्म । यतः ते जानन्ति स्म यत् निर्मलः अद्यावधि प्राचीन-संस्कृतिसंस्कृते गृहे एव पालितः अस्ति । पितुस्तु पूर्वमेव सन्देहः आसीत् यत् निर्मलः अस्माकं योजनां विफली-करिष्यति । इदानीं तु पितुः सन्देहः निर्मलेन प्रकटितः अपि आसीत् । तेन पूर्वमेव ज्ञातमासीत् यत् आधुनिक-विचारे संलग्नः मम पुत्रः स्वविवाहस्य सम्बन्धे नूनं हस्तक्षेपं करिष्यति । अयं दोषः निर्मलस्य नासीत् । दोषः आसीत् अस्य सभ्यवातावरणस्य, यस्मिन् तेन मैट्रिक-एण्टर-बी.एस.सी. परीक्षाः उत्तीर्णाः कृताः । निर्मलः स्वविचारात् समाजस्थ-रूढिगतःबन्धनान्यपनेतुं मैट्रिकपरीक्षानन्तरमेव एकया स्वस्थया सुन्दर्या आधुनिक-विचारयुक्तया बालिकया सह सम्बन्धस्य दृढं निश्चयं अकरोत् । सः इच्छति स्म यत् सः स्वविवाहं तस्य सह-पाठिन्या पद्मिन्या सह एव करिष्यति । यतः स तया सह सम्यक् परिचितः अस्ति ।

पद्मिनी एका अत्यन्तसुन्दरी आधुनिकवातावरणे परिपोषिता उच्चकुलस्य बाला आसीत् तया अद्वितीयेन नवयौवनेन च निर्मलः अनायासमेव आकृष्टः ।

निर्मलस्य पिता चन्द्रशेखरः स्वपत्न्यै कृष्ण-कान्तायै निर्मलस्य वार्ताम् अकथयत्, तदा सा क्रोधेन उन्मत्ता जाता चन्द्रशेखरं निरभर्त्सयत् ।कृष्णकान्ता निरक्षरभट्टाचार्या आसीत् । अतः सा सर्वदा आधुनिक-महिलाः जुगुप्सते स्म । आत्मनः गृहे एकां आधुनिकीं सुशिक्षितां नववधूं कदापि न इच्छति स्म । कृष्णकान्ता एका स्वस्था सुन्दरी नम्रा गृहकार्ये च निपुणा गृहिणी च आसीत्, किन्तु तस्यां अयमेव दोषः यत् स नव-शिक्षिताः महिलाः जुगुप्सते स्म । एतदर्थं सा दोषभाक् नासीत्, अपितु आसीत् समाजः ।

पद्मिन्याः पिता वाकीलः शीतलकुमारः सज्जनः विवेकी व्यवहारकुशलश्च आसीत् किन्तु धनलोलुपः आसीत् । पद्मिन्याः अङ्गप्रत्यङ्गेषु यौवनस्य छाया प्रस्फुटिता आसीत् । अतः शीतलकुमारः अपि इदानीं कमपि सुयोग्यं वरं दृष्ट्वा पद्मिन्या विवाहार्थं उत्कण्ठितः आसीत् । तस्येच्छाऽऽसीत् यत् कस्मैचिदपि धनिक-युवकाय एतां प्रदाय तस्माद् यद् धनं लभ्येत तेन सुखेन जीवनं यापयेयम् इति ।

अतः शीतलकुमारेण स्वकन्यार्थं बालकृष्णनामा एको धनपतिः वरत्वेन निर्वाचितः । श्रीबालकृष्णः बम्बई-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रान्तनिवासी सुविख्यातः प्राड्विवाकः (बैरिष्टरः) आसीत्। किन्तु दौर्भाग्येन सः अक्ष्णा काणः आसीत्। परं स उपनेत्रेण तं दोषं प्रच्छाद्य पद्मिन्या सह विवाहं कर्तुं इच्छति स्म।

नवयौवना, सुन्दरी, गृहकार्ये निपुणा, सुशिक्षिता च पद्मिनी कदापि बालकृष्णस्य योग्या नासीत्। किन्तु विपरीतः समयः दुर्भाग्यं च कदापि कमपि पृष्ट्वा न आगच्छतः। नवयौवनमण्डिता सा पद्मिनी केवलं निजं सहपाठिनं निर्मलम् एव सुयोग्य आत्मनोऽनुकूलं मत्वा निश्चिन्ता आसीत्। तस्या दृढविचाराः शीतलकुमारस्य आशासु तुषारपातं अकुर्वन्। शीतलकुमारः अपि हठी आसीत्। सः कथमपि अतुलं धनराशिं त्यक्त्वा स्वपुत्र्याः पद्मिन्या एकस्य निर्धनस्य पुत्रेण निर्मलेन सह, यः सुशिक्षितः सुशीलः विनम्रश्च आसीत्, विवाहं कर्तुं उद्यतः नासीत्। शीतलकुमारः लक्ष्मीभक्तः आसीत्। अतः पण्डित प्रसन्नं कृत्वा शुभलग्नं बालकृष्णेन सह निश्चितं कृतवान्।

इतः पद्मिनी स्वप्राणानां बलिं दत्वापि धनलोलुपं पितरं शीतलकुमारं पतितं समाजं च इदं दर्शयितुं इच्छति स्म यत् यदि तस्या विवाहः भविष्यति तर्हि केवल चन्द्रशेखरस्य सुपुत्रेण निर्मलेन सह एव। नो चेत् सा स्वप्राणानाम् अन्तं निष्ठुरसमाजस्य सम्मुखे करिष्यति।

कवेः इदं कथनं सत्यमेव 'Love is blind.' अर्थात् प्रेमा अन्धः अस्ति। प्रेमी प्रमिका च स्वप्रेमाणमनु स्वकीयं सर्वस्वं बलिदत्तं कृत्वा सर्वदा प्रेम्णः समुचितार्थं लोकानां सम्मुखे संस्थाप्य गच्छतः। समाजस्य बन्धनानि नानुरागिणः स्वस्वमार्गात् प्रच्यावयितुं शक्नुवन्ति। यदि तत् प्रेम विशुद्धं वासनारहितं च भवेत् तर्हि प्रेमावस्थायां द्वयोः प्रेमिजनयोः हृदयं अभिन्नं भवति। यतः प्रेम अमरम्। समाजस्य रूढिबन्धनैः विहितो विवाहः किं दम्पत्योः हितावहः? नहि नहि कदापि नहि। तदा तु विवाहः न तयोः वरः, अपि तु अभिशापः भवति।

अद्य सायंकाले पद्मिन्याः पाणिग्रहणसंस्कारः तस्याः पितुः इच्छानुसारेण बालकृष्णेन प्राड्विवाकेन सह सम्पत्स्यमानः अस्ति। सम्पूर्णवीथिका नवरङ्गैः सुशोभिता अस्ति। पद्मिन्याः गृहस्य शोभायाः तु कथैव का? गृहस्य सर्वे जनाः व्यस्ताः सन्ति। अयि कुत्सितसमाज! अयि त्वं कीदृशः निष्ठुरः? कति अनुरागिणः सामाजिकबन्धनानां समृद्धेश्च बलिवेद्यां आहुताः। परं निष्ठुरः त्वं स्वकीयां प्रकृतिं न त्यजसि। किं अबलाजनस्य निर्बलतायाः इमम् अनुचितं लाभं गृह्णासि? नहि नहि, इदानीं तवेच्छितं न सेत्स्यति। समयः परिवर्तितः जातः। त्वम् अपि परिवर्त्तितः भविष्यसि एव। अधुना स्त्रीजातिः ईदृशी निर्बला नास्ति या अनायासमेव त्वदीये पाशे पतिष्यति।

तपस्विनी पद्मिनी स्वसखीभिः सह एकस्मिन् पार्श्वे अस्ति। सा त्यक्तभोजनाच्छादना वर्तते। तस्या दृष्ट्यां केवलं एकस्य निर्मलस्य मञ्जुलाकृतिः समाहिता वर्तते। कीदृशं शोभनं स्यात् यदि इयं सम्पूर्णा शोभा पद्मिन्या सह निर्मलस्य विवाहार्थं अभविष्यत्।

यदा तपस्विना निर्मलेन इयं सूचना प्राप्ता यत् अद्य सायंकाले पद्मिन्याः सम्बन्धः बालकृष्णेन सह सम्पत्स्यते तदैव सः किंकर्त्तव्यविमूढः इव अदृश्यत। तस्य हृदये प्रेम्णः द्वन्द्वयुद्धं प्रचलितमासीत्। सः पद्मिनीं प्राप्तुं उन्मत्त इव दृश्यते स्म एवं तस्यां दशायामेव सायंकालं यावत् येन केन प्रकारेण पद्मिन्याः गृहं प्राविशत्।

मण्डपस्य मध्ये पण्डितः उच्चस्वरेण विवाहस्य मन्त्राणां ध्वनिं कुर्वन् आसीत्। मण्डपः पुष्पमालाभिः सज्जितः आसीत्। मण्डपस्य मध्ये एकस्मिन् पार्श्वे वृद्धः प्राड्विवाकः बालकृष्णः प्रसन्नचित्तो भूत्वा पुष्पहारं धारयन् उपस्थितः आसीत् तथा समीपमेव द्वितीये पार्श्वे खिन्ना पद्मिनी वरमालां गृहीत्वा स्थिता आसीत्।

अस्तु मालासंस्कारसमये द्वाभ्याम् पूर्वमेव निर्मलः अकस्मात् वरवध्वोः मध्ये गत्वा उपस्थितः अभवत्; एवं पद्मिनी प्रसन्नचित्ता भूत्वा उल्लासेन निर्मलाय मालां आर्पयत् तथा निर्मलः अपि सहर्षम् एकं पाटलपुष्पहारं पद्मिन्याः ग्रीवायां समार्पयत्।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सधन्यवादम्

फोर्ट ग्लास्टर इन्डस्ट्रीज लिमिटेड

उत्तमप्रकारक जूट, टाट एवं बोरकवस्त्र

निर्माता

मैनेजिंग एजेन्टस् :—

केटलवेल बुलन एण्ड कम्पनी, लिमिटेड

२१ स्ट्रान्ट रोड,

टेलीफोन—२२-४६०१-५ कलकत्ता टेलीग्राम—केटबुलन

हरिनगर सूगर मिल्स लि०

*** फेक्टरी ***

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा—रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई—२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन सुगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधानत्वम्

पुर्वानुवृत्तम्— मान्याः श्रीमोतीलालशर्माणः, मानवाश्रम, दुर्गापुरा

प्रभवप्रलयाधिष्ठातुस्तस्यैतस्याव्ययात्मनोऽमृता विद्या अक्षरविद्या मुक्तिसाक्षिणी, मर्त्या तु क्षरविद्या सृष्टिसाक्षिणी । शास्ता त्वन्यः सच्चिदानन्दलक्षणः पुरुषात्मा अव्ययः । तदेतत्सर्वं गुहानिहितं विद्यारहस्यमभिप्रेत्याह महर्षिः श्वेताश्वतरः—

द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे ।
क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः ॥

श्वेताश्वतरोपनिषत् ५।१।

मुण्डकश्रुतिरप्याह—

"शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ- 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' ? इति । तस्मै स होवाच-द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति-परा चैव, अपरा च । तत्रापरा—ऋग्वेदो, यजुर्वेदः सामवेदो, ऽथर्ववेदः, शिक्षा कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्यौतिषमिति । अथ परा, यया तदक्षरमधिगम्यते" ।

—मुण्डकोपनिषत् १।१।२,३,४।

इदमत्रावधेयम् : श्वेताश्वतरश्रुतौ तु अक्षरभावस्य विद्यात्वं, क्षरभावस्य च-अविद्यात्वं प्रतिपादितम् । मुण्डकोपनिषदि च क्षराक्षरयोरुभयोरेव विद्यात्वं निरूपितमित्येवं सति श्रुतिविरोध आपद्यते । तन्निराकरणार्थं— विश्वोपाधिविरहिता विशुद्धा विद्या विद्या, विश्वविशिष्टा विश्वरूपा विद्यात्वविद्येत्थं सामञ्जस्यं कार्य्यम् । विश्वरूपा विद्या विद्यानम्, विशुद्धा तु विद्या ज्ञानम् । संचरक्रमे ज्ञानमेव विज्ञानं भवति, प्रतिसञ्चरक्रमे विज्ञानमेव ज्ञानम् । सृष्टिकाले ब्रह्मैवेदं विश्वं, संहारकाले विश्वमेवेदं ब्रह्मेति 'ब्रह्मैवेदं सर्वम्' 'सर्वं खल्विदं ब्रह्म' त्यादिरूपेण सञ्चरप्रतिसञ्चरपक्षनिरूपकैः श्रौतवचनैः स्पष्टम् ।

विद्यानुग्राहको ज्ञानपक्षः, अविद्यानुग्राहकः—कर्म्मानुग्राहको वा विज्ञानपक्षः । न केवलं ज्ञानमेव पुरुषार्थः, नापि विज्ञानमेव । विज्ञानसहकृतं ज्ञानमेवेह लोकेऽभ्युदयजनकं सत् परलोके निःश्रेयसकरम् । विज्ञानात्मके कर्म्मकाण्डे—एव निष्णाता वैज्ञानिका वा कर्म्मठा वा अन्धं तमः प्रविशन्ति । ततो भूय इव ते, ये केवलं ज्ञाने एव रता ज्ञानिनः सर्वकर्म्मपरित्यागलक्षणसंन्यासपथानुयायिनः । संग्रहे-एवाभ्युदयः । तदेतत् सर्वं रहस्यं हृदि निधायैवोक्तमभियुक्तैः—

तृष्णा लज्जा भयं दुःखं विषादो हर्ष एव च ।
एभिर्दोषैर्विनिर्मुक्तः स जीवः शिव उच्यते ॥१॥
तस्माद्दोषविनाशार्थमुपायं कथयामि ते ।
ज्ञानं केचिद्वदन्त्यत्र केवलं तन्न सिद्धये ॥२॥
योगहीनं कथं ज्ञानं मोक्षदं भवतीह भोः ।
योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्म्मणि ॥३
तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत ॥४॥

—योगशिखोपनिषत्

योगस्थःकुरु कर्म्माणि सङ्गं त्यक्त्वा धनञ्जय ! ।
सिद्ध्यसिद्ध्योः समो भूत्त्वा समत्त्व योग उच्यते।।५
न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ।।६।।
काम्यानां कर्म्मणां न्यास संन्यासं कवयो विदुः ॥७
ज्ञान तेऽह सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्त्वा नेह भूयोऽन्यज् ज्ञातव्यमवशिष्यते ॥८

—गीता

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥९॥
विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥१०॥

—ईशोपनिषत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

शिक्षा--दर्शनम्

संस्कृतस्य शिक्षाप्रणाल्यां परिवर्तनस्य आग्रहः

संस्कृतसेविनः संवादेनानेन सुतरां प्रसीदेयुर्यत् अस्मिन् मार्चमासे एव "मध्यप्रदेशसंस्कृत-शिक्षक-संघस्य" षष्ठेऽधिवेशने जबलपुरनगरे संस्कृतशिक्षासंबन्धे भूयस्तरां विचाराः समभवन्। संस्कृतस्य तस्मिन् प्रान्ते प्रकाण्डविद्वान् पं० श्रीगङ्गाविष्णुपाण्डेयमहोदयः सभाया एतस्या अध्यक्षः समभवत्। संस्कृतानुशीलनेनैव यापितवर्षपूगः सोयं वयोवृद्धो विद्वान् संस्कृतस्य प्राचीनताम्, ऐतिहासिकतां च सर्वात्मना समर्थ्य सम्यक्प्रकारेण साधितवान्—'यत् संस्कृतसाहित्यमेवाऽस्माकं भारतीयानां मूलधनम्। इदमेवाऽस्माकं संस्कृतेर्निधिः। बहवो वैदेशिकदुर्मन्त्रेण भ्रान्ताः संस्कृतं मृतभाषां वदन्ति, किन्तु अस्मिन् दिनेऽपि 'देववाण्याः' पदं मण्डयन्ती सेयम् अद्यापि आङ्गलभाषाया अपेक्षया भारतीयजन-जीवनम् अधिकाधिकं स्पृशति। वर्तमानसमयेऽपि सेयं ग्रीक-लेटिनाद्यपेक्षया समधिकं जीविता समृद्धा च। संस्कृतस्य 'पुनर्जीवितीकरणे' न केवलमस्माकं राष्ट्रिया एकतैव दृढीभवेत्, अपितु चारित्रिक-नैतिकशक्तिष्वपि प्रकामं प्रबलता प्रभवेत्।'

पाण्डेयमहोदयेन वर्तमानकाले संस्कृतं प्रति या भारतीयानामुदासीनता तां प्रतिभूयस्तरां खेदः प्रकटितोऽभूत्। अस्तु, शिक्षकसंघस्याऽस्मिन्नधिवेशने सर्वसम्मत्या सोयं प्रस्तावः पारितोऽभूत्—"यत् जबलपुरे, भूपाले, रीवांनगरे चापि शीघ्रातिशीघ्रम् शास्त्रिकक्षया, आचार्य-श्रेण्यश्चापि सुस्थिररूपेण नियन्तव्या भवेत्।" किञ्च, 'संस्कृतविश्वपरिषदः' 'गोपालबागशाखा'द्वारा ये प्रस्तावाः पूर्वं समर्थिता अभूवन् तेषां कार्यरूपे परिणमनं मुहुर्मुहुः प्रार्थितमभूत्।

अस्तु, नवीनपदाधिकारिणां निर्वाचनवेलायामपि पं० गङ्गाविष्णुपाण्डेयमहाभागः अध्यक्षत्वेन निर्वाचितोऽभूत्। अनेन हि पाण्डेयमहोदयस्य लोकप्रियता, संस्कृतशिक्षाविषये प्रामाणिकता च सुतरां प्रतीता भवति। यत्किमप्यस्तु, राजस्थानप्रान्तीया युक्तप्रान्तीयाश्च संस्कृत-सेविनः शिक्षाधिकारिणश्च बहोः कालात्—संस्कृतशिक्षायां सामयिकपरिष्कारं समर्थयन्ते, यथाशक्ति कुर्वन्ति चापि। एतैः आयोगादिकं नियम्य संस्कृतप्रचारार्थं बहुतरं प्रयतितम्। 'यतो धर्मस्ततो जयः' इति हि राजकीयध्वजेनात्मनो धर्मप्राणतां समर्थयमानैः राजभिः, तदधीनाभिः प्रजाभिश्च चिरकालादात्मनः संस्कृतिः सुरक्षिता। संस्कृतेर्मूलभूता सेयं संस्कृतभाषा च शिक्षालयैः स्वकीयप्रान्ते सर्वतः प्रचिचारयिषिता च। पाश्चात्यशासकानां मूलमन्त्रेण आङ्गलभाषामेव शिक्षासर्वस्वं मन्यमानैर्नवीनशिक्षितैः अन्येषु प्रान्तेषु संस्कृतशिक्षा शनैः शनैर्मन्दीकृता, विज्ञानादिचाकचक्यमोहितैरुपेक्षिता च। जनतन्त्रशासनस्य स्वतन्त्रराज्येऽप्यस्मिन् निजसंस्कृतमूलभूतायाः संस्कृत-भाषायाः प्रचारं तच्छिक्षां प्रति च, यदि शिक्षाकर्णधाराणां साम्प्रतमप्यवधानं भवेत्तर्हि शिक्षाविषये देशस्य वास्तवं कल्याणं भवेत्। भावयतु भगवान् भारतस्य भविष्यत्यपि भविकमिति किं भूयस्तरां विस्तरेण। ★

एतेन--"सर्वकर्मपरित्यागलक्षणो विशुद्धज्ञानात्मकं सन्यास एव मुक्तये-उपयुज्यते" इति कथयन्तो ज्ञानवादिनः सर्वथैव प्रत्युक्ताः—जगन्मिथ्यात्ववादरता वेदान्तिनः।

पूर्वोक्तेन सन्दर्भेणेदं साधु संसिद्धं भवति-यन्निबन्धप्रेरकैर्येयं संस्कृतविद्याभिप्रेता, सैषावेदमूला वेदात्मिका वा विश्वविद्यैव–इति। तस्याश्चास्या विश्वविद्याया मूलं सच्चिदानन्दघनो वेदपदार्थ एव। वेद एव विद्यारूपेण विकसन् प्रतीयते। सैषा महाविश्वात्मिका महाविद्यैवागमशास्त्रे दशधा विभज्योपस्तूयत इति दशमहाविद्यारहस्ये वैशद्येन प्रतिपादितमिति विशेषजिज्ञासुभिस्तत्रैव द्रष्टव्यम्। प्रकाशितञ्चेदं दशमहाविद्यारहस्यमंशात्मना राष्ट्रभाषामाध्यमेन। तस्यैतस्या विश्वविद्याया उदरे अनेकाः खण्डविद्या निविष्टा विद्यन्ते। तासामेतासां खण्डविद्यानामनुग्राहिणी महाविद्या वेदविद्या नाम। ततश्च वेदस्य, किंवा वेदविद्यायाः सर्वविद्यानिधानत्वं सम्यगुपपद्यते। सैषा विद्यापदार्थमीमांसा द्वितीया संक्षेपेण प्रदर्शिता। इति—विद्यानिरुक्तिः —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपदेशमालायां

सन्ध्योपासनम्

पंचमो मणिः

पूर्वानुवृत्तम्—

(ले० महोपाध्याय आशुकविः श्रीहरिशास्त्री दाधीच, जयपुरम्)

नास्मिन् कापि पीडा पुनरुत्पत्स्यत इति । सधन्यवादं प्रणम्य स प्रेतो ब्रह्मराक्षसः अन्तर्दधे ।

जायमान एवास्मिन्वृत्तान्ते समीपस्थाः सर्वे जना गृहस्थाश्चैकत्रिता बभूवुः । दृष्ट्वा श्रुत्वा च सन्मुखोदितं सर्वे सविस्मयमित्यूचुः । धन्योऽसि महात्मन् यस्य सकृद्गायत्रीमन्त्रजप्तजलकणस्पर्शमात्रेण ईदृशो घोरो ब्रह्मराक्षसःसद्यो मुक्तिं प्राप्तः । वयं भवद्दर्शनेनपूताःस्मः।

स वणिक् सकुटुम्बः तस्य ब्राह्मणवरस्य महतीं पूजां कृत्वा भोजनशायनादिना तमुपसिषेवे । सुप्रीतो ब्राह्मणस्तान् उवाच ।

भोः भोः मया किमपि नानुष्ठितम् । न चास्य ब्रह्मराक्षसस्य निष्कासनार्थं मया प्रयतितम् । अहं तु प्रत्यहं त्रिकालं सन्ध्योपासनं करोमि प्राप्तकालः सोयं

साण्डु ब्रदर्स
सहर्ष घोषणा करते हैं
हीरक
महोत्सव
१८९९ - १९६०

दत्तात्रेय कृष्ण साण्डु ब्रदर्स चेम्बूर प्रायव्हेट लि.

चेम्बूर – बम्बई ३८

अब इसे कोई तकलीफ न होगी, ऐसा कह धन्यवाद दे प्रणाम कर वह प्रेत (ब्रह्मराक्षस) अन्तर्धान हो गया । लड़का स्वस्थ होकर बैठ गया इस वृतान्त के होते ही आसपास के सब गृहस्थी एकत्रित होगये थे । उस प्रेत के मुख से यह बातें सुनकर आश्चर्यान्वित हुए बोले धन्य हो महात्मा ! आपके एकबार गायत्रीमन्त्र से जपे जलकण के लगते ही ऐसा घोर ब्रह्मराक्षस तुरन्त मुक्त होगया,धन्य हो ! हम आपके दर्शनों से पवित्र हुए ।

वह बनिया भी कुटुम्बसहित उस ब्राह्मण की बड़ी पूजा करके भोजनशायनादि से उसकी सेवा करने लगा । प्रसन्न हुआ ब्राह्मण उन सबको बोला ! हे भाइयों ! मैंने कुछ नहीं किया है, न मैंने इस ब्रह्मराक्षस को ही निकालने का प्रयत्न किया है । मैं तो त्रिकाल संध्योपासन सदा ही करता हूँ । वही आज अवसर पाकर यहां भी किया । हां इस गायत्री भगवती की ऐसी महिमा है, जो किसी से पूर्ण रूप से नहीं कही जा सकती । भगवान विश्वामित्र ने तो इस जगदम्बा के प्रभाव से नई सृष्टि ही रचना शुरू कर दी थी । फिर उसे सब ही देवों ने प्रसन्न कर क्षमा मांग कर शान्त किया ।

ऐसे प्रभावशालिनी भगवती गायत्री का उपासन ब्राह्मण क्यों न करे, ब्राह्मण तो इसी के द्वारा महत्व को प्राप्त होते हैं और मन्त्र से नहीं । क्षत्रिय और वैश्य भी इसकी आराधना से अपना अपना अभीष्ट प्राप्त करते हैं । यह कहकर भोजनादि से निवृत्त हो सो गया तब वह बनिया अपनी पत्नी, पुत्रादिकों से बोला–देखो आज हमारा भाग्य कैसा उदित हुआ है । ऐसा महात्मा स्वयं हमारे घर ही पर स्वतः प्राप्त हो गया ।

याद रखो आज से कोई भी, संध्योपसन गायत्री जप करने वाला ब्राह्मण हमारे घर पर आवे तो सब कार्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथाः-

परोपकारी महात्मा

श्री कमलानाथ शर्मा, जयपुरम

श्रीसत्यस्वरूपाख्यो महात्मा प्रयागात् काशीं व्रजति स्म । तस्मिन् दिने बाष्पशकट्यां महानासीत् संघर्षः, किन्तु आवश्यकतावशात् स्वामिमहाभागो महासंकुलतायामपि शकटेः एकस्मिन् कोणे दण्डायमानः स्थितोऽभवत् । तत्र पाश्चात्यशिक्षागर्वितः एकः 'जैण्टिलमैनः'

महात्मा श्रीसत्यस्वरूप स्वामी प्रयाग से काशी जा रहे थे । उस दिन रेलगाडी में बड़ी भीड थी । किन्तु जरूरत के सबब से इस महाभीड़ में भी स्वामीजी गाड़ी के डब्बे में एक कोने में खड़े हो गये । वहां पश्चिमी शिक्षा पाये हुए एक जैण्टिलमैन भी बैठे थे । उनने

विधिनात्रापि समुपाश्रितः । अस्या गायत्र्या भगवत्या ईदृश एव महिमास्ते । नायं केनापि पूर्णतया वक्तुं शक्यते । भगवता विश्वामित्रेण तु अस्या जगदम्बायाः प्रभावेण नवीना सृष्टिरेव कर्तुं प्रारब्धा सा च सर्वैर्देवैः सम्प्रसाद्य कौशिकं क्षमापय्य च प्रशमिता ।

इत्थंभूतप्रभावाया भगवत्या गायत्र्याः को नाम ब्राह्मणादिः उपासनां न कुर्यात् ! ब्राह्मणास्तु अनया हि महत्त्वमाप्नुवन्ति नान्येन मन्त्रेण ।

क्षत्रियाः वैश्या अपि चास्या आराधनेन स्वस्वाभीष्टं लभन्ते इत्युक्त्वा विरराम । भोजनादिभिर्निवृत्तः सुप्तश्च ।

पुनः स वणिक् स्वगेहस्थान् पत्नीपुत्रभातृप्रमुखानुवाच । भोः ! फलितमस्मद्भाग्येन यत ईदृशो महात्मा स्वयं गृह एव प्राप्तः । स्मरत भोः । अद्यप्रभृति कोपि सन्ध्योपासननिरतः गायत्रीजापको ब्राह्मणोऽस्मद्गृहानुपतिष्ठेत तत् सर्वं विहाय सभक्ति तस्मै स्वागतं वाच्यम् तदातिथ्यं चाप्रमत्तैर्भवद्भिः कर्तव्यम् ।

हा कीदृशे कष्टे पतिताः व्याकुलीभूताः

कथम् शीघ्रमेवास्मान् सोऽनायासेनैव दुःखाम्बुधेः परं पारं नीतवान् । धन्यो गायत्र्या महिमा धन्या सन्ध्योपासना इति ब्रुवन् स वणिक् परमं हर्षमापेदे ।

वयन्तु इदमपि ब्रूमः सन्ध्योपासनं कुर्वाणा द्विजाः सन्ध्यायां स्वस्वाभीष्टदेवताः स्मरन्तु । सन्ध्योपासनेन सर्वा देवताः प्रसीदन्ति । सन्ध्योपासनं न कुर्वाणा ब्राह्मणा दैवं पित्र्यं कर्म कर्तुं नार्हन्ति । तत्कृतं कर्म न सिध्यति । न ते तत्कर्मफलभाजो भवन्ति । न च तत्कृतं पूजादि कर्म देवाः स्वीकुर्वन्ति—तदुक्तम्—

देवाश्च पितरश्चापि न गृह्णन्ति कृतार्चनम् । सन्ध्याहीनेन विप्रेण, तस्मात्सन्ध्या विधीयताम् । दृष्टः सन्ध्योपासनायाः

छोड़कर भक्तिपूर्वक उसका स्वागत करो और आतिथ्य सत्कार में कोई प्रमाद मत करो ।

हाय ! कैसे कष्ट में हम पड़ गए थे और व्याकुल हो रहे थे, किस तरह इस महात्मा ने हमको अनायास ही दुःखसागर से पार कर दिया, धन्य गायत्री की महिमा । धन्य ! संध्योपासना की महिमा । यह कहता हुआ बनिया अत्यन्त ही प्रसन्न हुआ ।

हम तो यह कहते हैं संध्योपासन करते हुए द्विज लोग अपने अपने अभीष्ट देवता का स्मरण करें क्योंकि संध्योपासन से ही सब देव प्रसन्न होते हैं । इसके न करने वाले ब्राह्मणादि दैव-पितर कर्म के योग्य नहीं होते और उनका किया कर्म भी सिद्ध नहीं होता और न उस कर्म का फल ही उन्हें मिलता है, न उसका किया हुआ पूजनादि देवता स्वीकार ही करते हैं । जैसा लिखा है । देव और पितर संध्याहीन ब्राह्मण की, की हुई पूजा स्वीकार नहीं करते इसलिए संध्या करनी ही चाहिए ।

बालको ! देखा तुमने संध्योपासना का प्रभाव, ऊपर के कथानक से अनुभूत किया गायत्री का प्रताप, यदि हाँ, तो आज से ही आप लोग भी संध्योपासना करना प्रारम्भ कर दें । गायत्रीमन्त्र का जप करना न छोड़ें । यह मन्त्र यज्ञोपवीत संस्कार में आचार्य (गुरु) से दिया जाता है । इसे विधि से ही प्राप्त करना चाहिए ।

प्रभावः । अनुभूतो गायत्र्याः प्रतापः उपरितनकथानकेन । यदि ओम् इत्युत्तरम् तर्हि अद्यप्रभृति भवद्भिः सर्वैरपि बालकैः सन्ध्योपासना प्रारब्धव्या । गायत्रीमन्त्रश्च जप्तव्यः अयं मन्त्रः उपनयनकाले गुरुणा (आचार्येण) दीयते, तद्विधिनैव लब्धव्यः । ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति--सुधा

अन्यमुखे दुर्वादो यः प्रियवदने स एव परिहासः।
इतरेन्धनजन्मा यो धूमः सोऽगुरुभवो धूपः ॥१॥

अपने से अपरिचित मनुष्यों के मुख से जो बात बुरी लगती है वही बात यदि अपने प्रिय (मित्र, सम्बन्धी) आदि से सुनी जाती है तो वह हंसी समझी जाती है (अपने प्रिय मनुष्यों के मुख से सुनी बात परिहास समझ कर मानी जाती है।) और लकड़ी के जलने से जो धूआं निकलता है वह धूआं, असह्य होता है किन्तु अगर के जलने से जो धूआं निकलता है, वह धूप समझा जाता है। आदरणीय है ॥१॥

अपि स्थितोऽभूत्। स हि महात्मानं दृष्ट्वैव अभर्त्सयत् "अयं दम्भी साधुः देशस्य पौष्टिकमन्नं भुक्त्वा प्रकामं पीनः, यतस्ततोपि विनैव शुल्कपत्रं यात्रां करोतीत्यादि।" एष साधून् यथेच्छमनिन्दत्, 'दूरमपसर' इति महात्मानं तिरस्करोति स्म। महात्मा न किञ्चित्प्रतिवादमकरोत्, केवलं स्मयते स्म।

तस्मिन्नेव समये यात्रापत्रपरीक्षकः प्रकोष्ठके तस्मिन् समायातः, सर्वेषां च शुल्कपत्राणि निरीक्षते स्म। तमेनं रेलकर्मचारिणं दृष्ट्वैव 'जैण्टिलमैन' महोदयो व्याकुल इवाऽभवत्। तस्य मुखं शुष्यति स्म। यथैव पत्रनिरीक्षणाधिकृतेन महोदयस्य यात्रापत्रं दिदृक्षितं तथैव महाभागस्याऽस्य दुर्दशाऽभवत्। एतावतैव महात्मना तेन प्रोक्तम्—'एतेषां यात्रापत्रं मत्समीपेऽस्ति, इदं गृह्यताम्।'

यथैव रेलकर्मचारिणा महात्मानं प्रति दृष्टिनिःक्षेपः कृतः तथैव तमेनं परिचित्य—सर्वमन्यद् विहाय बाबू-महोदयः स्वामिनश्चरणयोः प्राणमत्। स्वामिमहाभागं प्रथमश्रेणिप्रकोष्ठके नेतुं सविनयं प्रार्थयत। सर्वमिदं दृष्ट्वा नवशिक्षितमहोदयः सरभसमुत्थाय, सलज्जं न्यवेदयत्—'क्षम्यताम्। अहमतीव दुःखितो लज्जितश्चास्मि।'

स्मयमानेन महात्मना प्रोक्तम्—'प्रिय भ्रातः! का अत्र क्षमाप्रार्थनस्यावश्यकता। भवता को वाऽपराधो विहितः? एषा वर्तमानयुगस्य साधारणी परिस्थितिः। मयैव वा भवतः को वा उपकारः कृतो यदर्थं भवान् मां प्रति कृतज्ञो भवेत्? प्रत्युत अहं प्रसन्नोऽस्मि मम तुच्छा सेवा भवदर्थे विनियुक्ता। अयं किल मम सहजो धर्मः।'

महात्माजी को देखते ही धमकाया कि—'ये ढोंगी साधु देश का माल खाकर खूब मोटे हो गये हैं, जो इधर उधर बिना टिकिट ही घूमा करते हैं।' यों इनने साधु की खूब ही निन्दा की। 'यहां से तो दूर हट जाओ' यों तिरस्कार भी किया। महात्माजी ने इसका कुछ प्रतिवाद नहीं किया। केवल मन्द मन्द हंसते रहे।

इस ही समय टिकिटचैकर उस डब्बे में आया और सबके टिकिट देखने लगा। इस रेलकर्मचारी को देखते ही जैण्टिलमैन घबरा गये। उनका मुंह सूख गया। जैसे ही चैकर ने उन महाशय का टिकिट देखना चाहा, उनका हुलिया बिगड गया, दुर्दशा हो गई। इस ही अर्से में महात्माजी ने कहा कि—"इनका टिकिट मेरे पास है, इधर लीजिये।"

जैसे ही चैकरसाहब ने महात्माजी को देखा, वैसे ही उन्हें पहचान कर, सब कुछ छोड़ बाबू महोदय ने स्वामीजी के चरणों में प्रणाम किया। और स्वामीजी को फर्स्ट क्लास के कमरे में लेजाने के लिए बडी नम्रता से प्रार्थना की। यह सब कुछ देखकर नवशिक्षित जैंटिलमैन महोदय उठे, और बड़ी लज्जा से स्वामीजी से प्रार्थना की—'स्वामी क्षमा करें। मैं अत्यन्त दुखी और लज्जित हूं।'

महात्माजी ने हंसते हुए कहा कि—प्यारे भाई! इसमें क्षमा की क्या आवश्यकता है। आपने कौन सा अपराध किया है। यह तो वर्तमान युग की साधारण हालत है। मैंने ही आपका क्या उपकार किया है, जिसके लिए आप कृतज्ञ होते हैं। बल्के मुझे प्रसन्नता है कि मेरी तुच्छ सेवा स्वीकार की गई। यह तो मेरा सहज धर्म है।" ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[भारतीय स्वाधीनताक्रान्तेः (१६४२ई०) अवसरे स्थापितम्]

★ नयनाभिरामदृश्यैः ★ पुरस्कृतकथाभिः ★ रोमांचकारिघटनाभिः ओतप्रोतम्

★ हृदयग्राहिगाथा ★ मनोहरं मुद्रणम् ★ ज्ञानवर्धकं पारिवारिकं मनोरंजनम्

'देशमुख' हिन्दी साप्ताहिकम् प्रतिगुरुवासरमिदं पत्रं मानारणिकलेखैः, बालस्तभैः, चित्रैः, व्यङ्ग्यचित्रैः शब्द-चित्रैश्च सह चलचित्रदृश्यमयीं सामग्रीमुपहरति।

इदं भवत्परिवारस्य सर्वेभ्यः सदस्येभ्यो मनोरंजनसाधनानि समर्पयति, एतस्य साहित्यं भवतो ज्ञानं वर्धयति, भवतो जीवने नवीनमुत्साहं भरति, स्फूर्तिमानयति। बौद्धिक-राजनैतिक-आर्थिक-सामाजिकविचारान् द्रढयति।

अतएव-सर्वत्र 'देशमुख' साप्ताहिकं सम्मान्यते, प्रख्यायते च।

❀ त्वरितं पठन्तु

समस्तभारते सर्वाधिकविक्रयाय प्रमाणितं सचित्रं हिन्दी-साप्ताहिकम्

महाराष्ट्रराज्यस्यैकलं संध्याकालसमाचारदैनिकम्

देशमुख

[सामाजिकक्रांतेः सचित्रं साप्ताहिकम्]

'DESHMUKH'

(Social Revolutionery Hindi Weekly)

पोस्ट बाक्स ६०२६ Post Box 6029

बम्बई–१२ (भारत) Bombay–12 (India)

❀ इष्टमित्रान् पाठयन्तु

पञ्चशील का प्रबल प्रचारक !

एकवर्षस्य मूल्य	१०)
षण्मासानाम्	६)
पुस्तकालयेभ्यः	३)

लेखकेभ्याश्चित्रकरेभ्यश्च निःशुल्कम्

प्रति सप्ताहं १६ पृष्ठानि बृहदाकारे। एकप्रतेः २५ नवपणाः। विशेषांका वार्षिकं निःशुल्कम्

देशमुखं भवदीयपरीवारस्य बालवृद्धनरनारीमातृभगिनीप्रभृतीन् सर्वान् कुशलान् नागरिकान् निर्माति

देशमुखं भवतो मित्रं, परिवारसदस्यः, समयदर्शकश्च, समाजस्य समस्याः समादधाति।

"साप्ताहिक स्तम्भ"—बम्बई की रातें, देखी-सूनी बातें, कहो कैसे कही ? इनसे मिलिये, नई-पीढ़ी, मुस्कराहट का सेम्पुल, धरती गाती है, नये प्रकाशन, नवाब राजे-महराजे, श्रमिक-संगठन, विश्व एक नजर में, नेता के विचार, चित्र-कसौटी, शिक्षक-समाज, महिला जागरण, सितारों की कलम से, अर्ज करता हूँ, आपके पत्रों के उत्तर, देशमुख के साप्ताहिक चहरे, क्या खोया क्या पाया ! भारतीय मार्कीट व्यवसाय, पर्वत की वासनाएँ, अन्तराल की आत्मा (उपन्यास), वेश्यावृत्ति और उसका अन्त, कैसे हो ? नेहरू चाचा, परिवार विज्ञान के बढ़ते चरण, सयानों ने कहा, सम्पादक की डायरी, भूदान चर्चा कसौटी पर बापू ने कहा था ? अनमोल बोल, ये समाज के कोढ़, जलते पृष्ठ, ये अन्याय-अनाचार-उत्पीडन कैसा ? सफल जीवन की कुँजियां, ये पथभ्रष्ट ललनायें जब माता बनेंगी ? जाने-पहचाने-चेहरे, प्रेमकथा, मस्ती, कूटकथा, गूढ़जाल, रम्यकथायें, उन्माद, अजब कथायें, मील के खम्भे, स्वतन्त्रता के प्रहरी, भूत के गर्भ में छिपा इतिहास का एक पृष्ठ, घर-गृहस्थी की बातें।

★ एते भवतो रसिकप्रवृत्तिमुल्लासयिष्यन्ति, हृदयमाक्रन्दयन्ति, जीवनस्य विभिन्नावस्थानां दर्शनं कारयिष्यन्ति।

★★★ अद्यैव १०) शुल्कं प्रेषयित्वा देशमुखं पठत।

श्रीमान् वितरणनिर्देशकः, दैनिकदेशमुखम् (साप्ताहिकम्) पोस्टबाक्स-६०२६, बम्बई–१२ (भारत)

तडित्पत्रम्—'देशमुखी' बम्बई, Telegram : 'DESHMUKHI' Bombay.

सम्पर्क करें—पत्र विक्रेता, समाचार-प्रतिनिधि, फोटोग्राफर, विज्ञापन एजेंट, लेखकगण, चित्रकार,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

येन वीरवरेण्येन रक्षितं क्षत्रियव्रतम् ।
महाराणाप्रतापोऽयं प्रतापो भारतावनेः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वर्षम् १० | अष्टमाङ्कः | वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकप्र
चत्वारिंशत् नवपणाः (४० न

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताजे गुणकारी आँवलों से तैयार



वैद्यनाथ च्यवनप्राश के सेवन से फेफड़ों के विकार, कफ, खांसी, श्वास, (दमा), शारीरिक और मानसिक दुर्बलता, रक्तहीनता, कैल्शियम की कमी, स्वर-भंग, मन्दाग्नि, अम्लपित्त, कब्जियत आदि रोगों में तत्काल और आशातीत लाभ होता है।

यह बचपन, जवानी और बुढ़ापे में सब के लिये सदा सेवनीय रसायन है।

वैद्यनाथ

च्यवनप्राश

अष्टवर्गयुक्त

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

श्री वैद्यनाथ आयुर्वेद भवन प्राइवेट लि०

भारतीय-औषधानां सर्वाधिक

विश्वस्तं निर्माणकेन्द्र

श्री वैद्यनाथ

आयुर्वेद-भवन

(प्रायवेट लिमिटेड)

कलिकाता, पटना, झाँसी, नागपुरम्, इ

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु

भेषजानां सावधानतया, वैज्ञानिक

प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्ये

भेषजानीमानि लभ्यन्ते

राजस्थानस्य विक्रयकेन्द्राणि

कांसली आयुर्वेदिकस्टोर्स—जौहरी बाजार,

जोधपुर आयुर्वेदिकस्टोर्स—सराफा बाजार,

अजमेर आयुर्वेदिकस्टोर्स—स्टेशन रोड,

राजस्थान-मद्रास-मध्यप्रदेश सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारैः स्वीकृता—

विषय-सूची

क्र०सं०	लेखाः	लेखकाः	पृष्ठ सं०
१	सरस्वती-वन्दना	श्रीसुरेन्द्रप्रकाशजैन, हरदोई	१७६
२.	मीमांसादर्शनस्य संक्षिप्त-परिचयस्तदुपयोगश्च	श्रीगजाननशास्त्री, मुसलगांवकरः	१८०
३.	वेदस्य सर्वविद्यानिधानत्वम्	मुक्तरक्षशर्मा भारद्वाजः, जयपत्तनाभिजनः	१८३
४.	भारती-विजयम्	श्रीशठकोपः, विद्याप्रवीणः, आन्ध्राः	१८५
५.	जन्मान्तराणीव स्थानान्तराणि	श्रीगणेशरामशर्मा, झालावाड़	१९२
६.	जरत्कारुः	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	१९३
७.	सम्पादकीयम्	सम्पादकः	१९५
८.	अमृत-वाणी		
९.	ऋणाद् भयम्	कमलानाथशर्मा, जयपुरम्	१९८
१०.	सूक्तिसुधा	सम्पादकः	

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भाव्राढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | ज्येष्ठमासः, सं० २०१७ (जूनमासः सन् १९६०) | अङ्कः ८

सरस्वती-वन्दना

[ले० सुरेन्द्रप्रकाश जैन, हरदोई]

जय वर-वीणाधारिणि ! मातः ।
बुध-जन-हृदय-विहारिणि ! मातः ॥

पीत्वाऽमृतमपि सुर-वर-वृन्दम्
भवति पिपासु यदर्थममन्दम् ।
तव तच्चरण-कमल-मकरन्दम
अलिरिव पिबतु मनो मे मन्दम
नव-मधुरस-सञ्चारिणि मातः ॥

जगदिह विगलदश्रु - विह्वलताम
मनुते मे मानस – निष्फलताम् ।
तव हंसः स्वीकृत्य कुशलताम
कलयतु नित्यं मुक्ताफलताम
निज-जन-गुण-विस्तारिणि मातः ॥
जय वर - वीणाधारिणि मातः

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मीमांसादर्शनस्य संक्षिप्त-परिचयस्तदुपयोगश्च

[ले० श्रीगजाननशास्त्री मुसलगांवकरः एम० ए०, मीमांसावेदान्ताचार्यः]

विदितमेव सर्वेषां यदार्याणां परन्दैवतं श्रुतिः। श्रुत्यधीनश्च चतुर्णामपि पुरुषार्थानां धर्मार्थकाममोक्षाणां निधिः। नात्र केषामपि आर्याणां वैमत्यम्। स च पूर्वोत्तरभागत्वेन द्विधा विभक्तः। तत्रोत्तरभागे आरण्यकोपनिषदादिषु ज्ञानकाण्डम्। पूर्वभागे च कर्मसाधके मन्त्रब्राह्मणात्मके वेदे कर्मकाण्डम्। इत्थमत्रावधेयम्—'मन्त्रब्राह्मणयोर्वेदनामधेय'मित्युक्तदिशा मन्त्रब्राह्मणोभयात्मको वेदः कर्मोपासनाज्ञानप्रतिपादकः तत्र कर्मसाधिकानां श्रुतीनां विचाररूपो विभागः पूर्वकाण्डम्। तत्र पूर्वकाण्डे देवद्रव्योभयसाध्ययागादिकर्मनिरूपितम्। उपासनाज्ञानसाधिकानां श्रुतीनां विचाररूपो विभागो वेदान्तत्वेन प्रसिद्धः उत्तरकाण्डम्। ब्रह्मजीवयोरुपास्योपासकत्वदृष्टिरुपासना, जीवब्रह्मणोरभेद एवात्र ज्ञानम्। अलं प्रसंगपतितवर्णनेन, प्रकृतमनुसरामः।

पूर्वकाण्डे लोककल्याणाय परमकारुणिकया भगवत्या श्रुत्या विहितानि नानाविधानि यागसम्बन्धीनि विधानानि। तत्र तेषामर्थविचारे के विधयः? के चार्थवादाः? कथञ्च कर्म? तेषां शेषशेषिभावश्च कथं निर्णेयः? कश्च तेषामनुष्ठानक्रमः? के च कर्मसु अधिकारिणः? तत्र च केषां यागानां प्रकृतित्वं केषां च विकृतित्वम्? केषां क्वातिदेशो भवति केषां च न भवति? ऊहबाध तन्त्रप्रसंगाश्च कुत्राश्रयितव्याः कुत्र च नेति नानाविधाः प्रश्नाः समुद्भवन्ति। तान् समाधातुम् अन्यच्च वेदे पूर्वापरविरोधादिना वास्तवार्थे विचिकित्सायां प्रसक्तायां तद्वारणाय मीमांसाशास्त्रावतारः। तच्च (मीमांसाशास्त्रं) प्रथमतन्त्रशब्देन व्यवह्रियते।

महर्षेः जैमिनेः प्रागपि बहवो मीमांसाचार्याः समभूवन्निति जैमिनितन्त्रादेव ज्ञायते।

बादरायणः—१ 'औत्पत्तिकस्तु शब्दस्यार्थेन संबंधस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् १।१।५

आत्रेयः २—'निर्देशाद् वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः' ।६।१।२६

कार्ष्णाजिनिः ३—'सकुलकल्पस्यादिति कार्ष्णाजिनिरेकस्मिन्नसंभवात्' ।६।१।३५

बादरिः ४—'द्रव्यगुणसंस्कारेषु बादरिः' ।३।१।३

कामुकायनः ५—'तथा चान्यार्थदर्शनं कामुकायनः' ११।७।५७

लाबुकायनः ६—'विप्रतिषेधात्तु गुणयन्यतरः स्यादिति लाबुकायनः' ।६।७।३७

अतिशायनः ७—'सर्वेषां वैकमन्त्र्यमतिशायनस्य'

एवं सत्स्वपि बहूनामृषीणां मीमांसकत्वे जैमिनीयत्वमात्रख्यातौ कारणं महर्षेः कोऽपि गुणातिशयः।

जैमिनिप्रणीते मीमांसातन्त्रे २७४५ पंचचत्वारिंशदधिकसप्तविंशतिसूत्राणि। अधिकरणानाञ्च संख्या प्राय एकसहस्रमिता। विषयविभागदृष्ट्या तेषां सूत्राणां द्वादशभागाः कल्पिताः। तत्र ९०७ अधिकरणेषु कानिचित् पूर्वपक्षोत्थापकानि, कानिचित्सिद्धान्तप्रतिपादकानि। इत्थं द्वादशभिरध्यायैर्वेदार्थविचारोपयोगिसकलसिद्धान्तप्रतिपादनात् द्वादशलक्षणी पूर्वमीमांसा निगद्यते। अत्र लक्षणशब्देनाध्याय उच्यते।

एषु मीमांसासूत्रेषु प्रत्नादतिप्रत्नं शबरस्वामिभाष्यमुपलभ्यते। तदीया भाषा विचारसरणिश्च सरला। एतस्मादपि पुराणा अनेके भवदासभर्तृमित्रादयष्टीकाकारा आसन्निति कुमारिलभट्टप्रभृतीनां लेखाद् विज्ञायते। व्याकरणाचार्यस्य पाणिनेः कनीयसो भ्रातुरुपवर्षस्य वृत्तिरत्रासीदिति श्रूयते। भाष्यकारेण सरलत्वात् केषुचित्सूत्रेषु न किमप्यलेखि। ततः परवर्तिभिस्तानि सूत्राणि न धृतानीति कृत्वा सूत्रसंख्यायां पूर्वोक्तायां विनोदः समुत्पन्नः। समुपलभ्यते कुमारिलभट्टग्रन्थावलोकनेन। 'अतः परं भाष्यकारेण षट्सूत्राणि न लिखितानि'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सन्ति च जैमिनेः एवं प्रकाराणि अपि अनत्यन्त-सारभूतानि सूत्राणि' इति !

अस्य महात्मनो विषये किमपि श्रद्धास्पदमिति वृत्तन्नाद्यापि समुपलभ्यते । अस्ति च जनश्रुतिः—जैनकृतछलात् सुभीतेन आदित्यदेवेन शबरवेषं धृत्वाऽऽत्मा संरक्षित इति आदित्यदेव एव शबरस्वामिनाम्ना प्रसिद्धो लोके ।

तद्विषये ग्रथितमिदम्पद्यमप्युपलभ्यते—

ब्राह्मण्यामभवद् वराहमिहिरो ज्योतिर्विदामग्रणी
राजा भर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत् ।
वैश्यायां हरिचन्दवैद्यतिलको जातश्च शंकुः कृतः
शूद्रायाममरः षडेव शबरस्वामिद्विजस्यात्मजाः ॥

परं सबलप्रमाणानुपलंभान्नैतच्छ्रद्धार्हम्—

भाष्यकारात्परं जातयोः कुमारिलभट्टप्रभाकरयोर्मीमांसासिद्धान्तेषु यत्र तत्र विभेदो विचारसरणौ च प्रायो भिन्नः पन्थाः । केचित् प्रभाकरो भट्टपादानां शिष्य इति वदन्ति । परन्नात्र श्रद्दधते विचारचणाः । अलमनया विचारणया । प्रकृतमनुसरामः ।

अस्य च मीमांसाशास्त्रस्य धर्मो विषयः, अधीतवेदवेदाङ्गो धर्मजिज्ञासुरधिकारी, धर्मानुष्ठानेन स्वर्गप्राप्तिः प्रयोजनम्, अस्माच्छास्त्राद्धर्मबोधो भाव्य इति बोध्यबोधकभावसम्बन्धः । 'अथातो धर्मजिज्ञासे'ति तस्यादिमं सूत्रम् । अत्र 'अथ' शब्दो वेदाध्ययनानन्तर्यपरः । अतः शब्दो वेदाध्ययनस्य दृष्टप्रयोजनतां वक्ति । तथा च—अर्थज्ञानरूपदृष्टप्रयोजनाय वेदाध्ययनमतोऽध्ययनानन्तरं धर्मस्य विचारः (जिज्ञासा) कर्तव्येति सूत्रार्थः । ज्ञातुमिच्छा जिज्ञासा–ज्ञानेच्छा, सा न घटवत् क्रियते निर्मीयते वा । यथा घटो निर्मितेः करणस्य वा विषयो भवति, न तथा जिज्ञासा, सा तु स्वत एव उत्पद्यते । इच्छामात्रेण तस्या व्यापारागोचरत्वात् अनुष्ठानोपयोगिधर्मज्ञानासंभवाच्च जिज्ञासापदस्य विचारे लक्षणा । वेदाध्ययनानन्तरं तदर्थविचारः कर्तव्य इति भावः । 'अथातो धर्मजिज्ञासा' इति सूत्रे स्वतन्त्रमधिकरणमारब्धितम् । तच्च शास्त्रारम्भप्रतिज्ञाकरणं जिज्ञासाधिकरणमिति वा प्रोच्यते । अत्र धर्मपदमधर्मस्याप्युपलक्षणम् । अधर्मोऽपि हानाय जिज्ञासितव्यः । इत्थं स्वयं सूत्रकार एव मीमांसायाः प्रयोजनं धर्मज्ञानं ब्रवीति । भाष्यकारोऽपि 'धर्माय जिज्ञासा धर्मजिज्ञासा, सा हि तस्य ज्ञातुमिच्छा । स कथं जिज्ञासितव्यः ? को धर्मः, कथं लक्षणः. कान्यस्य साधनानि, कानि साधनाभासानि, किं परश्चेति' इत्याह । 'धर्मं प्रति हि विप्रतिपन्ना बहुविदः, केचिदन्यं धर्ममाहुः, केचिदन्यम् । तथाहि—विहितक्रियाजन्यः अपूर्वपदाभिधेयो लिङाद्यभिहितः कार्यनियोगाद्यपरपर्यायो धर्मः, एवं निषिद्धक्रियाजन्यस्तादृश एवाधर्मः इति प्राभाकराः । विहितनिषिद्धक्रियाजन्यावेव पुण्यपापापरपर्यायौ आत्मगुणाविति नैयायिका वैशेषिकाश्च । यागाद्यनुष्ठानजन्योऽन्तःकरणवृत्तिविशेष इति सांख्याः । ज्ञानान्तरेण ज्ञानान्तरजनिता वासना इति बौद्धाः । शरीरान्तरारम्भकान् परमाणुविशेषान् पुद्गलशब्दवाच्यान् धर्मशब्देनाभिदधति जैनाः ।

तथा चोक्तं भगवता वार्तिककृता—

अन्तःकरणवृत्तौ वा वासनायाञ्च चेतसः ।
पुद्गलेषु च पुण्येषु नृगुणेऽपूर्वजन्मनि ॥इति ।

'सोऽयमविचार्य प्रवर्तमानः कश्चिदेवोपाददानो विहन्येत, अनर्थं च ऋच्छेत् । तस्मात् धर्मो जिज्ञासितव्यः' इति च । एतेन विचारपूर्वकं निर्णयात्मकं धर्मज्ञानं मीमांसायाः फलमिति ज्ञायते ।

श्लोकवार्तिके च—

'स्थिते वेदप्रमाणत्वे पुनर्वाक्यार्थनिर्णये ।
मतिर्बहुविदां पुंसां संशयान्नोपजायते ॥
केचिदाहुरसावर्थः केचिन्नासावयं त्विति ।
तन्निर्णयार्थमप्येतत्परं शास्त्रं प्रणीयते ॥

तन्त्रवार्तिकेऽपि—'मीमांसा चापि वेदार्थतत्वनिर्णयकारणम् ।' इति । 'सर्वत्र हि एतत् विचार्यते किमिदं वाक्यमस्यार्थस्य प्रमाणमुतान्यस्येति' इति च । मीमांसा हि वाक्यशास्त्रम् । यथा व्याकरणं पदशास्त्रं, न्यायः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमाणशास्त्रं तद्वत्। प्राप्ताप्राप्तविवेकेन उद्देश्यविधेयभावं विचार्य वेदवाक्यार्थनिर्णयोऽस्मिन् शास्त्रे क्रियते। निर्णीते च वाक्यार्थे कर्तव्याकर्तव्यज्ञानं भवति। तदनया रीत्या कर्तव्यस्य धर्मस्य अकर्तव्यस्य चाधर्मस्य ज्ञानं मीमांसया भवति, इति धर्मज्ञानमेव मीमांसायाः प्रयोजनम् मीमांसाया मूलभूताः सिद्धान्ता यथा—१—जगतः पारमार्थिकत्वम्। अन्यथा स्वर्गपशुपुत्राद्यर्थं धर्मानुष्ठानासंभवः। उक्तं च श्लोकवार्तिके निरालम्बनवादे—

'प्रमाणत्वाप्रमाणत्वे, पुण्यपापादि तत्फलम्।
विध्यर्थवादमन्त्रार्थनामधेयादिकल्पना ॥१॥

सर्वेषु लक्षणेष्वेवं स्वप्रमाणगणैः स्थितिः।
वचनव्यक्तिभेदेन पूर्वसिद्धान्तपक्षता ॥२॥

कर्मभ्यः फलसंबंधः पारलौक्यैहलौकिके।
सर्वमित्याद्ययुक्तं स्यादर्थशून्यासु बुद्धिषु' ॥३॥

'स्वप्नादि भोगवच्चापि योगभोगत्वकल्पना।
तन्निवृत्यर्थमेवेह परमार्थे प्रयत्यते ॥११॥

न हि स्वप्नसुखाद्यर्थं धर्मे कश्चित् प्रवर्तते।
यादृच्छिकत्वात्स्वप्नस्य तूष्णीमास्येत पण्डितैः ॥१२॥

परमार्थफलावाप्तिमिच्छद्भिस्तेन यत्नतः।
प्रतिपत्तिर्विधातव्या युक्तिभिर्बाह्यवस्तुषु' ॥१३॥

बृहतीकारेणापि, औत्पत्तिकसूत्रान्ते उक्तम्—"यद् उक्तमहङ्कारममकारौ अनात्मनि आत्माभिमानौ' इति मृदितकषायाणामेवैतत् कथनीयं, न कर्मसंगिनामित्युपरम्यते। आह च भगवान् द्वैपायनः—'न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्' इति रहस्याधिकारे ॥इति।

२—किञ्च—शब्दस्य अर्थेन सम्बन्ध औत्पत्तिकः स्वाभाविकः अनादिः। ३—जीवात्मा स्थूलदेहभिन्नः परलोकगामी कर्ता भोक्ता नित्यः। ४—शब्दो वर्णात्मकः। वर्णा नित्या व्यापका ध्वनिव्यंग्याः। वाक्यं क्रियाप्रधानम् अर्थबोधकम्। ५—वेदराशिः अनादिर्नित्यो, न केनचिदपि कृतः। ६—वेदस्य स्वतः प्रामाण्यम्। इति मूलभूताः सिद्धान्ताः। ते च प्रथमे तर्कपादे सूत्रभाष्यवार्तिककारैः प्रतिपादिताः, तानाश्रित्य सर्वा मीमांसा प्रवर्तते।

अस्या मीमांसाया उपयोगस्तु भूयान् प्राचीनशास्त्राभ्यासकानां विदुषामाधुनिकानाञ्च। न्यायालयगतानां च प्राचीनधर्मशास्त्रादिवाक्यार्थविचारकाले विना मीमांसां सङ्कटमेवापतति। वेदान्तशास्त्रीयाणां धर्मशास्त्रीयाणां च ग्रन्थानामभ्यासो विना मीमांसां पदे पदे एव प्रस्खलति। भूयिष्ठान् हि मीमांसासिद्धान्तानाश्रित्य आकरग्रन्थाः प्रवर्तन्ते। 'संयोगपृथक्त्वन्यायेन, ग्रहैकत्वन्यायेन, बलाबलाधिकरणन्यायेन, अङ्गगुणविरोधन्यायेन', इत्यादिना हि मीमांसान्यायान् तत्र तत्रोदाहरन्ति। अपरञ्च—मीमांसा वाक्यशास्त्रत्वात् पदशास्त्रवत् प्रमाणशास्त्रवच्च सर्वोपकारिणी। सर्वो वाग्व्यवहारः उच्चारणरूपो लेखरूपश्च वाक्यात्मक एव। वाक्यार्थश्च उद्देश्यविधेयभावादिविचारं विना न ज्ञातुं शक्यते। वाक्यार्थनिर्णयश्च विना मीमांसां न सिध्यति। ततश्च निर्णीतवाक्यार्थज्ञानाय वेदानुसारिणां मीमांसैवोपयुज्यते। न केवलं वेदानुसारिणामेव किन्तु तदितरेषामपि शब्दान्तरेण प्रकारान्तरेण वा वाक्यमीमांसयैव वाक्यार्थनिर्णयो भवतीति न विवादः। यद्यपि जैमिनिमीमांसा धर्ममीमांसा, धर्मश्च वेदार्थ इति तत्तदधिकरणेषु वेदवाक्यान्येवोदाहृत्य श्रुतिलिङ्गवाक्यादिभिरुपस्कृत्य प्राप्ताप्राप्तविवेकेन उद्देश्यविधेयभावं निर्णीय इतरवाक्यविरोधेन वाक्यार्थं निर्णयति मीमांसा, तथापि वेदवाक्यार्थनिर्णयसाधकन्यायैरेव स्मृतिपुराणेतिहासकाव्यनाटकाख्यानकाख्यायिकाकथासरित्सागरादिकं सकलमेव गीर्वाणवाणीगतं वाङ्मयं लोकभाषामयं चापि नानाविधं वाङ्मयं विचारगोचरीकर्तुं ज्ञातुं निर्णेतुं शक्येनेति नाश्चर्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधानत्वम्

पूर्वानुवृत्तम्— मान्याः श्रीमोतीलालशर्माणः, मानवाश्रम, दुर्गापुरा

वेदे प्रतिपादिता सेयं विश्वविद्या आधिदैविकी विद्या, आधिभौतिकी विद्या, आध्यात्मिकी विद्या, आधियाज्ञिकी विद्या, आधिनात्त्रिकी विद्या-इत्येवंरूपेणानेकधा विभक्ता द्रष्टव्या । वस्तुतस्त्वासां सर्वासां खण्डविद्यानां ब्रह्म-यज्ञ-विद्ययोरेवान्तर्भावः । मूलविद्या ब्रह्मविद्या, तूलविद्या तु यज्ञविद्या । मौलिकतत्त्वनिरूपणात्मकं शास्त्रं ब्रह्मविद्याशास्त्रम्, यौगिकतत्त्वनिरूपणात्मकं शास्त्रञ्च यज्ञविद्याशास्त्रम् । यज्ञविद्या विश्वविद्या, ब्रह्मविद्या त्वात्मविद्येति विद्यापदार्थविवेकः । ब्रह्मणि यज्ञः प्रतिष्ठितः, यज्ञाधारे च ब्रह्म विकसितम् । योऽयं विद्याविभागः पाश्चात्यविज्ञाने फिजिक्स-केमेस्ट्री-शब्दाभ्यां प्रसिद्धः, सोऽयमेव विद्याविभागो विज्ञानकाण्डेऽस्माकं ब्रह्म-यज्ञशब्दाभ्यां प्रतिपादितः । येभ्यो हि मौलिकेभ्यस्तत्वेभ्यो रासायनिकसम्मिश्रणद्वारा कश्चिदपूर्वो भाव उत्पद्यते, सोऽयं यज्ञपदार्थः केमेस्ट्री । मौलिकतत्वसंघातश्च ब्रह्मपदार्थः—फिजिक्सः । यज्ञश्चायं ब्रह्मणि प्रतिष्ठित इत्युक्तं प्राक् । अतएव यज्ञविज्ञानतः पूर्वं ब्रह्मविज्ञानमावश्यकम् । तस्यैतस्य ब्रह्मविज्ञानस्य निरूपणात्मकं शास्त्रं ऋग्वेदे मौलिकतत्त्वानामेव प्राधान्येन निरूपणमिति न न विदितं तद्विदाम् । यजुर्वेदस्तु यज्ञविद्याशास्त्रम् । यज्ञादेव सर्वे पदार्था आधिदैविकाधिभौतिकाध्यात्मिकाः समुत्पन्नाः, समुत्पद्यन्ते, समुद्भविष्यन्तीत्युक्तं यज्ञशास्त्रे—

यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि
प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः
सन्ति देवाः ॥१॥—यजुः संहिता ३१।१६

स्मृतिरप्याह—

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥२॥
—गीता ३।१०।

द्वौ पदार्थौ, बहवो वा एकत्र सम्भूय चितिसम्बन्धाख्येनान्तर्य्यामसम्बन्धेन यज्ञस्वरूपं निष्पादयन्ति । यथाहि-अम्भः-पवमानाख्ययो-(हाईड्रोजनाक्सिजनपदार्थयो)श्चितिसम्बन्धात् स्थूलाः पेया आप उत्पद्यन्ते । यथा वा शुक्रशोणितसमन्वयात् प्रजास्वरूपनिष्पत्तिः । गोमयकेलपत्ररसयोः सम्मिश्रणात् वृश्चिकोत्पत्तिः । अब्वाय्वोः संयोगात् फेनोद्भवः । शरीराग्नि-याम्यवाय्वोः संघर्षात् स्वेदप्रसारः । अस्मिन् यज्ञसम्बन्धे रासायनिकसम्मिश्रणात्मके प्रत्येकदशायां द्वौ पदार्थौ नितान्तमपेक्षितौ । तयोश्चैको भावः—अन्नादाख्यः, द्वितीयश्चान्नाख्यः । अन्नादो हि अग्निः, अन्नं च सोमः—इति हि वैदिकी सामान्या परिभाषा । अग्निर्दाहकः, सोमो दाह्यः । अग्नौ सोमाहुतिर्यज्ञ इति हि यज्ञनिष्कर्षः । सत्स्वप्यनेकेषु पदार्थेषु अग्नि-सोमयोरेव सर्वेषामन्तर्भावः । उष्णाः-शीताः-अनुष्णाशीताः-इति कृत्वा त्रिविधा एव सर्वे पदार्थाः । तेषु-उष्णास्तावदग्नावन्तर्भूताः, शीताश्च सोमे, अनुष्णाशीताश्च उभयोरिति-अग्नीषोमाभ्यामेवेदं जगद् व्याप्तम् । 'अग्नीषोमात्मकं जगत्' इति हि जाबालोपनिषत्सिद्धान्तः । तमेतं सर्वत्र सामान्यरूपेण व्याप्तमग्नीषोमविज्ञानं प्रतिपादयन्नाह वाजिश्रुतिः—

"द्वयं वाऽइदं न तृतीयमस्ति—आर्द्रं चैव, शुष्कञ्च । यच्छुष्कं तदाग्नेयम् । यदार्द्रं—तत् सौम्यम् । अथ यदिदं द्वयमेवाप्यं, किमेतावत् क्रियत इति । अग्नीषोमयोरेवाज्यभागौ, अग्नीषोमयोरुपांशुयाजः, अग्नीषोमयोः पुरोडाशः××× अग्नीषोमयोर्ह्वैतावती विभूतिः प्रजातिः" ।

—शतपथब्राह्मणे

स एष अन्नादोऽग्निर्ब्रह्म । सोमस्तु यज्ञसाधकत्वात्-'तात्स्थ्यात्ताच्छब्द्यमि' ति न्यायतो यज्ञः अग्न्याधारे सोमप्रवृत्तिरिति ब्रह्माधारे यज्ञप्रवृत्तिर्सिद्धा । योनिर्हि अग्निः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेतो हि सोमः । प्रतिष्ठिता हि योनिः, गतिमद्धि रेतः । प्रतिष्ठितं हि ब्रह्म, संचरणशीलो हि यज्ञः । स एष अग्निरेव वेदस्य वेदभावः, वेदपदार्थो वा । त्रिविधा हीमे लोके भावा विद्यन्ते, निविडावयवाः, तरलावयवाः, बाष्पावयवाः-इति । तत्र घनभावा आग्नेयाः, तरलभावा वायव्याः, विरलभावाश्चैन्द्राः सौरा वा । घनावस्थापन्नोऽग्निः पार्थिवः, तरलावस्थापन्नोऽग्निर्वायुविधः—अन्तरीक्ष्यः, विरलावस्थापन्नोऽग्निरादित्यविधो दिव्यः । अग्नि-वाय्वा-दित्य-ब्रह्माणि एव यज्ञस्वरूपसमर्पकानि । अग्निस्तत्र पार्थिवो ऋग्वेदस्य प्रतिष्ठाभूमिः, वायुरान्तरीक्ष्यो यजुर्वेदस्य, दिव्य आदित्यः साम्नाम् । आधिदैविकेऽस्मिन् वितानयज्ञे अग्निर्होता-हौत्रकर्म्माध्यक्षः । वायुरध्वर्युराध्वर्यवकर्म्माध्यक्षः । आदित्य उद्गाता औद्गात्रकर्म्माध्यक्षः । चतुर्थलोकाधिष्ठाता सोमस्त्वथर्वा ब्रह्मा ब्राह्मकर्म्माध्यक्षः । त एतेऽग्निवाय्वादित्यचन्द्रमसो देवास्त्रयीवेदं पुरस्कृत्य सोमाहुत्या विश्वयज्ञं सर्वहुतनामकं निष्पादयन्ति । तदेतत् सर्वं यज्ञरहस्यमभिलक्ष्यैव भगवान् मनुराह—

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥

—मनुः १।२३।

स्पष्टं चेदं यज्ञरहस्यं शाङ्खायनब्राह्मणस्य षष्ठाध्याये, दशमब्राह्मणे । तथाहि—

"प्रजापतिस्तपोऽतप्यत । स तपस्तप्त्वा प्राणादेव-इमं लोकं प्राबृहत् । अपानादन्तरिक्षलोकं, व्यानादमुं लोकम् । स एतांस्त्रीँल्लोकानभ्यतप्यत । सोऽग्निमेवास्माल्लोकादसृजत, वायुमन्तरिक्षलोकात्, आदित्यं दिवः । एतानि त्रीणि ज्योतींष्यभ्यतप्यत । सोऽग्नेरेवर्चोऽसृजत, वायोर्यजूंषि, आदित्यात् सामानि । स एतां त्रयीं विद्यामभ्यतपत । स यज्ञमतनुत । स ऋचैवाशंसत, यजुषा प्रातरत्, साम्नोदगायत् । अथैतस्या एव त्रय्यै विद्यायै तेजो रसं प्राबृहत्,-एतेषामेव वेदानां भिषज्यायै । स भूरित्यृचां प्राबृहत्, भुव इति यजुषां, स्वरिति साम्नाम् । तेन दक्षिणतो ब्रह्मासीत् । तस्य दक्षिणतो वर्षीयानुदीचीनप्रवणो यज्ञः संतस्थे । तस्य ह वै दक्षिणतो वर्षीयानुदीचीनैव प्रवणो यज्ञः संतिष्ठते-यस्यैवं विद्वान् ब्रह्मा भवति ।"

—शाङ्खायनब्राह्मणे ६।१०।

देवताविज्ञानमनु-एकस्यैवाग्नेस्तिस्रोऽवस्था अग्निश्च, वायुश्च, आदित्यश्चेति । भूपिण्डकेन्द्रस्थः प्राणाग्निरमृताग्निरेव रसरूपेणोर्ध्वं गच्छन्-अवस्थातारतम्यात् त्रिधा विभक्तो जायते । अतएव—"अग्निपुरोगाः सर्वे देवाः प्रीयन्ताम्"—"अग्निमुखा वै सर्वे देवाः"—"अग्निः सर्वा देवताः" इत्यादि निगमाः संगच्छन्ते । रसाग्निरेवावस्थाविशेषनिबन्धनादग्निश्च भवति, वायुश्चेन्द्रश्चेत्याह वाजिश्रुतिः—

"आपो वा अर्कः । तद्यदपां शर आसीत्—तत् समहन्यत । सा पृथिव्यभवत् । तस्यामश्राम्यत् । तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्त्ताग्निः । स त्रेधात्मानं व्यकुरुत-आदित्यं तृतीयं, वायुं तृतीयम् । स एष प्राणः (प्राणाग्निः) त्रेधा विहिताः-" (शत० १० का० ६।६।२-३-) ।

अत एव वेदत्रय्यामग्निनैवोपक्रमो दृश्यते । यथापि-'अग्निमीले पुरोहितं होतारं रत्नधातमम्' इति ऋग्वेदोपक्रमः । 'अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्' इति यजुर्वेदस्य । 'अग्न आयाहि वीतये गृणानो हव्यदातये' इति सामवेदस्य । ऋचां प्रतिष्ठाभूतस्य पार्थिवाग्नेरस्मदपेक्षया पुरोऽवस्थितत्वात्, तत् प्रधानाग्नये 'पुरोहितम्' इत्युक्तम् । वायुमयाग्निरेवान्नपतिरान्तरीक्ष्यः । 'वायुर्वै वृष्ट्या ईशे', वृष्टेरन्नम् । ततः प्रजाः । अतश्च तत्प्रधानाग्नये वायुविधाय 'अग्ने व्रतपते' इत्युक्तम् । दिव्योऽग्निरादित्यो भूपृष्ठादतीव विप्रकृष्टतमः । यो हि विप्रकृष्टो भवति, तस्यैवाह्वानं सम्भवति अतएव विदूरस्थिताय दिव्याग्नये—'अग्न आयाहि' इत्युक्तं सङ्गच्छते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती-विजयम्

[ले० शठकोपः, विद्याप्रवीणः, आन्ध्राः]

प्रथमं दृश्यम्

[ब्रह्मलोकात् द्राविडी, आन्ध्री, उत्कली, वङ्गी, हिन्दी, गुर्जरी प्रभृतयः सोदर्यः स्वस्ववेषभूषादिभिः क्रीडासक्तया भूलोकम् आगत्य विहरन्ति]

(यष्टिनृत्यगीतम)

आयाहि सोदरि क्रीडिष्यामो
वयमानन्दसागरे मज्जिष्यामः ।

भारत देशाख्यमुद्यानमिद-
मस्मत्पित्रा विनिर्मितं पश्य सखि ।। (आया)

गङ्गा गोदावरी कावेरी नदीषु
स्वेच्छया जलकेलिं करिष्यामः ।

हिमाद्रिकुञ्जेषु समुद्रतीरेषु
क्रीडिष्यामश्चिरं निवत्स्यामः ।। (आया)

हिन्दी— रम्यमिदं पुण्यक्षेत्रं वाराणसीनामधेयं गङ्गातीरे पश्य ।

उत्कली— समुद्रतीरे च जगन्नाथधाम रम्यं सर्वसाम्य मिदं पश्य ।। (आया)

द्राविडी— सुन्दरं श्रीरङ्गमन्दिरमिदमहो वृन्दारकपुरमिवाऽऽभाति ।

आन्ध्री— सप्तशैलीक्षेत्रमिदं श्रीनिवाससन्निधानं तिरुपतिं पश्य ।। (आया)

द्राविडी— सोदर्यः ! भूलोकम् आगत्य सुमहान् कालः यापितः अस्माभिः । तत् आगच्छत अस्मल्लोकं गच्छेम ।

आन्ध्री — सोदरि ! भूलोकदर्शनानन्तरं ब्रह्मलोकः न मे रोचते । अहम् अत्रैव कृष्णा-गोदावरी-परिसरप्रान्ते निवसितुम् इच्छामि ।

द्राविडी— ममापि कावेरीतीरोपान्ते एव निवसितुं मनः धावति । किन्तु माता कुप्येत् इति बिभेमि ।

वङ्गी— किमर्थं भीतिः ? गत्वा मातरमेव प्रच्छामः । आज्ञयैव वयम् अत्र स्वाभिमतप्रदेशेषु निवत्स्यामः । को दोषः ?

अन्याः— साधु । समीचीनः अभिप्रायः । तर्हि सत्वरं प्रस्थीयताम् । इदानीं सुमहान् समयः अतिक्रान्तः (सर्वाः निष्क्रान्ताः)

(यवनिका)

द्वितीयं दृश्यम

[स्थानम्—ब्रह्मलोकः । ब्रह्मा पद्मासने उपविश्य सामगानं करोति । सरस्वती पार्श्वे उपविश्य वीणां वादयति]

तस्यैतस्याग्नेस्त्रैविध्यादेव विश्वविद्या, विश्वविज्ञानं वा त्रिधा विभज्यते-अग्निविज्ञानम्, वायुविज्ञानम्, आदित्यविज्ञानञ्च । तत्राग्निविद्या पार्थिवी-आधिभौतिकी । आदित्यविद्या दिव्या-आधिदैविकी । वायुविद्या-आन्तरीक्ष्या आधियाज्ञिकी इति । मध्यस्थो वायुरेवाग्न्यादित्ययोर्यजनात् यज्ञं वहति, यजुःप्रधानत्वात् । समष्ट्या च आध्यात्मिकविद्यायाः स्वरूपं निष्पद्यते । तदित्थं **'चतुष्टयं वा इदं सर्वम्'** इति-कौषीतकिश्रवणात्-अनन्ताः खण्डविद्या विद्याचतुष्टय्यामेवान्तर्भूता इत्यवगन्तव्यम् । पाश्चात्यविदुषां कृते तु यज्ञविद्याया आधिभौतिकविज्ञाने-एव समावेशः । तेषाञ्चेदं 'मेटीरियलसायन्स' भिधं विज्ञानं **आधिभौतिकविज्ञानं, आध्यात्मिकविज्ञानं, आधिदैविकविज्ञान**, मित्येवं विभक्तं द्रष्टव्यम् । तान्येवैतानि त्रीणि विवर्त्तानि पदार्थविज्ञानं, शारीरिकविज्ञानं, **ताराविज्ञान**, मित्येवं क्रमेण प्रसिद्धानि तत्र विज्ञानकाण्डे । सर्वाप्यन्या विद्या अग्नि-वाय्वादित्येष्वन्तर्भूता अन्ततो वेदमूला एव विस्पष्टं-वेदस्य सर्वविद्यानिधानत्त्व' मिति । —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मा— ओं अग्न आयाहि वीतये।
गृणानो हव्यदातये।
निहोता सत्सि बर्हिषि।
ओं शान्तिः शान्तिः शान्तिः॥

सरस्वती— नाथ! भवता सृज्यमानानां जीवानाम् अन्ते कीदृशी दशा भवेत्?

ब्रह्मा— प्रिये! ते जीवाः बहूनि जन्मानि प्राप्य अन्ततः ब्रह्मज्ञानं सम्पाद्य मामेव प्राप्नुयुः।

सरस्वती— तेषां ब्रह्मज्ञानं कस्मिन् जन्मनि कथं सम्भविष्यति?

ब्रह्मा— मानवजन्मन्येव ब्रह्मज्ञानं सम्पादयितुं शक्नुवन्ति जीवाः। तदर्थमेव चत्वारो वेदाः मया उपदिष्टाः। एतेषां वेदानाम् अध्ययनेन तदुदितकर्मानुष्ठानेन च जन्तूनां मुक्तिः भविष्यति।

सरस्वती— मानवेषु ब्रह्मज्ञानं विहाय भौतिकज्ञानमेव यदि केचन आश्रयिष्यन्ते, तथा प्रचारयिष्यन्ति चेत् तदा मुक्तिः कथं भवेत्?

ब्रह्मा— अतएव भारतदेशः मया सृष्टः। तत्र ये जनाः जनिष्यन्ति ते सर्वदा आध्यात्मिकचिन्तापरायणाः भवेयुः। मुक्तिं च प्राप्नुयुः।

सरस्वती— तर्हि तत्र जनानां ब्रह्मज्ञानोपदेशं के कुर्युः?

ब्रह्मा— तदर्थमेव खलु मन्त्रद्रष्टारः सृष्टाः। ते सर्वम् उपदेक्ष्यन्ति।

सरस्वती— सत्यमेव। किन्तु मन्त्रद्रष्टारः प्रौढवाचः खलु। तेषां भावः सर्वेषां कथम् अवगतो भवेत्? न हि सर्वे समानधीशक्तयः दृश्यन्ते!

ब्रह्मा— वाचाले? एतदर्थं चिन्तयसि वा? ननु वर्तन्ते खलु अस्मद्दुहितरः द्राविडीप्रभृतयः। ताभिः शक्यते।

द्राविडीप्रभृतयः—(प्रविश्य) अम्ब अम्ब! अद्य वयं चिरं विहृत्य श्रान्ता अभवाम।

सरस्वती— दीर्घमायुरस्तु। आगच्छत वत्साः आगच्छत। इदानीमेव युष्माकं प्रसङ्गः प्रसक्तः। एतावत्पर्यन्तं कुत्र आस्त यूयम्?

आन्ध्री— अम्ब! अद्य वयं क्रीडाशक्त्या भूलोकम् आगच्छाम। अम्ब! भूलोके रमणीयः कश्चन देशः भारतदेशाख्यः अवलोकितः। तं देशम् उज्झित्वा आगन्तुम् अस्माकम् इच्छैव नासीत्। द्राविडीसोदर्याः निर्बन्धेन वयम् आगताः।

वङ्गी— सत्यमेव अम्ब! अस्माकं सर्वासामपि मनः तत्रैव रमते।

उत्कली— तथापि तव आज्ञां विना कथं निवसेम?

हिन्दी— अतः तव आज्ञां वयं प्रार्थयामहे।

सरस्वती— किमेतत्? युष्माकं मतिः भ्रान्ता वा? स्वैरविहारः अनुचितः।

ब्रह्मा— प्रिये! मा मैवम्। यदा कदा वा यस्मै कस्मैचित् कन्याः दातव्याः एव खलु। स्वयमेव एताः स्वाभिमतं (वरं) देशम् अन्वेषयन्ति। स्वयंवरविधानम् अनवद्यमेव खलु। मा निरोधयेः वत्सानां आशाम्। आवाभ्यामपि अङ्गीकर्तव्यमेव।

सरस्वती— यद्भवते रोचते। वत्साः यूयं गत्वा युष्माकं अभिमतं देशं वृणीध्वम्। तत्र परस्परं स्नेहभावेन वर्तितव्यम्। कदापि युष्माभिः कलहो न कर्तव्यः। ज्ञातं वा?

द्राविडीप्रभृतयः—तथैव अम्ब। (परस्परमवलोक्य) अस्माकं अम्बा अतीव उत्तमा।

ब्रह्मा— वत्साः! तत्र गत्वा यूयं केवलं विहारकेलिमेव न कुर्यात। गद्यपद्यात्मकैः पामरजनैरपि अवगन्तुं शक्यैः युष्मन्मृदुवाक् प्रबन्धैः सर्वेभ्यो जनेभ्यः अस्मदीयं तत्त्वं बोधनीयम्। स्वसंस्कृतिः कदापि न त्यक्तव्या। भिन्नसंस्कृतीनां सख्यं न कर्तव्यम्। अन्यथा स्वरूपनाशः एव सम्भवेत्। ज्ञातम् वा?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाः— तथैव पितृदेव । वयं गच्छामः भारतदेशम् । अनुज्ञा दीयताम् ।

ब्रह्मा, सरस्वती—शुभं भूयात् । (सर्वाः निष्क्रान्ताः)

(यवनिका)

तृतीयं दृश्यम्

[स्थानं- पूजामन्दिरम्–समयः–सरस्वतीपूजादिनम्]

हिन्दी— सोदर्यः, आगच्छत आगच्छत । अद्य मूलानक्षत्रम् । अस्मन्मातुः भारत्याः पूजादिनं खलु । उपानयत पूजोपकरणानि ।

द्राविडी— वयमपि सिद्धाः स्मः । इदं मातुः चित्रपटम् । इमानि पूजोपकरणानि । सर्वाः उपविशत । (सरस्वतीचित्रपटं पुरो निधाय पूजां नाटयन्ति)

गीतम्—(रागः–हंसानन्दी)

जननि सरस्वति निखिलगुणवति
पालय सन्ततिं तव हे भारति (जननि)
वीणापुस्तकशोभितहस्ते
भगवति भारति देवि नमस्ते (नमस्ते)
ब्रह्ममुरारिपुरारिसमर्चिते
देहि शुभं जगदम्ब विधिहिते (जननि)

(ततः प्रविशति स्ववेषेण आङ्गली)

आङ्गली—ओ आई सी । अयमेव भारतदेशो नाम । न कोऽपि दृश्यतेऽत्र । (पुरोवलोक्य) का एताः ? किं वा कुर्वन्ति ? भवतु, समीपं गत्वा ज्ञास्यामि । (समीपं उपसृत्य) मै डियर फ्रैंड्स ! का यूयम् ?

द्राविडी— (विलोक्य) का त्वम् ? किमावश्यकं ते ?

आङ्गली—आई एम् आङ्गली । अहं केनचित् 'बिसनस' उद्देश्येन आगता । का पूजा इयम् ?

आन्ध्री— या काऽपि पूजा । तव किं ज्ञातेन ? कथय किं आवश्यकं ते ।

आङ्गली— अहं युष्माकं 'फ्रण्डषिप' वाञ्छामि । (इति वदती सपादत्राणं पूजामन्दिरं प्रवेष्टुं प्रयतते)

वङ्गी, हिन्दी-हाँ, हाँ किमेतत्, तव बुद्धिः अस्ति वा न वा ? किं अन्धा त्वम् ? पवित्रं पूजामन्दिरं सपादत्राणा प्रविशसि कथम् । बहिरेव तिष्ठ । भिन्नसंस्कृतीनां अत्र प्रवेशः निषिद्धः ।

अन्याः— भद्रे ! बहिस्तिष्ठ बहिस्तिष्ठ ।

आङ्गली— 'प्लीज् डोण्ट् बि एङ्ग्रि ।' युष्मत्संस्कृतिं अज्ञात्वा एवमाचरितं मया । अथवा युष्मत्पूजामन्दिरे मम किमस्ति कार्यम् ? बहिरेव स्थित्वा युष्मान् किञ्चित् प्रार्थये । प्रसीदत ।

द्राविडी— सोदर्यः ! इयं अतीव विनयवतीव भासते । शृणुमः तस्याः प्रार्थनाम् । कथय सखि कथय ।

आङ्गली— डियर फ्रण्ड्स ! अहं वाणिज्योद्देश्येन आगता अस्मि ! अत्र यत्र कुत्रापि स्वल्पं स्थलं यदि प्रसादयिष्यथ महत् उपकृतं स्यात् । चिरं कृतज्ञा च भवेयं युष्माकम् । वाणिज्यानन्तरं युष्माकं स्थलं शून्यीकृत्य गमिष्यामि । वाट डू यू से ?

द्राविडी— सोदर्यः ! इयं किमपि वाणिज्यं कर्तुम् आगता । निवसतु अत्र समुद्रतीरे शून्यप्रदेशे । वाणिज्यानन्तरं गमिष्यति खलु ।

वङ्गी— 'सूचीप्रवेशे मुसलप्रवेशः ।' इत्युक्तं महद्भिः । नेदं मह्यं रोचते । तदा अस्मत्पिता यत् अवदत् स्मरसि वा ?

द्राविडी— स्मरामि । किन्तु अतिथिपूजा कर्तव्या खलु ।

अन्याः— तथा चेत् तव इच्छानुरूपं कुरु ।

द्राविडी— सखि आङ्गलि ! अत्र समुद्रतीरे निवासं परिकल्प्य तव वाणिज्यं प्रचालय ।

आङ्गली— मेनि मेनि थैङ्क्स । (स्वगतम्) अहो रमणीयः प्रदेशः । एताः सर्वाः विभिन्नप्रान्ताश्रिताः अपि एकसंस्कृतिमत्यः । भवतु कथमपि आसु भेदं परिकल्प्य यथा मम पुत्राः इमं देशं सर्वम् आक्रामेयुः तथा विधा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यामि । (आलोच्य) आम् । वाणिज्यमिषेण अत्रैव समुद्रतीरे दृढं दुर्गं निर्माय सायुधान् मम पुत्रान् सज्जीकरिष्यामि (इति निष्क्रान्ता)

द्राविडी—सोदर्यः ! पूजा समाप्ता । मातुः प्रसादं स्वीकृत्य स्वस्वस्थानं गमिष्यामः

सर्वाः— (प्रसादं स्वीकृत्य) वयं गच्छामः सोदरि । (सर्वाः निष्क्रान्ताः)

(यवनिका)

चतुर्थम् दृश्यम्

आङ्गली— (प्रविश्य स्वागतम्) दिस इज वेरी गुड ऐडिया (इति छोटिकां ददाति)

द्राविडी— (प्रविश्य) कथं सखी आङ्गली ? सखि स्वागतं ते । चिरात् वाणिज्यार्थं आन्ध्रीप्रभृतयः दृष्टाः वा ? किं अवदन् ताः ?

आङ्गली— नान् सेन्स । आन्ध्रीप्रभृतयः सोदर्यः इति नन्दसि त्वम् ? परं तु एकदा मया सह भाषमाणा आन्ध्री त्वां अनिन्दत् ।

द्राविडी— मम स्वसा आन्ध्री मां निन्दति वा ? नाहं विश्वसितुं शक्नोमि ।......अस्तु, किमिति निन्दति सा ?

आङ्गली—सा वदति—"मम स्वसा द्राविडी किमपि न जानाति । "साम्बार" एव जानाति" इति ।

द्राविडी— अहो धिक् ? ज्येष्ठस्वसारं मां 'साम्बार' इति वदति वा ? "चिन्तकाया गोङ्गूरा" भक्षिणीं ताम् इदानीमेव निष्कासयिष्यामि (इति कोपेन परिक्रामति)

आङ्गली—(स्वगतम्) वेरि नाइस । मम उपायः पुष्पितः । फलिष्यति च अचिरेण । इतः परं नास्ति कोऽपि उपरोधः । (प्रकाशं) सखि द्राविडि ! मम त्वं प्राणतुल्या । अतः तुभ्यं सर्वं रहस्यं कथयिष्यामि । शृणु,न केवलम् आन्ध्री, वङ्गी हिन्दी प्रभृतयः सर्वा अपि सोदर्यः त्वां दूषयन्ति । अतः ताभिः साकं इतः परं मा विहर ।

द्राविडी— यदि ता एव आगच्छेयुः ?

आङ्गली—मा भैषीः, त्वं माम् अनुसर । अहं सर्वं साधयिष्यामि । (विलोक्य) इत एव आगच्छन्ति ताः । त्वं सत्वरं गृहाभ्यन्तरं गच्छ ।

द्राविडी— तथैव (इति निष्क्रांता)

(ततः प्रविशन्ति आन्ध्री, उत्कली, वङ्गी, गुर्जरी च)

आन्ध्री— सोदरि द्राविडि ! सोदरि द्राविडि !

आङ्गली— किमर्थम् ? किं आवश्यकं युष्माकम् ?

आन्ध्री— कथं सखी आङ्गली ? त्वं अत्र किं करोषि ? अस्मत्सोदरी द्राविडी क्व गता ? वयं सायं-विहारार्थम् आगताः ।

आङ्गली— सा इतः परं युष्माभिः साकं न विहरिष्यति ।

आन्ध्री— अस्माभिः किं कृतम् इति ?

आङ्गली—-युष्मासु काऽपि तां साम्बार स्वसा इति निनिन्द किल ।

आन्ध्री— अलीकम् । का अनिन्दत् ? (इति अन्योन्यं अवलोकयन्ति)

आङ्गली— को जानाति ? आन्ध्री एव निनिन्द इति काऽपि अवदत् । साऽपि 'सत्यमेव स्यात्, यतः आन्ध्री चिन्तकायागोङ्गूरादिभक्षणेन सर्वदा रूक्षस्वभावा' इपि कथयन्ती गृहान्तः अगच्छत् ।

वङ्गी, उत्कली-(हसन्त्यौ) अयि आन्ध्रीसोदरि ! किमेतत् ? चिन्तकाया गोङ्गूरादिकं मा भक्षय ।

आन्ध्री— (सकोपं) युवां अपि मत्स्यभोजनं त्यजतम् । अनन्तरम् उपदेक्ष्यथः ।

वङ्गी— (उत्कलीं पश्यन्ती) श्रुतं सोदरि ! कियत् धैर्यम् ? आवामपि अधिक्षिपति । नूनं इयमेव निन्दितवती स्यात् ।

आन्ध्री— मत्स्याशने ! कां वदसि ?

वङ्गी— स्वैरिणि ! कां वदसि ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आन्ध्री— अन्यथा त्वमिव हिन्द्याः दयया का जीवेत् ? धिक् अस्वातन्त्र्यम् ।

वङ्गी का हिन्द्याः दयया जीवति ? का एवं वदति ?

आन्ध्री— अन्या किमर्थं वदेत् ? हिन्दी एव एकदा स्वयमत्र वदत् इति आङ्गलीसखी वदति । तां पृच्छ ।

वङ्गी— सखि आङ्गलि ! कथय किमिदं सत्यम् ?

आङ्गली—स्मरामि, एकदा अवदत् इव ।

वङ्गी— अहो धाष्ट्र्यं हिन्द्याः । तर्हि मम समक्षं किमर्थं नोक्तं त्वया ?

आङ्गली— किमर्थं वृथा सोदरीषु युष्मासु कोपोत्पादनम् इति । सम्यगस्ति । सोदरि उत्कलि ! अद्य माम् अवदत् । अन्यदा त्वामपि वदिष्यति । अतः तस्याः सख्यम् आवयोः । (माविलोक्य) सा इत एव आगच्छति । त्वं मा भाषस्व । अहमेव युक्तमुत्तरं दत्वा प्रेषयिष्यामि ।

हिन्दी— (प्रविश्य) अरे ! यूयं सर्वाः अत्र तिष्ठथ । अहं युष्मान् सर्वत्र अन्विष्य श्रान्ता अभवम् ।

वङ्गी— (सभ्रूभङ्गम्) ओ हो हिन्दी स्वसा वा ? सोदरि ! गच्छ यथागतम् । इतः परम् अस्माकं तव दया मास्तु, सख्यमपि मास्तु । अस्माकमपि आत्माभिमानः सजीवः एव वर्तते ।

हिन्दी— किमेतत् ! हठात् तव बुद्धिः वक्रा इति ? दुष्टे कियत् धैर्यं तव ? ननु तव बुद्धिरेव वक्रा ।

आङ्गली—(निवार्य) हाँ हाँ । किमेतत् । अस्थाने कलहः? प्लीज डोण्ट क्वारल ।

वङ्गी— त्वं विरम सखि । पश्यानि एकं हस्तम् । एकया चपेटिकया तस्याः बुद्धिं ऋजुं करिष्यामि । (इति चपेटां दातुं प्रयतते । आङ्गली वारयति)

द्राविडी— (गृहात् आगत्य) किमेतत् । मम गृहद्वारमेव लब्धं वा कोलाहलं कर्तुम् ? आकण्ठं भुञ्जानानां किमस्ति अन्यत् करणीयम् ? अपसरत अन्यत्र ।

आन्ध्री— सोदरि द्रविडि ।

द्रविडी— त्वया साकं भाषितु नाहं सज्जा । वत्साः मे क्षुधा पीड्यन्ते । धूर्ते गच्छ गच्छ ।

आन्ध्री— अहो मां निन्दसि ?

द्राविडी— अन्यथा नन्दामि वा ? अतीव उत्तमा इव भाषसे । श्वेतं सर्वं क्षीरं मन्यसे ।

आङ्गली— सख्यः ! कलहं मा कुरुत । शान्ताः भूत्वा मम वचनमाकर्णयत । युष्माकम् इदं स्वातन्त्र्यमेव अस्य अनर्थस्य कारणम् । अतः यूयं सर्वाः मामेव अनुसरत । अहं युष्मान् सर्वाः समभावेन पश्येयम् ।

द्राविडी— तथैव सखि ! अहं त्वामनुसरामि ।

आन्ध्री— अहमपि ।

अन्याः— तथा चेत् वयमपि ।

सर्वाः— जयतु आङ्गली । जयतु आङ्गली ।

(यवनिका)

पञ्चमं दृश्यम्

आङ्गली— (प्रविश्य) मम व्यूहरचना फलवती अभूत् । अद्यप्रभृति इमाः सर्वाः मम दास्यः सवृत्ताः । वेषादिकमपि परिवर्तनीयम् इति अहम् आदिशम् । बहुशः तदपि कृतमेव स्यात् । (पुरोऽवलोक्य) ओ आई सी । इमाः इतः एव आगच्छन्ति । वेरि गुड् ।
(ततः प्रविशन्ति आङ्गलेयवेषधारिण्यः हिन्दीप्रभृतयः)

द्राविडी— सखि आङ्गलि ! इदानीं पश्य अस्मान् ।

आङ्गली--वेरि वेरि नाइस् । रमणीयम्, अतीव रमणीयम् ।

द्राविडी— तत् एहि विहाराय गच्छेम ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आङ्गली—नो. नो. एतदेव असमञ्जसम् । विहारो मास्तु, मृत्पिण्डं मास्तु । शृणुत—पुनरपि यूयं एकत्र मिलित्वा यदि विहारं प्रारप्स्यध्वे तदा भूयोऽपि युष्मासु विवादः एव सम्भवेत् । अतः, इतः परं युष्माभिः कदापि मिथः न स्थातव्यम्, नापि विहरितव्यम् ।

द्राविडी—तथा चेत् अहं मम प्रान्ते एव तिष्ठेयम् ।

अन्याः— सखि आङ्गलि ! वयमपि तथैव कुर्याम ।

(ततः प्रविशन्ति द्राविडीप्रभृतीनां बालाः स्वस्ववेषेण)

द्राविडबालः—अम्मा ! वा अम्मा पशिक्किरदु । (अम्ब ! आगच्छ अम्ब । क्षुधा भवति ।)

आन्ध्रबालः—अम्म ! राम्म, एन्तसेपु माटलाडुतावु ? (अम्ब ! आगच्छ अम्ब । कियन्तं कालं सम्भाषसे ?)

उत्कलबालः—मा । केत्ते उच्छुरो हेल्लाणि । बेगि आसे । (अम्ब भूयान् बिलम्बः अभवत् । सत्वरं आगच्छ)

आङ्गली—नान् सेन्स । के एते बालाः ? अस्माकं संभाषणं उपरुन्धन्ति ? (द्राविडीप्रभृतयः स्व स्वकुमारं 'अयं मम कुमारः' इति एकैकशः दर्शयन्ति)

आङ्गली—नो नो । दिस् इज् नाट् गुड् फैशन् । अरे बोइस् ! शृणुत । यथा माइ सन्स् तथा यूयमपि केशान् कर्तयित्वा, 'क्राफ्' शिरस्काः पैण्ट् हेट्धारिणः 'सिगिरेट्' पानम् आचरत । सी युवर् मदर्स । यथा अहं, तथा संवृत्ताः ।

बालाः—ओ ! किमत्र अशक्यम् ? केशान् वर्धयित्वा शिखां बद्धुं भूयान् कालः आवश्यकः । कर्तयित्वा 'क्राफ्' निक्षेप्तुं एको निमेषः अलम् । पश्यन्तीनामेव युष्माकं वेषं परिवर्त्य आगमिष्यामः । अत्रैव तिष्ठत । (इति निष्क्रम्य आङ्गलवेषेण पुन; प्रविशन्ति)

आंग्ली—(सहर्षम्) वेरि गुड् । इतः परं भारतदेशः 'इण्डिया' अभवत् ! (रिष्टवाच् अवलोक्य) अस्तु, टाइम् अभवत् ।'चर्च'प्रति गन्तव्यम् । श्वः प्रभृति युष्मानपि नेष्यामि । आगमिष्यामि पुनः । (निष्क्रान्ता)

(ततः प्रविशति नारदः)

नारदः—नारायण । नारायण । मम सोदर्यः भारतदेशे गन्ति किल । ताः दृष्ट्वा बहवः कालाः अभवन् । इदानीम् अहं भारतदेशं आगतवान् । कुत्र मे सोदर्यः ? (पुरोऽवलोक्य) का एताः ? न न-के एते ? स्त्रियो वा पुरुषाः वा ? भवतु, समीपं गत्वा ज्ञास्यामि । (इति उपसर्पति)

द्राविडी—(विलोक्य) सोदर्यः । सोदर्यः !! अत्र पश्यत । अस्माकं भ्राता नारदः सम्प्राप्तः । (नारदमुपसृत्य) भ्रातः अपि कुशलम् ? ब्रह्मलोकादेव आगच्छसि खलु ? तत्र अस्मत्पितरौ कुशलिनौ वा ?

नारदः—(साश्चर्यम्) काः यूयम् ?

द्राविडीप्रभृतयः—(एकैकशः) किं व्यस्मरो वा अस्मान् ? मां न जानासि भ्रातः ?

—नान् दान् उन् तङ्गै द्राविडी

(अहमेव तव सोदरी द्राविडी)

—नेनु आन्ध्रिनि (अहम् आन्ध्री)

—मु उत्कली (अहम् उत्कली)

—आमि वङ्गी (अहम् वङ्गी)

—मैं हिन्दी हूँ (अहम् हिन्दी भवामि)

(इति नारदं परितः तिष्ठन्ति)

—क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एक समान सरल प्रणाली के लिए

देश भर में नाप-तौल की एक समान, सरल प्रणाली लागू करने के उद्देश्य की पूर्ति के लिए एक और महत्वपूर्ण कदम उठाया गया है।

१ अक्तूबर, १९५८ को राज्यों और केन्द्र शासित क्षेत्रों के कुछ चुने हुए इलाकों में मेट्रिक बाटों का प्रयोग चालू किया गया था। अब इस वर्ष, अक्तूबर मास से इन इलाकों में केवल मेट्रिक बाट ही कानूनी रूप से मान्य होंगे।

अप्रैल, १९६० से जम्मू-कश्मीर के अतिरिक्त बाकी सारे देश में भी मेट्रिक बाटों का प्रयोग चालू कर दिया गया है।

अप्रैल, १९६२ से देश भर में मेट्रिक बाटों का प्रयोग अनिवार्य कर दिया जायेगा।

मेट्रिक प्रणाली

सरलता व एकरूपता के लिए

भारत सरकार द्वारा प्रचारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्मान्तराणीव स्थानान्तराणि

(ले० विद्याभूषणं श्रीगणेशरामशर्मा, झालावाड)

नौकरीं कुर्वतां सर्वसाधारणानां दैनन्दिनोऽयमनुभवो यत् राज्यतन्त्रस्य प्रशासन-पद्धतौ प्राप्तकालं स्थानान्तराणि भवन्त्येव । नौकरीधीराणां राज्यसेवकानां मते,—'वासांसि जीर्णानि यथा विहाय, नवानि गृह्णाति नरोऽपराणि ।' इत्याध्यात्मिकं समाधानं स्थानान्तरसमस्यानाम् । अथोच्चाधिकारिपदमधितिष्ठतां महतामप्सरपदवाच्यानां महामहाशयानां पक्षे तु स्थानान्तराणि स्वर्गलोकसुखान्तराणीव पर्यवस्यन्ति, परन्तु सर्वसाधारणानां विशेषत एकमेव स्थानं परम्पराधिवसतां भृत्यजनानां स्थानान्तरविषये पृथक् धारणा, विभिन्नानि मतानि, कारणानि, हेतवश्च कर्णाकर्णि श्रूयन्ते । वस्तुतः प्रशासनाधिकरणेषु विधिविधाननियमान्तर्भूतानि भवन्त्येव स्थानान्तराणि । प्रशासनं कार्यसुविधापेक्षया, योग्यतादृष्ट्या वा नवकरणं स्थानान्तराणि करोति । न केवलं राजकीयं शासनमेवापि तु व्यापारिणो गृहस्थाश्चापि स्वभृत्यानां स्थानान्तराणि कुर्वते । अतः स्थानान्तराणि तावद्देव पुराणानि प्रसिद्ध्यन्ति यावन्नौकरीविधानानि । अतः स्थानान्तराणामस्तित्वे, प्रचलने, तदावश्यकत्वे च सहसा न कोऽपि विसंवादो वैमत्यं वा स्यात् । तथा सति, स्थानान्तरेषु जातेषु के के परिणामा निष्पद्यन्ते ? के के वा हानिलाभा जायन्ते !! स्वयं प्रशासनस्य तथा स्थानान्तरितस्य जनस्य पक्षे काः काः परिणतयः परिस्थितयो वा समुद्भवन्ति ? एतत् सर्वमतीव रोचकं, विशेषतो भुक्तभोगानां त्वतीव मर्मस्पृगिति पाठकानां पुरतः स्थानान्तरमीमांसाद्य किंचित् प्रस्तूयते—

प्रशासका वदन्ति यत् स्थानान्तरेषु कृतेषु तन्त्रकार्यालयानां कार्यक्षमता वृद्धिं गच्छति । 'योग्यं योग्येन योजयेत् !' इति तेषां विशुद्धो व्याहारिको दृष्टिकोणः स्थानान्तरविषये । तेषां मते स्थानान्तराणि नियमान्तर्भुक्तानि, स्वाभाविकानि-अवश्यम्भवितव्यानि परिगण्यन्तेऽतः स्थानान्तरमीमांसा नाम वृथा कालक्षेपो लेखकानां पाठकानां च । परं स्थानान्तरैः परिचितानां वाचकानां संख्या सौभाग्यतो दुर्भाग्यतो वा महतो महीयसी विद्यतेऽत्र भारते देशे । ततः स्थानान्तरालोचनं प्रजानां मूलभूतोऽधिकारो विशेषतो जनतन्त्रात्मके शासने यत्र लेखनस्य भाषणस्य च पूर्णा स्वतन्त्रतास्ते ।

अथादौ स्थानान्तरमीमांसायां तावल्लाभा विमृश्यन्ते । राजकारणस्य कार्यपूर्तेरतिरिक्ता विविधा लाभांशाः सम्पद्यन्ते स्थानान्तरैः । स्थानान्तरेषु कृतेषु राज्यसेवकानां विभिन्नेषु देशकालेषु, पृथग्विधासु परिस्थितिषु, स्थानेषु च निवासात् कार्यक्षमता, क्षेत्रपरिचयोऽनुभवाधिक्यं, स्फूर्तिः, प्रत्युत्पन्नमतित्वं, लोकसंग्रहप्रावीण्यं, जागरूकता, सहनशीलतादयोऽनेके गुणा विकासं व्रजन्ति । राज्यभृत्यानां व्यक्तिगतजीवनेऽपि च स्थानान्तराणि लाभाय निष्पद्यन्ते । अत्र मनोविज्ञानं स्पृशति स्थानान्तरम् । चिरायैकस्मिन्नेव स्थले निवसन् मनुष्यः स्थानान्तरदर्शनं कदाचित् स्वयमेव वाञ्छेत्, तन्नाश्चर्यावहम् । व्यक्तेर्जीवने परिवर्तनशीलतैव पुरुषार्थप्रवर्तिनी भवति । अतः स्थानान्तरं सत्वोद्रिक्तानां, महोत्साहानां, गुणविशिष्टानां, सेवातत्पराणां, सचेतसां, कर्मपटूनां, नितरां चतुराणां च मते स्वजीवनविकाशाय काम्यं भवति । स्थानान्तरे कृते सति नौकरः स्वयोग्यतां, सक्षमत्वं च स्वयमेव परीक्षते । एकस्मात् स्थानादन्यत्-स्थाने गमनाय यदा सज्जो भवति स्थानान्तरितो जिगमिषुस्तदासौ स्वकीयां गार्हस्थ्यस्थितिं सक्षमां वा दुर्बलां वा सामान्यां च यथार्थतो वेत्ति । प्रयाणोद्यतः स्थानान्तरितो जनः पुत्रकलत्रसम्बन्धिसमाजसम्पत्तिविषये 'कोऽहं, कौ देशकालौ' इति तत्त्वज्ञानं चिन्तयितुं प्रवर्तते । तदासौ 'सोऽहम्, सोऽहम् !' जपन् स्वात्मसाक्षात्कारं करोति । इत्थं स्थानान्तरं न केवलमात्मदर्शने समाधियोगसाधकमेव सिद्ध्यति प्रत्युत ज्ञानवैराग्योदयात्—'उत्तिष्ठत,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जरत्कारुः

ले० श्रीदीनानाथत्रिवेदी 'मधुपः', जयपुरम

वासुकेः सद्मनि धनसम्पदां नासीत् काचित् न्यूनता। भगिन्यपि तदीया जरत्कारुः सदाचारपरायणा मतिमती सरला चाऽवर्तत। अतएव वासुकिनाऽपि जरत्कारुणा विहितं समयबन्धद्वयं 'आम्' इति स्वीकृतम्। स्वभवनं गत्वा च वासुकिः तन्निवासार्थमेकं प्रासादं दत्तवान्। तत्र भार्यया जरत्कार्वा सह निवसन् जरत्कारुर्गार्हस्थ्यधर्माननुपालयामास। तत्पत्नी जरत्कारुरपि स्वस्वामिनः सादरं सम्यक् परिचर्याञ्चकार। तथा पत्युः कृते पूर्वत एवावश्यकं वस्तुजातं सुसज्जितं रक्षति स्म सा। नित्यं पत्यु-

---

जागृत, प्राप्य वरान् निबोधत !' इत्यस्य नौकरीमहामन्त्रस्य पात्रत्वमासादयति। अयं हि मानवजातेर्महानेव लाभो यद्धि स्थानान्तरिता जनाः स्वात्मनो यथार्थां स्थितिं 'इदमित्थम्' सम्यक् परिचिन्वन्ति तत्त्वतः। यदा कस्यचन स्थानान्तरप्रसङ्गोऽभ्युपैति तदा तस्य संसारे सह वसतां जनानां मिथः सम्बन्धाः कलहकषायिता वैमत्यमाश्रिता दोषदूषिताः स्वार्थसम्पृक्ता अपि स्वयमेव शुद्ध्यन्ति। मनोमालिन्यं वैरभावा अन्यथा बोधाश्चोपशाम्यन्ति। 'नैतत् स्थानान्तरं कामपि विपरिणतिं जनयेद्वराकस्य स्थानान्तरितस्य जनस्य, नौकरी भगवती कुप्येदधिकारिणो राजभक्ताश्च क्रुध्येयुस्तद्धितं चापबाधितं स्यात् !' इति हितैषिणः स्नेहातिरेकात् चिन्तयितुं प्रवर्तन्ते। ते च तं प्रति—"स्थानान्तरं शिरोधार्यं, नौकरोऽसि नरोत्तम !" इत्युपदेशं श्रावयन्ति। अवाञ्छन्तोऽपि चागत्या तत् समर्थयन्ते। एवं स्थानान्तराणि जीवने शत्रुमित्रोदासीनानां कौटुम्बिकानां सामाजिकानां सदस्यानां च परीक्षणावसरं प्रयच्छन्ति। प्रशासनिककार्यालयेषु स्वनियोगस्य दुर्वहं कार्यभारं निर्वहतां क्लर्काध्यापकादीनां मिथो यदा कदा मानवस्वभावसुलभं मनोमालिन्यं वैमनस्यं वा भवत्येव परन्तु कस्यापि स्थानान्तरितस्य जनस्य स्वनियुक्तिं परिपालयतः प्रयाणकाले, पूर्वं जातः सर्वोऽपि च कलहभावः स्वयमेवोपशाम्यतीत्यपरोऽयं लाभः स्थानान्तरात्। अधिकारी सेवको वा भृत्यो वा यो वा को वा भवतु परं स्थानान्तरं स्वीकृत्य स्वकार्यालयात् यदा सः प्रस्थानायोद्यतो भवति तदा सर्वेषामेव निष्कारणं प्रीतिपात्रं भवति। स्थानान्तरसाहित्यस्य नौकरीरसवेत्तारः सहृदया जनाः स्थानान्तरं व्यभिचारिभावेषु गणयन्ति। ते च स्थानान्तरसमयस्य सूक्ष्मं मनोविज्ञानं जानन्तोऽवसरमहत्त्वं च सम्यगवगच्छन्तो भूतपूर्वाणां सर्वेषामपि विदानां समाधानं साधयन्ति। अत्र सिद्धिस्तावदियती, यत् स्थानान्तरितोऽधिकारी भृत्यो वा यदान्यत्र प्रयातुं तत्परो भवति तदा स्थानान्तरितस्य जनस्य 'सेवा-पत्रे' (Service Roll) तत्कार्यविवरणलेखने तद्विषयिणी स्वकीयां शुभामनुकूलां च टिप्पणीमुल्लिखति, तच्चरित्रं सेवानिष्ठां च साधु प्रशंसन्ति। इत्थं स्थानान्तराणि प्रजातान्त्रिकीं सामाजिकीं च भावशुद्धिं परिष्कुर्वन्ति। स्थितिपालकाः कूपमण्डूका रूढिमात्रैकशरणा लोकाः स्थानान्तरमभिशापं भाग्यविप्लवमिव दुःखदायकं मन्यन्ते। एवंविधा जनाः सर्विसभीरवो नौकरी-कर्म-कातराश्च भण्यन्ते भव्यैः। सर्विसभीरूणां कृते स्थानान्तरं विप्लवो महानुत्पातो भूकम्पो वा भवति, विशेषतो जन्मभूमिवात्सल्यं परिपोषयतां सम्वेदनशीलानां भावस्रष्टॄणां स्थानान्तरं झञ्झावात इव हृत्कम्पं जनयति। एवंविधा जनाः स्थानान्तरं लोकान्तरमिव महतीं घटनामामनन्ति। स्थानान्तरभीरवो लोका विषमज्वरमिव दूरतोऽपवर्जयितुं चेष्टन्ते। ते वैद्यानिवास्य रोगस्य चिकित्सकानधिकारिणो बहाराध्याराध्य प्रसादयन्ति। अधिकारिणश्च कुशला भिषज इव तेषां तदिदं हृदयदौर्बल्यं तत्त्वदृशा यथार्थतो जानानाः स्थानान्तरास्त्रप्रदर्शनेन तान् तर्जयन्ति, भीषयन्ति च। एवं स्थानान्तराणि शास्यशासकयोः परस्परं समन्वयं संसाधयन्ति, तस्मात् प्रशासने महान्तं लाभमुत्पादयन्ति।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रादेशमनुपालयन्ती तदप्रीतिकरं किमपि कार्यं मनसाऽपि कर्तुं नेच्छति स्म ।

एवं गच्छता कालेन पतिव्रता सा जरत्कारुर्जरत्कारुमुनेः सकाशाद् गर्भं दधार । अस्मिन्नेव समये चैकदा श्रान्तः स मुनिः स्वपत्न्या उत्संगे उत्तमांगं निधायाऽऽसीत् शयानः । सूर्योऽस्ताचलं प्राप, परं स न जजागार । तदा जरत्कारुर्बभूव चिन्ताक्रान्ता यदि पतिं जागरयामि तदा स क्रुद्धो भविष्यति । न जागरयामि चेदेनं तदा सूर्योऽस्तं यास्यति, तेन तस्य सन्ध्याकालेऽपयाते धर्मे बाधा समापतिष्यति । दशायामस्यां किमहं करोमि, किं न—इत्युभयतःपाशा रज्जुरिति । अन्ते तया कृतो निश्चयो यत्पतिदेवो रुष्टो भवेत् तर्हि भवतु, क्षणानन्तरं स प्रसन्नोऽपि भविष्यति, परमेवं सुदीर्घकालसमुपार्जितस्य तपसो निष्फलता नोपेक्षणीया । धर्म्ये कर्मणि पत्युः साहाय्य-सम्पादनन्तु स्त्रियाः सर्वतः प्रथमं कर्तव्यमिति निश्चित्य पतिं जागरयितुं जरत्कारुरित्थं सुमधुरया वाचोवाच—भगवान् भास्वानस्तं गन्तुमिच्छति । अतो द्रुतं निद्रां त्यक्त्वा भवता सन्ध्योपासनं विधीयताम् । दृश्यताम्, होमवेला समुपस्थिता । अहो कीदृशोऽयं सुचारुः समयः—इति ।

एवं भार्योदीरितवचनश्रवणमात्रेणैव प्रबुद्धो रोषारुणलोचनो महामुनिरुवाच—वामे ! कथं मम कृतस्त्वयाऽनादरः ? नाधुना त्वया सहाऽहं निवत्स्यामि, गमिष्यामि यथेच्छम् । इत्थं कुपितस्य कान्तस्य कठोरं वचनं शृण्वन्त्या एव तस्याः सहसैव दूयमानमानसाया हिमपातहतप्रभं कमलमिव वदनं मलिनं बभूव । अञ्जलिं बध्वा च सा सविनयं निवेदयामास—प्राणेश ! कालविलम्बेन तव धर्म-विलोपो न भवेदित्यभिप्रायेणैव मयाऽधुना जागरितोऽसि भवान् । नान्यथा शङ्का कार्येति । पुनराह—स मुनिः—मदीया प्रतिज्ञा नाऽसत्या भवितुमर्हति । अतोऽहमिदानीमवश्यमितो यास्यामि । मयि विनिर्गते च त्वया स्वभ्राता वासुकिरेवं वक्तव्यो मद्विषये यदहमत्रैतावन्तं कालं ससुखं न्यवसम् । महाभागे ! मया विना भवत्यापि न कदापि शोकसन्तप्तया भाव्यमिति । परमेतत् कथं भवितुमर्हति—यत् पत्यौ गृहात् प्रव्रजितुमुद्युक्ते स्त्रियाश्चित्तं शोकाकुलं न जायेत ? अतो निजनाथकठोरवाग्वज्राहता सा महावातप्रेरिता कदलीदलावलिरिव सुभृशं कम्पमानोभाभ्यां लोचनाभ्यामश्रुधारां विमुञ्चन्ती महता कष्टेन कथं-कथमपि धैर्यं दधाना पतिं प्रतिबभाषे—मुने ! धर्मज्ञोऽसि भवान् । अतो निरपधाया दास्या मम्ऽसमये त्यागो न विधेयः । अहन्तु सत्येन स्वान्तेन सन्ततं धार्मिककृत्येषु भवतः शुश्रूषां हितं च कुर्वाणैवाऽवसम् । किं च येन मनोरथेन मम भ्रात्राऽहं भवते समर्पिताऽस्मि, स मनोरथोऽपि नेदानीं पूर्तिमगात् । अपि च स्वामिन् ! भवद्वीर्यसेकात् मयि पुत्रो जायेत—एतदर्थमेव मम सम्बन्धिनः परमात्मानं प्रार्थयामासुः, परं तत्प्रार्थनापि साम्प्रतमपि नाभूत्सफला । ब्रह्मणः शुभाशीरप्यस्ति यद् भवत्तनुजनुषा पुत्रेणैव नागवंशः शापाद्विमुक्तो भविष्यतीति । अतो नाथ ! केवलमहं स्वप्रयोजनायैव न, अपितु समेषामपि स्वस्य सम्बन्धिनां हिताय प्रार्थये—प्रसीदतु भवान् मयि । भवता सह मामको यः सम्बन्धः सम्पन्नः स निष्फलतां न गच्छेत् । अतो महात्मन् भवांस्तु विद्वान् विद्यते, कुतः पुनः सगर्भां भार्यां मां परित्यज्य गन्तुं सन्नद्धोऽस्तीति ।

तदा महर्षिणा प्रत्युक्तम्—भद्रे ! सम्प्रति शुचं परित्यजतु भवती अचिरादेव सफलमनोरथा भविता । अग्निरिव तेजस्वी, धर्मे धर्म इव साक्षाद् वेदवेदाङ्गकुशलो बालस्तव गर्भे विद्यते । एतदुक्त्वा घोरं तपस्तप्तुं वनाय ततश्चचाल स महामना महर्षिः ।

अथैवं जरत्कारुमुनौ वनं याते कतिपयमासानन्तरेव तत्पत्नी जरत्कारुः पुत्ररत्नमजीजनत्, यस्य नाम 'आस्तीक' इति प्रसिद्धमभूत् । सोऽयं बालको बाल्यादेवाऽऽसीदति चपलः । स्वस्य भ्रातुर्वासुकेर्गृहमधिवसन्ती पतिव्रता सा जरत्कारुः स्वस्य बालकस्य पालन-पोषणे विधाय तं महापण्डितं चकार ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

द्वित्रवर्षेष्वेव सर्वेष्वपि भारतीयराज्येषु प्रारम्भिकी शिक्षा

निःशुल्का अनिवार्या च भवेत्

मार्चमासस्य षोडशतारिकायां 'लोकसमायाम्' शिक्षाविषयोपरि अतिविस्तरेण विचारः समभूत्। "अन्यान्यव्ययेषु समधिक द्रव्य व्ययस्वीकारेऽपि शिक्षाविषये भूयसी व्ययस्य न्यूनता। अतएव लोकानामावश्यकता न पूर्यन्ते" विषयेऽस्मिन् बहुकालं यावत् वाद-विवादः समभवत्। एतस्योत्तरदानसमये शिक्षामन्त्रिणा डा० श्रीमालिमहोदयेन प्रत्युक्तम्—"द्वित्रवर्षाणामभ्यन्तरे एव सर्वेषामेव राज्यानां शिक्षाप्रबन्धकाः प्रारम्भिकीं शिक्षां निःशुल्कामनिवार्यां च कर्तुं शक्नुयुस्तथा निश्चयः संजातोऽस्ति। इदं सत्यं स्वीकर्तव्यमेव भवेद् यत् प्रारम्भिकशिक्षाविषये भारतस्य तादृशी प्रगतिरद्यावधि नाऽभवद् सादृशी प्रगतिरावश्यकी समभूत्। प्रधानभूता कठिनता शेयमेवाऽऽसीत् यद् राज्यानां सर्वकाराः प्रारम्भिकशिक्षाविषये पर्याप्तमवधानं नाद्यावधि अददुः। इतः परमस्मिन् विषये शिक्षाकर्णधाराणां पर्याप्तमवधानं भवेत्" इति शिक्षामन्त्रिणा हृदयाश्वासनं प्रादीयत।

'अलीगढ़ विश्वविद्यालय' संबन्धेऽपि संतोषजनकमुत्तरमदीयत यत्—'मम सुदृढोविश्वासोऽस्ति यत् निरीक्षकसमितिर्या पूर्वमसंतुष्टा आसीत्, तया च तस्मिन्विषये निर्ब्जंत्यागपत्रमपि दत्तमासीत्, किन्तु सर्वमिद निरस्येत। निरीक्षकसमितिस्त्यागपत्रमिदं परावर्तयेत्।

विश्वविद्यालयानां शिक्षामाध्यमम्

विश्वविद्यालयेषु शिक्षाया माध्यम परिवर्त्येत (अर्थात् आङ्गलभाषास्थाने प्रान्तीयभाषा, हिन्दीभाषा वा उपादीयेत," एतद्विषये श्रीमालिमहोदयेन स्पष्टमुत्तरं दत्तं यत्— "केन्द्रीयसर्वकारः विभिन्नविश्वविद्यालयानां शिक्षाया माध्यम परिवर्तनस्य योजनासु हस्तक्षेपं कर्तुं नात्मनोऽधिकारं पश्यति। भारते सर्वेऽपि ४० विश्वविद्यालयाः सन्ति। तेषु ३६ विश्वविद्यालया राज्यानां सन्ति, केवलं चत्वारो विश्वविद्यालयाः केन्द्रस्याधिकारं सन्ति। ये राज्याधीनास्तेषां 'पाठ्यक्रमस्य स्तरः सततमुन्नत एव भवेत्' एतद्विषये सर्वाधिकारस्तेषां राज्यानामेवाऽस्ति। अत एव हि तेन "विश्वविद्यालय-अनुदान-आयोगः अपि नियुक्तोऽस्ति। माध्यमविषये संमतिप्रदानं तस्यैवाऽऽयोगस्स कर्तव्यम्, न केन्द्रस्य।'

गतवर्षे (१६५६) जूनमासस्य १७, १८ तारिकयोः आयोगस्याऽस्य अधिवेशनमभूत् अत्रशिक्षामाध्यमस्य विषये भूयान् विचारः समभूत्। आयोगेन प्रस्तावः सोयं पारितः—"विश्वविद्यालयानां पाठ्यविषये, माध्यमविषये च ये विचाराः समुपस्थिताः ते किल 'आयोगेन' विचारिताः। एव (आयोगः) अस्मिन् विषये सहमतोऽस्ति यत् 'एप्तकृते एकं कार्यं दत्तां नियुज्येत्, यद्धि प्रश्नस्यास्य पूर्णरूपेण विचारं कृत्वा, तादृशीं योजनामुपस्थापयेत् येन पाठनस्य माध्यमं शनैः शनैराङ्गलभाषातो भारतीयभाषाणां भवेत्। अतएव आङ्गलभाषास्तरोऽपि सहसा नाऽद्यः भतेत्।'

एतदनुसारं 'कार्यरल' नियुक्तमभूत्। अनेन नाना समिती कृत्वा निश्चितं यत्—"सर्वेषा सदस्यानां संमतिं संगृह्य दलमिदं राजधान्यां दिल्ल्या भविनि अधिवेशने (१६ अप्रेल १६६०) संमतीनामासां विचारं निर्धारयेत्।"

शनैः शनैः शिक्षामाध्यमं यदि भारतीयं भवेत् तर्ह्येवि भारतस्य कल्याणमिति मुहुर्मुहुरवोचाम। किं नाम संप्रति फलं विस्तारेण?

छात्राणामनुशासनहीनतायाः किं कारणम्?

भारनेऽस्मिन् गुरु शिष्ययोः सवात्सल्यः सविनयश्च सम्बन्धश्चिरकालात्प्रसिद्धः, चिरादनुवृत्तश्च। गुरोरनुशासनेन शिष्यो भोज्यमपि परिहरति, चित्रलिखित इव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निश्चलमवतिष्ठते, इत्यादि भारतीयानामन्तेवासिनां सुप्रसिद्धं चरितमाकर्णितं स्यात् महाभारतादिकथाऽनुशीलिभिः। किन्तु वर्तमानभारते शिक्षमाणानां चरितमत्याश्चर्यजनकम्। ते सम्भूय कदाचिदेवमुग्रचरिताः सम्भवन्ति यत्तेषां दमनाय रक्षापुरुषाणां गुलिकास्त्राण्यपि न प्रभवन्ति। दिनेष्वेषु यतस्ततः प्रान्तेषु कालेजीयविद्यार्थिनां सेयमनाकर्णितपूर्वा उच्छृङ्खलता प्रायः प्रत्यहमाकर्ण्यते। उत्तरप्रदेशे राजकीयाभियोगा अपि एतद्विषयकाः प्रचलन्ति। एवं विषयमवलम्ब्य शिक्षाकर्णधाराः बहुधा विचारयन्ति, एतन्निवृत्तये यावच्छक्यं प्रयतन्ते च।

कलकत्तानगरे कलकत्ताविश्वविद्यालयस्यामीदीक्षान्तभाषणम्। भारतसर्वकारस्य वैज्ञानिकानुसन्धानमन्त्री, सांस्कृतिकविषयमन्त्री च प्रो० हुमायूकबीरमहोदयोयमासीत्प्रधानवक्ता। छात्रेषु प्रसृतायाः अनुशासनहीनतायाः कारणमन्विष्यन् कबीरमहोदयः सप्रमाणमसाधयत्—'शिक्षास्तरस्याधःपात एव शिक्षितानामनुशासनहीनताया निदानम्। ये छात्रा अध्ययनविषये गभीराशया न सन्ति, अध्ययनातिरिक्तैः कारणैः कालेजेषु विश्वविद्यालयेषु ये प्रविष्टास्तेषां शिक्षासंस्थाभ्यः पृथक्करणविषये शिक्षाकर्णधारैः कश्चिदुपायोऽवश्यं करणीयः। मन्त्रिमहोदयेन सर्वात्मना सूचितं यत्—'शिक्षाशास्त्रिणां शिक्षासंस्थाप्रबन्धकानां च निश्चितं मतमस्ति यत् छात्राणां सेयमनुशासनहीनता—तादृशीभ्यो घटनाभ्यः समुद्भवति यासामाध्यवसायिकजीवनेन सह न कोपि सम्बन्धः। कालेजाध्यक्षाः केचिदेवं ब्रुवन्तोऽपि श्रूयन्ते यत् कालेजस्यान्तरिकविषयेषु कदाचिदेवंविधानां राजनैतिकाधिकारिणामपि निभृतनिभृतं हस्तक्षेपो भवति यस्य परिणामे सेयमनुशासनहीनता जन्यते। एतदतिरिक्तम्, छात्राणां नेतारोऽपि जातु तादृशाः सम्भवन्ति येषामध्यवसाय एव नैतिकनेतृत्वम्। एवंविधा नेतारः सम्प्रति भारतीयविश्वविद्यालयानां कालेजानां च कृते स्थायिसंपत्तयः संजाताः। यत्किञ्चिदस्तु, यावत्कालं शिक्षासंस्थानां शिक्षाक्रमो भारतीयां संस्कृतिमवलम्ब्य न प्रचरेत्तावत् अनुशासनस्य स्वप्नदर्शनमसम्भवमेव। भारतीयः शिक्षाक्रमो गुरोरग्रे विनयं, शिक्षालये निभृतचर्यां च शिक्षयति। मन्ये तामिमां पद्धतिं साम्प्रतमपि भारतीया नेतारः समीक्षिष्यन्ते तदनुसारं च व्यवहारं प्रवर्तयिष्यन्ते इति किं नाम भूयो भूयः पुनरावृत्त्या, इति शम्॥ ★

अमृत-वाणी

सिद्धान्तस्य स्वीकारमात्रेण तत्प्रभाववशत्वेन वा कार्यं न सिद्ध्येत्। सिद्धान्तस्य साक्षात्कारं चिरस्थायित्वेन हृदये धारयितुं दत्तचित्तत्वं, चित्तस्य अविचलत्वं रक्षितुं सचेष्टत्वं प्राधान्येन आवश्यकमिति जानीयाम। इदं तु अस्माकं ज्ञातमेव यत् यथा यथा अस्माकं संस्कृतिः पृथगात्मिका तथा अस्माकं समाजजीवनमपि पृथगात्मकम्। अस्य विशिष्टस्य समाजजीवनस्य कोऽपि आविष्कारः हिन्दुराष्ट्रं, हिन्दुधर्मं, हिन्दुसभ्यतां च प्रतिपादयतां अस्माकं निजजीवनेषु भवति न वा इति चिन्तनीयम्। हिन्दुजीवनस्य वैशिष्ट्यं प्रकटयन्तः केचन गुणाः सन्ति। तान् अधिगन्तुं वयं किं प्रयत्नशीलाः न वा इत्यपि चिन्तनीयम्। धर्मनिष्ठः खलु अस्माकं समाजः, अतः धर्मानुसारं किं किञ्चिदपि आचरणं अस्माभिः विधीयते। निखिलस्य विश्वस्य आधारभूतं एकमेवाद्वितीयम् अविनाशि सत् अस्तीति अस्माकं मतम्। किं सत्? अस्य चिन्तनं अस्माभिः क्रियते? इद सत्, अस्य चिन्तनं अस्मत् कृते भगवतः रूपम्। अतः भगवतः इदं रूपं चिन्तयतां अस्माकं मनः किं कदापि एकाग्रं भवति। अस्माकं समाजजीवनस्य विशेषः यदि निजजीवने प्रकटतां न गच्छति, यदि निजजीवनं हिन्दुराष्ट्रविशेषाणां प्रतिबिम्बवत् न भवति, तर्हि हिन्दुराष्ट्रं वाङ्मात्रे तिष्ठेत्। परिणामतश्च राजनैतिकैः हेतुभिः आत्मनः हिन्दुत्वं ख्यापयामः इत्येव अस्य अर्थः स्यात्।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओरियण्ट पेपर मिल्स

निम्नलिखतानि वस्तूनि निर्मीयन्ते

बन्धनाय:-

(१) एम्. जी. रिब्ड क्राफ्ट

(२) एम्. एफ्. अनरिब्ड क्राफ्ट

(३) अक्लेद्य (वाटरप्रूफ) क्राफ्ट

(४) क्रेप क्राफ्ट

लेखनाय, मुद्रणाय च:-

(१) श्वेतपत्रम्

(२) क्रीमरङ्गस्य

(३) अर्धश्वेतीकृतपत्रम्

(४) अश्वेतीकृतं पत्रम्

आवरणाय-पेटकानां, पुटकानां च निर्माणाय कार्टनबोर्ड, ग्रेबोर्ड, जुप्लेक्स, ट्रिप्लेक्स, कार्ट्रिज, टिकटबोर्ड, आवरणबोर्ड प्रभृतिवस्तूनि निर्मीयन्ते।

ओरियण्ट पेपर मिल्स (सीमितम्)

प्रबन्धाभिकर्त्तार:-बिरलाबन्धव: [स्वतन्त्रम् सीमितम्] बजरङ्गनगर, (उडिसा)

हरिनगर सूगर मिल्स लि०

★★★ फैक्टरी ★★★

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभापयन्त्रम्—

मर्यादा–रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई–२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातार:—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रिस्टल ★ फेन सूगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुकथाः—

★ ऋणाद् भयम् ★

(ले० : कमलानाथ शर्मा)

दश वर्षाणि व्यतीतानि । वाटकाग्रामस्य एकः कृषकः अकस्मात् मम समीपे उपयातः । अकथयत्—"रामलालमहाजनस्य भवानेव सुपुत्रः ?"

मया यथैव "आम्" इति स्वीकृतं तथैव सः वस्त्राभ्यन्तरात् 'नोट' (रूप्यक) पत्राणां एकं राशिं मम हस्ते अदात् । दीनतया अवदत्—"बहूनि दिनानि व्यतीतानि, भवत्पितुः सकाशादहं शतरूप्यकाणि ऋणरूपे अगृह्णाम् । अद्यावधि अहं एतत् ऋणं शोधयितुं न प्राभवम् । अद्य अहं अतियत्नेन रूप्यकाणां संग्रहं कृत्वा अत्राऽऽयातोऽस्मि । गृहीत्वा मम ऋणं शोधनीयम्" ।

अहं किञ्चिदाश्चर्येण, किञ्चित्कृतज्ञतया च साभिनिवेशं पश्यन्नतिष्ठम् । इतः पुनरब्रवीत् कृषकः—"अहं भवतश्चरणौ गृह्णामि । मम समीपे वृद्धिद्रव्यं दातुं नास्ति धनम् । कृपया इदमादाय ऋणादहं मोचनीयः । रात्रिंदिवा ममाऽऽसीद् ऋणाद् भयम् । अद्य कथंचिद् धनं संगृह्य ऋणमुक्तिं वाञ्छामि । भवतः कृपां आजन्म न विस्मारयिष्यामि ।"

मम हृदि अभवत्—"अहो कीदृशः सत्यधार्मिकोऽस्ति कथं चास्य ऋणाद् भयम् । अद्य धनिका अपि राजनियमबलाद् ऋणं प्रतिदातुं नेच्छन्ति ।"

अहं हृदि गद्गदः पितरमपृष्ट्वैव रूप्यकाणि अगृह्णाम् तं च अवदम्—"अस्तु, भवान् ऋणादद्य मुक्तः" स प्रसन्नवदनो यथागतं जगाम ।

दश वर्ष बीत गये । वाटका गांव का एक खेतिहर यकायक मेरे पास आया और बोला-"रामलाल महाजन के आप ही बेटे हैं ?"—मैंने जैसे ही 'हां' कहा, वैसे ही उसने कपडों के भीतर से एक गड्डी मेरे हाथ में देदी । बडी दीनता से बोला—"बहुत दिन होगए आपके पिता से मैंने सौ रुपये कर्ज में लिए थे । अभी तक मैं यह कर्जा चुका नहीं सका । आज मैं बडी कोशिश से रुपये इकट्ठे करके यहां आया हूँ । इन्हें लेकर मेरा कर्जा चुकता कर दीजिए ।"

मैं कुछ आश्चर्य और कुछ कृतज्ञताभाव से उसकी तरफ देखता रह गया । इधर वह खेतिहर फिर बोला—"मैं तुम्हारे पैर पकडता हूँ । मेरे पास व्याज का रुपया देने को नहीं है । कृपा करके यह रुपया लेकर मुझको इस कर्जे की हत्या से छुडा दें । रातदिन इस कर्ज से मुझको डर लगा रहता था । आज जैसे तैसे भी इस पैसे को इकट्ठा करके कर्जे से छुट्टी चाहता हूँ । तुम्हारी कृपा को जन्म भर नहीं भूलूंगा ।"

मेरे हृदय में हुआ—'अहा यह कितना सच्चा धार्मिक है, इसको ऋण का कैसा भय है ! आज धनी लोग भी कानून के जोर से कर्जे से बचना चाहते हैं ।

मैंने हृदय में गद्गद् होकर, पिताजी से बिना पूछे ही रुपया ले लिया, और उसको कहा—'जो कुछ हो, तुम कर्जे से बरी हो । वह प्रसन्नमुख जैसे आया था, चला गया ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति--सुधा

द्वाविमौ पुरुषौ लोके स्वर्गस्योपरि तिष्ठतः ।
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ॥१

इस लोक में इन दोनों पुरुषों का स्थान स्वर्ग से भी ऊंचा है, अर्थात् अच्छे काम करने वालों को अन्त में स्वर्ग मिलता है किन्तु इन दोनों पुरुषों का स्थान स्वर्ग से भी ऊंचा है। कौन कौन ? समर्थ होने पर भी जो क्षमायुक्त है अर्थात् अपराध को क्षमा कर देता है। दूसरा— जो दरिद्र है किन्तु देने वाला है, जिसकी दान शक्ति है ॥१॥

मत्स्यादयोऽपि जानन्ति नीरक्षीरविवेचनम् ।
परं प्रसिद्धिर्हंसस्य, यशः पुण्यैरवाप्यते ॥२

जल में रहने वाले मच्छी-बुगला आदि जीव भी जल और दूध की पहचान (परख) जानते हैं किन्तु इसके लिए प्रसिद्धि है हंस की (कि हंस ही दूध और पानी को अलग अलग कर सकता है) यश पुण्यों से ही मिलता है ॥२॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[भारतीय स्वाधीनताक्रान्तेः (१९४२ई०) अवसरे स्थापितम्]

★ नयनाभिरामदृश्यैः ★ पुरस्कृतकथाभिः ★ रोमांचकारिघटनाभिः ओतप्रोतम्

★ हृदयग्राहिगाथा ★ मनोहरं मुद्रणम् ★ ज्ञानवर्धकं पारिवारिकं मनोरंजनम्

'देशमुख' हिन्दी साप्ताहिकम् प्रतिगुरुवासरमिदं पत्रं प्रामाणिकलेखैः, बालस्तंभैः, चित्रैः, व्यङ्ग्यचित्रैः शब्दचित्रैश्च सह चलचित्रदृश्यमयीं सामग्रीमुपहरति।

इदं भवत्परिवारस्य सर्वेभ्यः सदस्येभ्यो मनोरंजनसाधनानि समर्पयति एतस्य साहित्यं भवतो ज्ञानं वर्धयति, भवतो जीवने नवीनमुत्साहं भरति, स्फूर्तिमानयति। बौद्धिक-राजनैतिक-आर्थिक-सामाजिकविचारान् दृढयति।

अतएव-सर्वत्र 'देशमुख' साप्ताहिकं सम्मान्यते, प्रख्यायते च।

❀ त्वरितं पठन्तु

समस्तभारते सर्वाधिकविक्रयाय प्रमाणितं सचित्रं हिन्दी-साप्ताहिकम्

महाराष्ट्रराज्यस्यैकलं संध्याकालसमाचारदैनिकम्

देशमुख

[सामाजिकक्रांतेः सचित्र साप्ताहिकम्]

'DESHMUKH'

(Social Revolutionery Hindi Weekly)

पोस्ट बाक्स ६०२९ Post Box 6029

बम्बई-१२ (भारत) Bombay-12 (India)

❀ इष्टमित्रान् पाठयन्तु

पञ्चशील का प्रबल प्रचारक

एकवर्षस्य मूल्य	१०)
षण्मासानाम्	६)
पुस्तकालयेभ्यः	३)

लेखकेभ्याश्चित्रकरेभ्यश्च निःशुल्कम्

प्रति सप्ताहं १६ पृष्ठानि बृहदाकारे। एकप्रतेः २५ नवपणाः। विशेषांका वार्षिकं निःशुल्कम्

देशमुखं भवदीयपरीवारस्य बालवृद्धनरनारीमातृभगिनीप्रभृतीन् सर्वान् कुशलान् नागरिकान् निर्माति

देशमुखं भवतो मित्र, परिवारसदस्यः, समयदर्शकश्च, समाजस्य समस्याः समादधाति।

"साप्ताहिक स्तम्भ"—बम्बई की रातें, देखी सूनी बातें, कहो कैसे कही? इनसे मिलिये, नई-पीढ़ी, मुस्कराहट का कैप्सुल, धरती गाती है, नये प्रकाशन, नवाब राजे-महराजे, श्रमिक-संगठन, विश्व एक नजर में, नेता के विचार, चित्र-कसौटी, शिक्षक-समाज, महिला जागरण, सितारों की कलम से, अर्ज करता हूँ, आपके पत्रों के उत्तर, देशमुख के साप्ताहिक चहरे, क्या खोया क्या पाया! भारतीय मार्कीट व्यवसाय, पर्वत की वासनाएँ, अन्तराल की आत्मा (उपन्यास), वेश्यावृत्ति और उसका अन्त, कैसे हो? नेहरू चाचा, परिवार विज्ञान के बढ़ते चरण, सयानों ने कहा, सम्पादक की डायरी, भूदान चर्चा कसौटी पर बापू ने कहा था? अनमोल बोल, ये समाज के कोढ़ जलते पृष्ठ, ये अन्याय-अनाचार-उत्पीडन कैसा? सफल जीवन की कुँजियां, ये पथभ्रष्ट ललनायें जब माता बनेंगी? जाने-पहचाने-चेहरे, प्रेमकथा, मस्ती, कूटकथा, गूढ़जाल, रम्यकथायें, उन्माद, अजब कथायें, मील के खम्भे, स्वतन्त्रता के प्रहरी, भूत के गर्भ में छिपा इतिहास का एक पृष्ठ, घर-गृहस्थी की बातें।

★ एते भवतो रसिकप्रवृत्तिमुल्लासयिष्यन्ति, हृदयमाकर्षयन्ति, जीवनस्य विभिन्नावस्थानां दर्शनं कारयिष्यन्ति।

★★★ अद्यैव १०) शुल्कं प्रेषयित्वा देशमुखं पठत।

श्रीमान् वितरणनिर्देशकः, दैनिकदेशमुखम् (साप्ताहिकम्) पोस्टबाक्स-६०२९, बम्बई-१२ (भारत)

तडित्पत्रम्— 'देशमुखी' बम्बई, Telegram : 'DESHMUKHI' Bombay.

सम्पर्क करें—पत्र विक्रेता, समाचार-प्रतिनिधि, फोटोग्राफर, विज्ञापन एजेंट, लेखकगण, चित्रकार,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

अस्मिन्नङ्के पठ्यताम्

★ प्रियां पति

★ खगोलवर्णनम्

★ जन्मान्तराणीव स्थानान्तराणि

★ चिरं भूतले लोकराज्यं चकास्तु

★ भारती–विजयम्

★ संस्कृत स्याद् राष्ट्रभाषा

★ अहल्या

★ वेदस्य सर्वविद्यानिधानत्वम्

★ सम्पादकीयम्

★ हिमालयः

★ अमूल्यमातिथ्यम्



अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वर्षम् १० | नवमाङ्कः | वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकप्रतेः चत्वारिंशत् नवपणाः (४० नयेपैसे)

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान हस्तकला का केन्द्र है

राजस्थानी कला के नमूने खरीदकर अपने घरों को सुशोभित कीजिए

तथा

गृह उद्योगों को प्रोत्साहन दीजिये

- ★ हाथी दांत के खिलोने
- ★ लाख व नगीनों के कंगन
- ★ बंधाई व छपाई के स्कार्फ
- ★ जोधपुर की बनी शीतल जल की झारियां
- ★ चन्दन की लकडी के खिलौने
- ★ रंगी एवं बंधेज की साडियां
- ★ पक्के रंग की चदरें
- ★ लकडी एवं खश की बनी वस्तुयें
- ★ कलापूर्ण सामान
- ★ नीले व सफेद पाटरी के सामान
- ★ आकर्षक नमूने की दरियां
- ★ सांगानेरी रंगाई व छपाई के वस्त्र इत्यादि
- ★ उदयपुर के सुन्दर लकड़ी के खिलौने
- ★ जयपुर की कशीदा की हुई जूतियां व जूते
- ★ जयपुर की प्रसिद्धि-प्राप्त चूड़ियां व चूड़े
- ★ कोटा के सुन्दर डोरिये

प्रत्येक सरकारी विक्रय केन्द्र पर प्राप्त

राजस्थानी हस्तकला के नमूने अन्तर्राष्ट्रीय प्रदर्शनियों में भी ख्याति प्राप्त कर चुके हैं

राजस्थान हैन्डी क्राफ्टस एम्पोरीयम
क्वीन्स वे लेन, नई दिल्ली

राजस्थान हैन्डी क्राफ्टस एम्पोरीयम
जयपुर, जोधपुर व उदयपुर

राजस्थान राज्य द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | आषाढमासः, सं० २०१७ (जौलाई मासः सन् १९६०) | अङ्कः ९

प्रियां प्रति

[श्री श्यामनन्दनशास्त्री, साहित्यसदनं, शिवपुरम्, पटना–६]

रूपं तव सरसं प्रावृड्वद् मृदुरुचि-घना झरन्ति

कचजालानां मध्ये वदनं जलदावृतहिमकर इव,
मदिराधरयोः स्मितिचलरेखा पाटललोलहसनमिव,
दिनकर-कर-धवलित नभ-घनमिव गौरं मृदुलतनम्,
चपलावयवाः सारसदलमिव गतिलीलां कुर्वन्ति !
रूपं तव सरसं प्रावृड्वद् मृदु-रुचिघना झरन्ति !

मन्दं मन्दं सुरभिं वितरन् नटति प्रीतिसमीरः
सुधाकणान्विकिरन्निह हृदये सर्पति घनो गभीरः,
नूतनजलधरनीलनयनयोश्चपला रचयति रासम्,
मानतडागे स्वप्नदलानां कलहंसा विचरन्ति !
रूपं तव सरसं प्रावृड्वद् मृदु-रुचिघना झरन्ति !

यौवनरसभरितं धरणीवत् कायापुलकविलसिताः,
सुखविहगानां सरसविरावै रोमराजयो हसिताः,
कणं कणं सरसं निर्माय प्राणनिर्झरा गच्छति,
अतिशयशोभायुक्ताः सर्वे लोकमनांसि हरन्ति !
रूपं तव सरसं प्रावृड्वद् मृदु-रुचिघना झरन्ति !

सुधा-धारमासाद्य भविष्यति नव-रस-जीवन-सृष्टिः,
अधराणां विरसानां भूमौ मधुहासानां वृष्टिः,
प्रणयोत्साहसुसिञ्चितगानं भास्यति पवनतरंगे,
कल्पद्रुमकुसुमानां सुरभौ नराः कलं गायन्ति !
रूपं तव सरसं प्रावृड्वद् मृदु-रुचि-घना झरन्ति !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राक्कथनम्

भारतवर्षे मोहमदीयशासनकालानन्तरं बृटिशराज्यं बभूव। तैश्च स्वकीयराज्यस्य दृढीकरणार्थं निश्चितं यत् यावत् भारतीयाः हृदयेनास्मदनुरक्ता न भवेयुस्तावदस्माकं राज्यं दृढं न भविष्यति। ततः संस्कृतज्ञा भारतीयविद्वांस आहूताः पृष्टाश्च। भवन्तः कां भाषां जानन्तीति। तैरुत्तरितं यत् देववाणीं संस्कृतं नाम वयं जानीमः। पुनः विद्वांसः पृष्टाः यत् किन्तया संस्कृतभाषया यूयं व्यापारं कर्तुमथवा सर्वविधं राजकीयं कार्यजातं विधातुं शक्ता न वा। विद्वद्भिः कथितं यत् भवद्वर्णितकार्याणि तु वयं कर्तुं सर्वथा न समर्थाः। तत आंग्लैः कथितं यत् तदा संस्कृतभाषा तु सर्वथानुपयोगिन्येव, यतः सा व्यावहारिकी भाषा नास्ति। किं तया मृतभाषया भवतां प्रयोजनम् सिध्यति। भवन्तस्तावदिमामांग्लभाषां यदि पठिष्यन्ति तदा यूयं महत्तमं पदं वेतनञ्च प्राप्स्यथ। पदलुब्धैर्वेतनलुब्धैश्च विद्वद्भिरेष एव प्रचारः कृतो यदियं संस्कृतभाषा मृतभाषास्ति। इमं प्रचारं निशम्य भारतीयसंस्कृतिप्रियाः संस्कृतपण्डिताः नितरां विषण्णा भूत्वाखिलभारतीयसंस्कृतसाहित्यसम्मेलमायोजयामासुः नानाप्रान्तेभ्यः संस्कृतविद्वांसश्चाहूताः। तत्र सम्मेलने विचारितमिदं यत् संस्कृतं राष्ट्रभाषापदस्य योग्यं कथं स्यात्। कैश्चित् विद्वद्भिः प्रस्तुतं यत् यावदियं संस्कृतभाषा व्यावहारिकी लोकप्रिया च न भविष्यति तावत्पर्यन्तमियं राष्ट्रभाषापदं संवोढुं न शक्ता। अतोऽस्माभिरेवं प्रयतितव्यं येनैषा भाषा व्यावहारिकी भवेत्। तां च व्यावहारिकीं विधातुमाधुनिकपाठ्यक्रमे संस्कृतनिष्ठा गणितेतिहासभूगोलसामाजिकज्ञानविज्ञानादिका विषया नियोजनीयाः यैश्च छात्राः व्यवहारकुशलाः संपद्येरन्। भारतीयविश्वविद्यालयैश्च संस्कृतभाषां लोकोपयोगिनीं कर्तुं संस्कृतविद्वांसः प्रार्थिता यत्ते गणितादिविषयेषु संस्कृते पुस्तकानि लिखेयुः।

एतदेव प्रयोजनं समुद्दिश्य चोमालेत्युपाह्व पं० मल्लिनाथशर्मभिः गोलविषयकं गोलनवांकुरं नाम पुस्तकमिदं लिखितं संगृहीतं च।

अस्मिन् पुस्तके खगोल-भगोल-भूगोलादि विषया विशदरूपेण वर्णिताः। मन्ये पुस्तकमिदं संस्कृतच्छात्राणामुपयोगि भविष्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोलनवांकुरम्

श्रीमल्लिनाथचौमालेन निर्मितम्

श्रीमहावीरप्रसाद-चौमाल-विरचितगोलप्रकाशकभाष्येण सहितम्

प्रथम-खण्डः

पं० वासुदेवचौमालेन संशोधितम्

प्रणीतं संग्रहीतञ्च गोलपूर्वं नवांकुरम् ।
मल्लिनाथेन भूयात्तच्छ्रेयसे यशसेऽथवा ॥

आधारग्रन्थाः

१. वेदाः
२. ब्राह्मणग्रन्थाः
३. उपनिषद्ग्रन्थाः
४. आरण्यकग्रन्थाः
५. रामायणम्
६. महाभारतम्
७. पुराणानि
८. सूर्यसिद्धान्तः
९. पञ्चसिद्धान्तिका-
१०. ब्रह्मसिद्धान्तः
११. प्रथम आर्यभट्टसिद्धांतः
१२. द्वितीय आर्यभट्ट-सिद्धान्तः
१३. सिद्धान्तशिरोमणिः
१४. लल्लसिद्धान्तः
१५. श्रीपतिसिद्धान्तः
१६. नारदसिद्धान्तः
१७. गर्गसिद्धान्तः
१८. पाराशरसंहिता
१९. बृहद्संहिता
२०. बौद्धग्रन्थाः
२१. योगशास्त्रम्
२२. जैनग्रन्थाः
२३. भगवतीसूत्रम्
२४. भगोलचित्रम्
२५. ज्योतिर्विनोदः
२६. साहित्याचार्य-पांडेयश्रीरामावतारलिखित-निबन्धाः
२७. आंग्लहिन्दी-भाषासु लिखितभूगोलनिबंधाः
२८. अन्ये प्रकीर्णका: निबन्धाः
२९. करणनवांकुरम
३०. यन्त्रराजः
३१. वेदाङ्गज्यौतिषम
३२. मानव-संस्कृति-विज्ञान

श्री गणेशाय नमः

प्रणम्य भारतीं देवीं ब्राह्मीं चैव सरस्वतीम् ।
बालानां सुखबोधाय क्रियते गोलसंग्रहः ॥

★★
★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोलनवांकुरम्

गोलाध्यायः

खगोलवर्णनम्

विश्वम्

निजमुखांबुजमन्दसुसस्मित-
जितविधुं वचसामधिदेवताम् ।
कलिततामरसासनसुन्दरी-
मभिभजामि सुवाक्प्रतिपत्तये ॥१॥

भिन्दन्नेष महान्ति भास्वरकरैस्तिग्मैस्तमांसि द्रुतम-
प्राचीङ् कुंकुमलेपितामिव दिशङ्कुर्वन्निजैरश्मिभिः ।
हर्षं संजनयन् धृताग्निमनुजेष्वाश्वासयन् पद्मिनी-
म्पद्मासद्म विकासयन् समुदयत्यम्भोजिनीवल्लभः।२॥

एष अम्भोजिनीवल्लभः, तिग्मैर्भास्वरकरै-र्महान्ति तमांसि द्रुतं भिन्दन सन् उदयति । अत्रो-दयतीत्यस्य प्रत्येकेन सह सम्बन्धः। निजै रश्मिभिः प्राचीङ् कुंकुमलेपितां इव कुर्वन् । धृताग्निमनुजेषु अग्निहोत्रिजनेषु हर्षं संजनयन् । पद्मिनीं आश्वा-सयन् । पद्मासद्म विकासयन् समुदयति । एतानि सर्वाणि विशेषणानि गोलनवांकुरेपि प्रयोक्तव्यानि । तेन एतत् गोलनवांकुरम् भास्कर इव गोलग्रन्थेषु समुदयति इत्यर्थोपि करणीयस्तेन गोलग्रन्थेषु एतस्य नवांकुरता भविष्यति ।

अथ गुरोः स्मरणपूर्वकं ग्रन्थारम्भणम्—
प्रवीणः स्वाधीनः श्रुतिनयनशास्त्रैकनिपुणो
हृषीकेशः श्रीमान् प्रमथपतिपुर्यां निवसति ।
गुरुर्मे तत्पादाम्बुजकृतमनाः वैदिकमिमं
खगोलं भूगोलं श्रुतिनयनगोलं चा रचये ॥३॥

अथ ग्रन्थकर्त्ता ग्रन्थारम्भणस्यादौ गुरोः स्मर-णम् करोति—मे गुरुः श्रीमान् हृषीकेशनामा प्रवीणः सर्वेषु शास्त्रेषु प्रवीणः, स्वाधीनः सर्वथा स्वायत्तः तत्तुल्यः कोपि न, एवंभूतः मम गुरुः श्रीमान् श्रिया युक्तः प्रमथपतिपुर्यां काश्यां निवसति, तत्पादाम्बुज-कृतमनाः अहं इमं वैदिकं खगोलं भूगोलं श्रुति-नयनगोलं ज्योतिषगोलं ग्रहगोलं अपि रचये रच-यामि इत्यर्थः ।

खगोल-विद्या :—

—विश्वम्—

अथानन्तमाकाशमेतत्पयोधे—
रिवाम्भोऽम्बुजै र्व्याप्तमस्तीह विश्वैः ।
अतस्तत्र दृश्यैकविश्वस्य किंचित्—
स्थितेर्वर्णनं मल्लिनाथः करोति ॥४॥

अथ शब्दो मङ्गलाचरणवाचकः, इह पृथिव्यां पयोधेः समुद्रस्यांभो जलं यथा अम्बुजैर्जलजन्तुभिः व्याप्तं, तथैव एतदनंतमाकाशं विश्वैर्व्याप्तमस्ति । अतस्तत्र तेषु विश्वेषु दृश्यस्य अस्माभिर्दृश्यस्ये-त्यर्थः । एकस्य अस्मदीयसूर्यरक्षितस्य विश्वस्य स्थितेः किंचिद्वर्णनं मल्लिनाथः करोति । अत्रैतदुक्तं भवति रात्रौ विस्फूर्यमाणा या अगणिताः तारा दृश्यन्ते तत्र प्रत्येकं तारा एकैकः सूर्यः । अस्मदीयसूर्योऽपि एकया लघुतारया तुल्यः, या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुतारा एव सः । एतादृश्यो बहुताराः सन्ति याः सूर्यतोऽपि बृहत्तराः । साधारण-दृष्ट्याऽस्माकम् दशसहस्रतोऽधिकास्तारा न दृश्यन्ते, परन्तु दूरवीक्षणयन्त्रेणेक्षिते कोटितोऽप्यधिकास्तारा दृश्यन्ते, पुनरपि न जाने कतिसंख्याकास्ताराः सन्ति या यन्त्रतोऽपि न दृश्यन्ते । एतद् ब्रह्माण्डमतिविशालम्, यत एतज्ज्ञातव्यं यावदाकाशं तारात्मकम् वयं द्रष्टुं समर्थास्तत्रैव ब्रह्मांडस्य सीमेति न । अस्मदुपाश्रयस्यास्य सूर्यस्य वा पृथिव्याः सर्वतः समीपं या तारा, तस्याः सकाशादस्मान् प्रति प्रकाशागमने सपादानि चत्वारि वर्षाणि लगन्ति । प्रकाशश्चैकस्यां विकलायाम् २१६०००० क्रोशान् गच्छति । अतो ज्ञातव्यं यस्याः तारायाः पृथ्वीं प्रति प्रकाशगमने पूर्वोक्तानि वर्षाणि व्यतीतानि भवन्ति पृथिवीतः कतिदूरस्थेति ? बहुतारा एवंभूता अपि सन्ति याभ्यः प्रकाशागमने लक्षवर्षाणि अपि व्यतीतानि भवन्ति । कति तारास्तु एवंभूता अपि सन्ति याभ्योऽतिवेगेनापि गम्यमानः प्रकाशः पृथिव्युत्पन्नकालादद्यावधि पृथिवीतलं न प्राप्तः । तथा एवमपि न ज्ञातव्यं याः सर्वास्तारास्ताः सूर्या एव, किन्तु आसु अपि कतिचित्ताराः सूर्याणामपि सूर्यास्तेषामपि महासूर्याः सन्ति । अस्यायमभिप्रायः, ब्रह्मांडमनन्तन्तज्ज्ञानं केवलमीश्वरस्यैव, परन्तु मनुष्यः प्राणी तेनैतादृशो रचितो यो यथा यथा अधिकं ज्ञानवान् भवति । तथा तथा तस्य सम्मुखे संसारस्य वैचित्र्यं प्रकटीभवति । अतो मनुष्यस्य विद्यते कर्तव्यमेतत , यत्संसारतत्वज्ञानाय प्रयत्नं कुर्यात् ।

अथ किमात्मकं प्रत्येकं विश्वमित्याह--

तथा तारकोल्काग्रहोपग्रहैः
केतुसंज्ञैर्मिथः कर्षणप्राप्तचारैः ।
अनेकाकृतिस्वत्ववर्णैः समन्ता-
त्सदा वेष्टितं विश्वमेतद्विशालम् ॥५॥

भाष्यम्—

प्रत्येकविश्वस्य मध्ये केन्द्ररूपः कोऽपि सूर्योऽवश्यमेव भवति, स च उल्काग्रहोपग्रहैः केतुसंज्ञैरपि सर्वतः सदावेष्टितं भवति । स चेन्महान् सूर्यस्तदा सूर्यात्मकैस्ताराभिरपि वेष्टितं भवति तदेवैतद्विशालं विश्वम् । एवमेवानेकानि विश्वानि भवन्ति । कीदृग्भिर्ग्रहोपग्रहकेतुभिः, मिथःकर्षणप्राप्तचारैः, मिथःपरस्पराकर्षणेन प्राप्तचारैर्लब्धगतिकैर्ग्रहादीनां गतौ वा कर्षणशक्तिरेव प्रधानं कारणमित्यभिप्रायः । तथाऽनेकार्क्रातस्वत्ववर्णैः, अनेका आकृतयो येषां तेऽनेकाकृतय, स्तथानेकस्वत्वैः अनेकाधिकारसहितैः स्वस्वाधिकारयुक्तैरित्यर्थः । अनेकवर्णैः ताराग्रहोपग्रहकेतुभिः एतद्विशालं विश्वं समन्तात्सदावेष्टितमस्तीत्यर्थः । एवंभूतान्यनेकानि ब्रह्माण्डानि सन्ति येषां भगवत एव ज्ञानम् । यतः स अनेकब्रह्माण्डानामधिपतिः अस्ति ।

अथाकर्षणशक्तिमाह

या सर्वगा सर्वगतिस्थितीनां
निमित्तभूता जगति प्रसिद्धा ।
संकर्षणाकर्षणशक्तिसंज्ञा
गुरुत्वमध्यादिबुधैर्निरुक्ता ॥६॥

केन्द्रोन्मुखी केन्द्रपराङ् मुखीति
द्विधा भवेत्सागतिरोध कार्ये ।
पिण्डस्य दूरस्थितिहेतुकार्यै
रनेकधा सा कथिता बुधेन्द्रैः ॥७॥

मिथः कर्षणप्राप्तचारैरितिपूर्वमुक्तमतस्तामाकर्षणशक्तिमाह । या सर्वगा सर्वव्यापिनी सर्वगतिस्थितीनां निमित्तभूता कारणभूता जगति प्रसिद्धा विश्वरचनायां मुख्यहेतुः । यया शक्त्या कृत्स्नं ब्रह्माण्डं स्थिरीभूतं यां विना भूपृष्ठादुच्छलितानामस्माकं पुनस्तत्रैवागमनं सम्भवेत् सा आकृष्टि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्मान्तराणीव स्थानान्तराणि

(ले० विद्याभूषणं श्रीगणेशरामशर्मा, झालावाड़)

पूर्वानुवृत्तम्—

केचन स्थानान्तरानुभविनो महाशया विशेषतश्च कार्यदक्षाः सुयोग्याः परिवर्तनप्रियाः पर्यटनरसिकाः स्थानान्तरान्नाल्पाल्पमपि प्रभाविता भवन्ति । ते तु दार्शनिका इव स्थितप्रज्ञा दशान्तराणीव स्थानान्तराणीति मनः समाधाय सदा सर्वदा तितिक्षापरा निश्चिन्ताश्च तिष्ठन्ति । एवंविधानां पक्षे तीर्थाटनानीव स्थानान्तराणि निष्पद्यन्ते । अपराधवृत्तीनां भ्रष्टाचारिणां प्रजोत्पीडकानां मते स्थानान्तराणि क्षेत्रान्तराणीव भवन्ति । तथाविधा

"गम्यतामर्थलाभाय, क्षेमाय, विजयाय च ।
शत्रूणां बुद्धिनाशाय पुनरागमनाय च ॥१॥"

इति श्रेयसे मन्यन्ते स्थानान्तरम् । इत्थंभूताः दुस्साहसं दधतो धृष्टा नौकराः नवं नवं स्थानान्तरमङ्गागतसत्ववृत्तिमिव स्थानान्तरमात्मविकाशाय स्वकर्मयोगसिद्धये च वरदानमिव मन्यन्ते । नवं नवं चरतां पाशविकवृत्तीनामभिसन्धिपूर्वकं कृतान्यपि स्थानान्तराणि नतापराधदण्डरूपाणि च परिणमन्ति, परं 'स्थानान्तर नापराधदण्डाय' इति प्रशासनान्तर्गतविधिविधाननियमेषु नैतिको हि डिण्डमघोषस्ततो न्यायनीतितः स्थानान्तराणि न कस्यापि सज्जनस्य दुर्जनस्य वा चरित्रमपन्नाधन्ते । एवं राजधर्मानुपालनाय स्थानान्तरं नामोभयलोकसिद्धये समर्थ्यन्ते तद्विशेषज्ञाः ।

अथ स्थानान्तराणां दोषपक्षेऽपि च लोकमते विविधा धारणा मतमतान्तराणि वा सन्त्येव । केचिद्वदन्ति यत् स्थानान्तराणि राज्यस्यापव्ययं कुर्वन्ति । स्थानान्तरितस्य जनस्यैकस्मात् स्थानादन्यत्स्थानं प्रति गमनात्तद्यातायातसम्बन्धी महानपव्ययो भवति प्रशासने । अन्ये कथयन्ति यत् स्थानान्तरेषु कृतेषु सत्सु सर्वकारीयविभागेषु सेवका अनायासमेव कार्यभारस्योत्तरदायित्वनिवृत्ता भवन्ति, कार्यकलापाश्चास्तव्यस्ततां व्रजन्ति ।

स्थानान्तरितस्य जनस्य व्यक्तिगतपक्षेऽपि स्थानान्तराणि काम्प्यवांछनीयां महतीं दुःस्थां स्थितिमापादयन्ति विशेषतो बहुपुत्रकलत्रवतो निर्धनस्याल्पशिक्षितस्य तत्र पुनर्युगपरिवर्तनजन्यैस्तीव्राघातैर्निपीडितस्य । भुक्तभोगाः सम्यक् जानन्ति यदद्यतने नव्ययुगे व्यतीतानां पञ्चदशवर्षाणां कालखण्डे तु स्थानान्तराणि मध्यमश्रेणिगतान् नौकरान् नितरामपीडयन् । समग्रस्य भूलोकस्य, निखिलानां राष्ट्राणां, विज्ञानस्य, राज्यक्रान्तीनां, विश्वयुद्धयोर्द्वयोः प्रभावात् ये ये सङ्कीर्णा जीवनसङ्घर्षक्लेशाः आविर्भूतास्तत्परिणामतस्तथा पुनरत्र भारते देशेऽस्माकं, बृटिशशासनसमयादारभ्याद्ययावज्जातानां घटनाचक्राणां तीव्रगतिवेगवशाच्च मानवजीवने नाना समस्या जटिलतमा उदभूवंस्ताभ्योऽपि च स्थानान्तराणि दुःखबहुलानि समभूवन् । महर्घतासमस्या, खाद्यपदार्थसमस्या, जीविकावृत्तये कार्याभावस्य समस्या, लुण्टाकानामुत्पातसमस्या, भ्रष्टाचारसमस्या, शिक्षासमस्या, बहुसंततिसमस्या, नौकरी-

---

शक्तिः, या गुरुत्वमध्यादिपूर्वा आकर्षणशक्तिसंज्ञका किल, गुरुत्वाकर्षणशक्तिः, मध्याकर्षणशक्तिः, केवलं आकर्षणशक्तिः इति कार्यवशात्संज्ञाभेदैर्व्यपदिश्यते । सा गतिरोधकार्यैर्हेतुभिः केन्द्रोन्मुखी केन्द्रपराङ्मुखीति भेदाभ्यां द्विधा भवेत् । सर्वेषां पिण्डानां स्वस्वाकर्षणशक्त्या केन्द्रोन्मुखमाकर्षणं भवति । अतो द्वयोः पिण्डयोर्यदि मिथ आकर्षणं भवेत्तदा एकस्याकर्षणशक्त्याऽन्यस्य गतिरोधनं भवति, तथाऽन्यस्य शक्त्या गतिप्रक्षेपणं च भवति । अतो महतः पिण्डस्य परितो भ्रमति । अतो गतिरोधनेन केन्द्रोन्मुखशक्तिः, गतिप्रक्षेपणेन केन्द्रपराङ्मुखशक्तिश्चोत्पद्यते । —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समस्या, इत्यादयः समस्या अनुभूयन्तेऽहर्निशं प्रजाभिः। एवंविधासु जटिलतमासु बह्वीषु समस्यासूज्जृम्भमाणासु यदि कस्यचिद् बृहत्कुटुम्बस्य जनस्य स्थानान्तरं भवति तदा तस्य बद्धमूलोऽपि सर्वो गृहस्थाश्रमोऽस्तव्यस्ततामासाद्य विप्रकीर्णः सन्नुच्छिद्यते। कुलसम्बन्धानां ज्ञातिसमाजसम्बन्धानां च सम्यक् निर्वाहे स्थानान्तरान्महद्वैषम्यमुत्पद्यते। जाते हि स्थानान्तरदर्शने नौकरस्य वराकस्य नौकरीदेव्यास्तामसं भीषणं च स्वरूपं प्रत्यक्षं भवति, स्थानान्तरं च तदमोघमायुधमिव दरीदृश्यते।

यदाहमेकदा ग्रीश्मावकाशतया स्वनियोगस्थानात् गृहगमनाय रेलगन्त्रीमार्गेण यात्रां कुर्वाणोऽभवं तदाकस्मात् कश्चिन्मम सुहृद् मिलितः। चलन्त्यां रेलगन्त्र्यां यदा वार्तालापः प्रारभत तदा सः स्थानान्तराणां स्वयं भुक्तानां वर्णनं मम पुरतो दुःखेनाकरोत्—

"सखे! त्वं जानीषे यदहं मध्यमवर्गीयोऽस्मि गृहस्थः। मम माता पिता च वृद्धौ वर्तेते। मामकीना भगिनी चैका विधवास्ते, सा च वैधव्यानन्तरं मम गृह एव वसति। मदीया भार्या, पञ्च पुत्रास्तिस्रः कन्याश्चेति त्रयोदशजना मम कुटुम्बिनः सदस्या विद्यन्ते। अमीषां सर्वेषामपि कौटुम्बिकानां भरणं, पोषणं, शिक्षा, दीक्षा च सर्वं मयेव कर्तव्यमास्ते। अहं षष्टिसंख्यकानां रूप्यकाणां वेतनं नौकरीं कृत्वा लभे। अनेनैवाल्पाल्पेन धनेनास्माकं सर्वेषां निर्वाहः कर्तव्यो भवति। स्वराज्यात् पूर्वमहं स्वग्राम एव पाठशालायामध्यापकत्वं कुर्वन्नासम्। परन्तु प्राप्ते स्वराज्ये प्रवृत्ते च नवीने शासने नूतनशासकैरधिकारिभिरहं स्वजन्मभूमेः स्थानान्तरितः। स्वगृहात् पञ्चशतक्रोशान् यावद्दूरमहं स्थानान्तरं कृत्वा प्रेषितः कांचिदन्यां पाठशालाम्। राजतन्त्रस्याज्ञा नतूचितानुचितापि वा नौकरेण सर्वात्मना परिपालनीयैव भवतीति कृत्वा मया स्थानान्तरं स्वीकृतम्। स्वनियुक्तिं पालयितुं गृहात् नव्यं स्थानमगच्छम्। यावदहं नव्यं स्थानं गत्वा पञ्चदशरूप्यकविनिमयेन मासिकशुल्केन गृहं प्राप्य गृहस्थोपयोगि वस्तुजातं क्रीत्वा सर्वसम्भारान् समगृह्णां, तावदेव मासप्राये समयेऽतीते मम ततोऽपि स्थानान्तरमजायत। ततो यावदहं कार्यालयात् लिखितरूपामाज्ञामादाय्रादृष्टपूर्वमश्रुतपूर्वं च स्थानं समगच्छ, कार्यभारं गृहीत्वा स्वनिवासस्थितिसुविधामर्द्धप्रायां क्रमशो व्यधां, किंचिदिव स्वस्थो भूत्वा नौकरीमाराधयेयमिति मनसि चिन्तयमानः स्वनीडं कल्पयितुमारभे तावदेव मे ततः स्थानात् स्थानान्तरस्यान्यदाज्ञापत्रमाप्नवम्। विवशतयाहं तस्मात् स्थानादपि प्रस्थातुं बाध्योऽभवम्। इत्थमेकस्माद्द्वितीयं स्थानान्तरं स्वीकुर्वाणोऽहमधुना पुनः स्थानान्तरितः पाठशालामन्यां प्रति जिगमिषुर्यात्रां कुर्वाणोऽस्मि।

"सुहृद्वर! किं वच्मि? भूयोभूयः स्थानान्तराणि परिपालयतो मम सर्वोऽपि पुरुषार्थः, सर्वापि योग्यता, समस्तोऽप्युत्साहो. धैर्यं, स्वास्थ्यं च समाप्ति जगाम। अहं स्थानान्तररोगात्पीडितोस्मि भृशम्। मन्ये, देशेऽस्माकमस्य रोगस्य चिकित्सैव नास्ति। न जाने, मादृशाः कियन्तो जनाः स्थानान्तरैः पीड्यमानाः स्युः। अस्य दग्धोदरस्य परिपालनार्थं मयाधुनावधि किं किं न कृतम्! एकनिष्ठया महतोत्साहेन च मया स्थानान्तराणि परिपालितानि। परमिदानीमहमेभिः स्थानान्तरैरतीव त्रस्तो भीतः क्लिष्टश्चास्मि। मम पक्षे त्विमानि स्थानान्तराणि जन्मान्तराणीवाजायन्त।"

तस्य मे सुहृदो वचांसि श्रुत्वाहं तमपृच्छम्:—
"बन्धो! तव कौटुम्बिकानामधुना का स्थितिः? यदि त्वं नातिकष्टकरमिव मन्यसे तदोच्यताम्—तव भार्या, भगिनी, पितरौ, बालकाश्च सर्वे कुत्र वर्तन्ते?"

स आह—'मित्रवर! अतीव करुणापूर्णा स्थितिर्वर्तते मम कुटुम्बसदस्यानाम्! पित्रोर्वार्द्धक्यम्, शिशूनां शिक्षाप्रश्नः, स्वसुर्मे विधवायाः समस्यान्या, धनदौर्बल्यं तथा गृहे ममानुपस्थितेः सर्वोऽपि गृहस्थाश्रमो विघ्नबाधाघातैः जूर्णो महतीं दयनीयां कष्टां च दशामनुभवन् वर्तते। षण्मासा व्यतीताः, परं नाद्यावधि वेतनमपि मया लब्धम्। मम यात्राव्ययस्ततो गृहसभ्यानां निर्वाहव्ययो बालानां शिक्षाव्ययश्च मया कर्तव्य एव भवति। परिणामतोऽ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरं भूतले लोकराज्यं चकास्तु

[ले० पं० म० वासुदेवशास्त्री बागेवाड़ीकरः शोलापुरम्]

जनाः सौख्यभाजो न दुःखं भजेयुः
सदा स्नेहभावं भजेरंश्च सर्वे ।
न कस्यापि चित्तं विशेन्मत्सरोऽपि
चिरं भूतले लोकराज्यं चकास्तु ॥१॥

दरिद्रो न कश्चिन्न वा दुर्बलोऽपि
बली पीडयेद् दुर्बलं नैव जातु ।
मिथः प्रीतियुक्ताः समग्रा भवन्तु
चिरं भूतले लोकराज्यं चकास्तु ॥२॥

क्षमा धीरता सर्वभूतानुकम्पा
मनःसंयमः शान्तिरेतैर्गुणौघैः ,
जना यत्र नन्दन्ति सर्वे नितान्तं
चिरं भूतले लोकराज्यं चकास्तु ॥३॥

नदीमातृका भूमयः सन्तु सर्वाः
प्रयच्छन्तु ताः कर्षकेभ्यः सुसस्यम ।
यतस्तेऽस्य देशस्य सौख्यस्य मूलं
चिर भूतले लोकराज्यं चकास्तु ॥४॥

न शास्ता न शास्यः स्वयं राज्यतन्त्रं
चलेत्संशयो लेशमात्रोऽपि नात्र ।
प्रवृत्तिः स्वकार्ये तथैवान्यकार्ये
चिरं भूतले लोकराज्यं चकास्तु ॥५॥

न कश्चिद्विहीनो जनो ज्ञानतोऽपि
न वा जन्मतो द्रव्यतोऽपीह राज्ये ।
प्रदीर्घायुरारोग्यतो नापि हीनः
चिरं भूतले लोकराज्यं चकास्तु ॥६॥

ऋतं मानसे वाचि सत्यं प्रजानां
अहिंसा गुणा यत्र पूर्णा वसन्ति ।
कथं वा समायाति दुःखं हि तत्र
चिरं भूतले लोकराज्यं चकास्तु ॥७॥

यदेकस्य दुःखं तदेवापरस्य
यदेकस्य सौख्यं तदेवाखिलस्य ।
विदुर्यत्र देवस्य तत्रैव वासः
चिरं भूतले लोकराज्यं चकास्तु ॥८॥

हमिदानीमृणभारभुग्नशिरस्कोऽस्मि ! भगवानेव रक्षतु मामस्मात् स्थानान्तरव्याधेः । सर्वकारतन्त्रे स्थानान्तरितानां नवकराणां वार्तामपि कोऽपि न पृच्छति । स्थानान्तरितेभ्यो ननु सहानुभूतेः समवेदनायाः कथा तु दूरापास्ता, स्ववेतनपत्राणां प्राप्तिरपि सुतरां दुर्लभास्ते । यदाहं कार्यालयान् प्रति भ्रामं भ्रामं स्ववेतनप्राप्तिसम्बन्धीनि कर्गलानि प्रेषयितुं निवेदयामि कार्यकरेभ्यस्तदा ते न किमपि स्पष्टमुत्तरं प्रयच्छन्ति । केचिच्छठाः कार्याधिकारिणस्तु मामुत्कोचदानं याचन्ते ! केचन मां दीनदीनं विभाव्य सनासाक्षिभ्रूसङ्कोचं घृणां प्रकटयन्तो दूरत एव स्वकार्यालयकक्षात् बहिष्कुर्वन्ति । केचन भ्रष्टाचारपरायणाश्चायपानं मत्तोऽभिलषन्ति । कथमहमेभ्यः स्थानान्तरेभ्योंमुक्तिं, लभेयेति न किमप्युपायान्तरं पश्यामि ।

तत एव मयोक्तम्—जन्मान्तराणीव स्थानान्तराणीति ।'

सुहृन्मुखादेतत्सर्वं श्रुत्वा मयाप्यत्र विषये बहु चिन्तितम् । वस्तुतः स्थानान्तरेषु कृतेषु सर्वकारस्यापि लाभापेक्षया हानिरेवाधिका भवति । यतः स्थानान्तरितो जनो नौकर्यां स्वस्थितिविषये स्थायिभावं नाश्रयति । नौकराः स्थानान्तरभिया कर्तव्येष्वपि शासकीयकार्यकलापेषु शङ्कातङ्कग्रस्ताः स्वोत्तरदायित्वस्य निर्वाहे मन्दोत्साहा निष्पद्यन्ते, विशेषतोऽल्पवेतनभोक्तारः । 'आधारोऽधिकरणम् !' इति सर्वेषामपि स्थित्यन्तराणां मूलाधारः । भूयो भूयः क्रियमाणानि स्थानान्तराणि राजकर्मचारिणां मनोभंगं कुर्वन्ति । नौकराणां व्यक्तिगते जीवने महतीमसुविधामनर्थकरीं निराशां दुष्प्रभावं च व्यामिश्रयन्ति । परिणामतो राज्यशासनतन्त्रे कार्यगतिं निरुन्धन्ति पुनः पुनः कृतानि जन्मान्तराणीव स्थानान्तराणीति ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वानुवृत्तम्

भारती-विजयम्

(ले० शठकोपः, विद्याप्रवीणः, आन्ध्राः)

नारदः— कोऽयं रोगः युष्माकम् ? कुत इदं वेषपरिवर्तनम् ? किमेतत् अन्यसंस्कृत्यवलम्बनम् ! (बालान् दृष्ट्वा) अरे एते युष्मत्कुमारा अपि तथैव परसंस्कृतिम् आश्रयन्ते ! नारायण ! नारायण !! यूयम् एवं भविष्यथ इति स्वप्नेऽपि नावलोकितं मया । अस्मत्पितरौ यदि जानीयातां युष्माकं नामापि न श्रूयेत । गच्छाम्यहम् ।

द्राविड़ी— भ्रातः ! किमेतत् ? वृथा कोपेन गच्छसि ? आगच्छ, ईषत् 'काफी' पीत्वा गमिष्यसि ।

नारदः— किमेतत् अश्रुतपूर्वं पानीयम् !

द्राविड़ी— त्वं कथं जानीयाः ? सर्वदा नारायण नारायण इत्येव जल्पसि । तद्विना अन्यत् किमपि न जानासि । पश्य, इयं 'काफी' रुच्या, कान्त्या च अमृतमपि परिहसति । अस्याः आङ्गलो संख्याः अनुग्रहेण इयम् अस्माक लब्धा । शृणु—

इयं 'काफी' कापि त्रिगुणभरिता भूरितपसा
गरीयस्या यस्याः खलु समुपलब्धा हि दयया ।
वयस्याङ्गल्याः, ग्लानिं ग्लपयति शरीरस्य सहसा
सकृत्पीता प्रीत्योषसि रदनशुद्धिं हिरुगपि * ॥

बालः— मातुल ! इदं सिगिरेट् अपि । अस्य धूमं पिब । कीदृशः आनन्दः भवेत्, द्रक्ष्यसि । शृणु—

सुधाभुजो वा वसुधाभुजो वा
मुधा हि सम्पन्न मुदावहेति ।
प्रधान्य भूरिव्ययमादधानाः
सदा स्वदन्ते शिखिरेत§ एतत् ॥

नारदः— अहो धाष्ट्र्यम् । धिक् धिक् । यूयं सर्वे भ्रष्टा अभवत । युष्माकं दर्शनमपि पापाय । सत्वरं गत्वा पित्रोः कथयिष्यामि । नारायण ! (निष्क्रान्तः) ।

(यवनिका)

षष्ठं दृश्यम्

(स्थानं—ब्रह्मलोकः ब्रह्मा सरस्वती च पद्मासने उपविष्टौ प्रविशतः)

सरस्वती— नाथ ! भूलोके अस्मद्दुहितरः कथं वर्तन्ते, किं वा कुर्वन्ति किमपि न ज्ञायते ।

ब्रह्मा— चिरञ्जीवी नारदः आगमिष्यति चेत् सर्वं ज्ञातुं शक्यते । (पुरः अवलोक्य) अयं नारदः । इत एव आगच्छति ।

नारदः—(प्रविश्य) नारायण । नारायण ।

सरस्वती— आगच्छ वत्स आगच्छ । किं भूलोकात् आगच्छसि वा ? का वार्ता ? तव सोदर्यः द्राविडिप्रभृतय कथं वर्तन्ते ?

नारदः— रुदितमिव वर्तते । सर्वाः भ्रष्टाः परकीयवेषभाषासंस्कृतिमत्यः सञ्जाताः । कीदृशे सम्प्रदाये जनित्वा कथं परिणताः । अहो ! अन्ये यदि जानीयुः तेषां पुरः शिरः उन्नमयितुमपि न वयं प्रभवेम । आङ्गली इति काचित् आगत्य एवम् अकरोत् मातः !

सरस्वती— किं वदसि ! मम पुत्र्यः भ्रष्टाः सञ्जाताः ? प्राणनाथ ! सत्वरं कमपि प्रेषय । अन्यथा अस्माकं महान् अपमानः सम्भवेत् ।

ब्रह्मा— परसंस्कृत्याः सख्येन अयमनर्थः सम्पादितः । हुम् । किमिदानीं कर्तव्यम् ।....भो महात्मन् !

महात्मा— (प्रविश्य) अयमस्मि । आज्ञापयतु गुरुदेवः ।

ब्रह्मा— त्वं सत्वरं भूलोकं गत्वा परस्परं कलहायमानाः परसंस्कृतिमतीः अस्मद्दुहितॄः बोधयित्वा स्वकीयसंस्कृतिं पुनरप्यवलम्बय ।

---

* हिरुक् अपि=त्यक्त्वा अपि ।

§ शिखिरेतः=सिगिरेट् इत्यर्थः । शिखिनः=अग्नेः, रेतः=धूमः (सारः) अस्मिन् अस्ति इति शिखिरेतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महात्मा— यथाज्ञापयति गुरुदेवः (इति निष्क्रान्तः)
(यवनिका)

सप्तमं दृश्यम्

महात्मा— (प्रविश्य) कुत्र मे सख्यः द्राविडीप्रभृतयः ? (विलोक्य) काश्चन इत एव आगच्छन्ति। बहुशः एता एव द्राविडीप्रभृतयः इति तर्कयामि। यावत् उपसर्पामि। (इति परिक्रामति)
(ततः प्रविशन्ति आङ्ग्ल्या साकं द्राविडी-प्रभृतयः)

महात्मा— (विलोक्य) कथं ! एताः ताः द्राविड़ीप्रभृतयः ! अहो, कीदृश्यः कथं परिणताः! का इयम् ? आसां मध्ये, श्वेतकाया, बिडालनेत्रा, कृत्तधूसरकेशा, मर्कटमुखी ? (आलोच्य) आम्। नूनम् इयं सा आङ्ग्ली ! अहो अस्याः सख्येन अस्मत्प्रियसख्यः द्राविडी-प्रभृतयः स्वसंस्कृतिभ्रष्टाः अभवन् ! कष्टं भोः कष्टम्। भवतु, कथमपि शान्तिमार्गेण एनाम् आङ्ग्लीं निष्कासयिष्यामि। (उपसृत्य) —सख्यः !...... ।

द्राविड़ीप्रभृतयः—सखे महात्मन् ! चिरात् दृष्टोऽसि। आगच्छ। अपि कुशलम् ? अस्मत्पितरौ अपि कुशलिनौ वा ?

महात्मा— तथैव। किन्तु, नारदमुखेन युष्मत्प्रवृत्तिं विज्ञाय पितरौ अतीव खिन्नौ स्तः। कोऽयं विकृतिवेषः ? अस्माकं सम्प्रदाये अद्ययावत् यः कोऽपि ईदृशवेषधारी आसीत् वा ? कीदृशे सम्प्रदाये जनित्वा कीदृशम् आचारम् अवलम्बध्वे ? अहो ! सधवाः अपि यूयं किमेतत् विधवावेषेण विहरथ !

आङ्ग्ली— वाट् महात्मन् ! को दोषः ? अहमेव उपादिशम् अस्मत्संस्कृतिम्। पश्य, त्वमपि अस्मत्संस्कृतिं स्वीकुरु। महति अधिकारपदे त्वां स्थापयिष्यामि। भूरि वेतनं च दापयिष्यामि।

महात्मा— धूर्ते ! एवं वञ्चयितुम् आगतासि ! त्यज भारतदेशम्। (क्विट् इण्डिया) सर्वं विदितमिदानीम्। तव संस्कृतीः शिक्षयित्वा अस्मान् अनाङ्गलेयान् अभारतीयांश्च कर्तुम् ईहसे वा ?

आङ्ग्ली— नो नो मिष्टर्। आङ्ग्लो इण्डियन्स् कर्तुम् ईहे। (सावहेलं) अहो युष्माकं संस्कृतिः। किमस्ति युष्माकं संस्कृतौ ?

महात्मा— यदस्ति युष्मद्देशमागत्य कथयिष्यामि। अथवा युष्माकं संस्कृतौ एव सर्वम् अस्ति नाम। प्रथमतः युष्माकम् अस्माकं च वर्णक्रमे एव व्यत्यासः। वर्णावल्यां वर्णानां पृथक् उच्चारणे वैरुद्ध्यम्। वर्णसम्मेलने उच्चारणभेदः। एवं बहुविधाः व्यत्यासाः सन्ति। अतः युष्मत्संस्कृत्या अस्मत्संस्कृतिः कदापि एका न भवेत्। यूयं यूयमेव, वयं वयमेव। गच्छ भद्रे। गच्छ यथागतम्।

आङ्ग्ली— (सासूयं) कस्त्वं ? मां प्रेषयितुं स्थापयितुं वा ? यासाम् आदरेण अहम् अत्र निवसामि ता एव वदन्तु, तदा द्रक्ष्यामि।

महात्मा— ओहो। एवं वा। विदितमिदानीम्। भवतु, (द्राविड़ीप्रभृतीनां पार्श्वं गत्वा) (अपवार्य) सख्यः ! किमेतत् ? युष्माकं सम्प्रदायं सदाचारं सर्वम् एकपदे विस्मृत्य परस्परं कलहं कुर्वन्त्यः, वाणिज्यमिषेण आगत्य युष्मासु भेदम् उत्पादितवत्याः अस्याःआङ्ग्ल्याः पाशे अपतत। इयम् आङ्ग्ली युष्मान् दीनाः दासीः कृत्वा सर्वं स्वातन्त्र्यं विनाश्य, आत्मनः चक्रवर्तित्वं ख्यापयति।

हिन्दी— सत्यमेव महात्मन्। इदानीं ज्ञातं मया। अस्माकं सर्वं स्वातन्त्र्यं विनष्टम्। कथं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनरप्यस्याः आङ्ग्ल्याः हस्तात् विमुक्तिः भवेत् ?

महात्मा— किमस्ति ? पुनरपि यूयं एकचित्तीभूय स्वस्वसंस्कृतिम् अवलम्ब्य अस्याः आज्ञां तिरस्कुरुत । इमां च अस्मद्देशात् निष्कासयितुं प्रयतेध्वम् । अहमपि विदेशेषु अटित्वा अस्मत्संस्कृतिं प्रख्यापयिष्यामि ।

हिन्दी— तथैव महात्मन् ।……अहो ! अस्मान् स्वायत्तीकर्तुम् इयमाङ्ग्ली कीदृशीं व्यूहरचनाम् अकरोत् ! सोदरि आन्ध्रि ! वङ्गि ! सर्वाः आगच्छत । अस्मासु भेदभावम् उत्पाद्य इयम् आङ्ग्ली अस्माकं सौहार्दं अनाशयत् । वयं सर्वाः एकीभूय इदानीमेव ताम् अस्मद्देशात् निष्कासयेम । (आङ्ग्लीम् उपसृत्य) अयि आङ्ग्लि ! तव व्यूहरचना व्यक्ता अभूत् । तत् इतः परं तव सख्यम् अस्माकम् अनावश्यकम्, त्वम् इदानीमेव अस्मद्देशं विहाय गच्छ । (क्विट् इण्डिया) अन्यथा……।

आङ्ग्ली—(स्वगतम्) हुम् । कोऽयं महात्मा । मम स्वेच्छाधिकारं नाशयितुम् आगतः पापात्मा । अथवा मम दौर्भाग्यमेव । चोरयन्तं वृश्चिकः दशेत् चेत् कथं सः क्रन्देत् ? अस्तु, तथापि सख्यभावेनैव इमं देशं त्यक्त्वा गमिष्यामि । यथा मम संस्कृतिं मां च चिरं न विस्मरेयुः तथा करिष्यामि । (प्रकाशं) सख्यः ! मास्तु कोपः । मम किमस्ति अत्र ? अहं वाणिज्यविषयेण आगता आसम् । युष्माकं प्रार्थनया एतावत्पर्यन्तम् अतिष्ठम् । इदानीं युष्माकं इच्छा नास्ति चेत् गमिष्यामि । किं मम देशो नास्तीति मन्यध्वे ? वातुलाः यूयम् ।… सखि हिन्दि ! त्वया साकं एकान्ते किञ्चित् वक्तव्यमस्ति । अत्र आगच्छ । (कर्णे एवमिव ।) (प्रकाशं) अस्तु, यूयं क्षेमेण युष्मत्पुत्रान् पालयत। अहं गच्छामि । तदा तदा मां स्मरत । (परिक्रम्य) सखि द्राविडि ! इत एहि । त्वया साकमपि किञ्चित्कथनीयमस्ति । (कर्णे एवमिव) (प्रकाशं) मद्वचनं मा विस्मर । अहं गच्छामि पुनर्दर्शनाय । गुड् बाइ ।

महात्मा— तिष्ठ । अहमपि त्वया साकं युष्मद्देशमागत्य अस्मत्संस्कृतेः महत्त्वं प्रकटयिष्यामि ।

आङ्ग्ली—बाढम् । सत्वरं आगच्छ । 'एरोप्लेन्' वेला भवति । (निष्क्रान्तौ)

हिन्दी— सोदर्यः ! इतः परं यूयं सर्वाः अपि मम आज्ञामेव पालयेत ।

द्राविडी— (स्वगतम्) आङ्ग्ली यत् अवदत् तत् सत्यमेव । इयं हिन्दी सर्वासाम् अस्माकम् उपरि आधिपत्यं वोढुम् आङ्ग्लीं निरकासयत् । कुतः अहम अङ्गीकुर्याम् ? सर्वथा अहं प्रतिघटिष्यामि । (प्रकाशं) अयि हिन्दीसोदरि ! किं तव शिरसि शृङ्गे स्तः ? येन त्वदाज्ञां वयं पालयेम ।

हिन्दी— 'अनायका विनश्यन्ति' इत्युक्तं महद्भिः । अतः यया कया वा अस्मासु नायिकया भवितव्यम् । तत्र यस्याः प्रचाराधिक्यं सैव नायिका भवितुं योग्या इति हेतोः अहम् अवदम् ।

द्राविडी— साधु । तव प्रचाराधिक्यम् अस्तीति त्वं यदि नायिका भविष्यसि तदा तव पुत्राः अस्मत्पुत्रान् सुलभतया आक्रामेयुः । कीदृशी स्वार्थपरता ! नेदं कदापि अङ्गीकार्यम् ।

हिन्दी— तर्हि त्वमेव नायिका भव । का मे क्षतिः ?

आन्ध्री— तथा चेत् अहम् असमर्था वा ?

वङ्गी— एवं चेत् द्राविड्या यत्पृष्टं, स एव प्रश्नः पुनरपि पतेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्राविडी— जानाम्यहं पूर्वमेव । ईदृशः विवादः अस्मासु भवेदेव इति । अतः आंग्लीमेव आहूय पुनरपि नायिकापदे अभिषेक्ष्यामः । किं वदत ?

हिन्दी— तथा कर्तुं सर्वथा नाहमङ्गीकुर्याम् । तथापि …………. ।

सरस्वती— (प्रविश्य स्वगतम्) महात्मा भूलोकं गत्वा नैव आगतः । तत्र मम पुत्र्यः कथं वर्तन्ते, किं वा कुर्वन्ति किमपि न ज्ञातम् । अस्तु, अहमेव गत्वा ज्ञास्यामि । (परिक्रम्य अवलोक्य) कथम् एता मम दुहितरः अत्रैव स्थित्वा किमपि संलपन्ति । यावत् उपसर्पामि (उपसर्पति) ।

द्राविडी— कथय सोदरि, अवशेषं कथय ।

हिन्दी— अस्मासु कस्यचन निर्णयस्य स्थिरीकरणं यावत् आंग्ली यदि तिष्ठति तिष्ठतु नाम । तदनन्तरं सा इतः गच्छेदेव ।

सर्वा— साधु साधु । रमणीयो निर्णयः ।

सरस्वती— (श्रुत्वा) (सकोपं) श्रुतं सर्वम् । रमणीयो निर्णयः । किं युष्माकं मतिः भ्रान्ता वा ? अहम् अद्यापि जीवाम्येव । किं मां मृताम् अमन्यध्वम् ? मम कदापि मरणं नास्ति । अहम् अमरभारती । यावत्पर्यन्तम् अहं जीवामि तावत् पर्यन्तं युष्मान् अन्यां कांचित् परिपालयितुं नाहमंगीकुर्याम् । पितुर्वचनमुल्लंघ्य आंग्ल्याः सख्येन ईदृशः उपप्लवः सम्पादितः । महात्मना कथंचित्प्रेषितापि सा युष्मासु भेदभावमुत्पाद्य गतवती वराकी । तां पुनरपि आह्वयितुम् ईहध्वे । लज्जा नास्ति ! कदलीदलं कण्टके, कण्टकं वा कदलीदले पततु, क्षतिः कस्य ? इतः परं यूयं सर्वाः मम माध्यस्थ्यम् अवलम्ब्य स्नेहभावेन स्थिता अत्र आगमनप्रयोजनं साधयत । यूयं सर्वाः एकस्याः मातुः दुहितरः । इतः परं जागरूकतया वर्तितव्यम् ।

द्रा० प्रभृ०—अम्ब ! अज्ञानेन त्वच्चरणारविन्दयोः महान् अपराधः कृतः अस्माभिः । क्षमस्व अम्ब क्षमस्व । इदानीम् अस्माकं जागृतिः सञ्जाता ।

सर्वाः— (गायन्ति)

गीतम्

कज्जलपूरितलोचनधारे--स्तनयुगमण्डितमुक्ताहारे ।
वीणापुस्तकशोभितहस्ते-भगवति भारति देवि नमस्ते ।
कञ्जदलायतनेत्रे--निगमागमसत्पात्रे
दशदिक्ख्यातचरित्रे--भारति जय सुपवित्रे ।

नारदः— (प्रविश्य) नारायण नारायण ! अम्ब । महान् विजयः साधितः ।

महात्मा— (प्रविश्य) न केवलं भारते एव भारतीविजयः । अपितु विदेशेष्वपि भारतीविजयः उद्घोषितो मया ।

सरस्वती—वत्स ! अहिंसायुद्धेन शत्रून् निष्कास्य त्वया अयं देशः आदर्शप्रायतां नीतः । चिरंजीवी भूयाः ।

महात्मा— अम्ब ! तव अनुग्रहस्यैव फलमेतत् । किं ते भूयः प्रियमुपकरोमि ? तथापि इदमस्तु—

स्वातन्त्र्यं संस्कृतीनां विलसतु
जगति स्वस्वदेशस्थितानां
सत्याहिंसे च शान्तिः निखिल-
जनततेः सम्भवन्त्वाशु चित्ते ।
सर्वे जीवन्तु मैत्र्या, न च भवतु
पराक्रान्तिलोभो नृपाणां
दारिद्र्योन्मूलनाय प्रतिगृहमनिशं
भ्राम्यतात् धर्मचक्रम् ॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"संस्कृतं स्याद् राष्ट्रभाषा"

श्री "पद्म" ओझा, शास्त्री, साहित्यसदनं ब्यावरः (राजस्थान)

अयि ? स्वराज्यादद्य दशवर्षाणि नूनं व्यपगतानि
का दशा जाताऽधुना शिक्षाजगति विवृणोमि तानि ।
हन्त कोलाहलयुतेऽस्मिन्नवयुगे वयमद्य दासाः
संस्कृतं स्याद् राष्ट्रभाषा ॥

पूर्वमासीदेकभाषा संस्कृतिः खल्वेकवेषः
आहिमालयपर्वतात् कन्याकुमारीतः प्रदेशः ।
शान्तिरासीदत्र मनुजा निर्भया ननु सुखदवाताः
संस्कृतं स्याद् राष्ट्रभाषा ॥

सांप्रतं खल्वांग्लभाषा-भाषिणां साम्राज्यमस्ति
भारते पश्यन्तु विबुधाः किं स्वराज्याल्लाभ अस्ति
विस्मृतमृषिगौरवं किं भारतीया विगतपाशाः ?
संस्कृतं स्याद् राष्ट्रभाषा ॥

भारती संस्तूयते पाश्चात्यभाषाविबुधवर्यैः
कथ्यते सुरभारती वैज्ञानिकी चेत्यपि कदर्यैः ।
किं मुधा पाश्चात्यभाषालोलुपा वयमद्य जाताः
संस्कृतं स्याद् राष्ट्रभाषा ॥

नास्ति किं लोके समस्ते प्राग्भवः ऋग्वेदमन्थः
भारतं, रामायणं स्मर, तत्सनातनधर्मतन्त्रः
तत्कथं मोहंगता श्रीकृष्णगीता समरगाथाः
संस्कृतं स्याद् राष्ट्रभाषा ॥

भारते समुपागता भाषासमस्या सम्मुखीनाः
तत्सुता हिन्दी, न जाने, विगतपतिविधवेव दीना ।
साम्प्रतं वयमेकतन्त्रात् संहरेमहि विघ्नबाधाः
संस्कृतं स्याद् राष्ट्रभाषा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहल्या

[ले० दीनानाथत्रिवेदी 'मधुपः' जयपुरम्]

यन्नामस्मरणात् कल्ये कल्याणं लभते जनः ।
साऽहल्या रामसंछिन्नशापशल्या तपस्विनी ॥

पुरा पुण्यतमायामस्यां भारतभूमौ बह्व्य एव पातिव्रत्यपरायणाः सच्चारित्र्यपरिपूतान्तः-करणा महाविदुष्यो रमण्यो जनिं लेभिरे, यासां नाम्नामुच्चारणेन प्रातः संस्मरणेन च भारतीया धर्मधना जना अद्याप्यात्मानं धन्यं मन्यन्ते । स चायं स्मरणश्लोकः—

'अहल्या द्रौपदी तारा सीता मन्दोदरी तथा ।
पञ्चकं ना स्मरेन्नित्यं महापातकनाशनम् ॥'

आसीत्तासामेकतमा समतिक्रान्तबाल्या अहल्याऽभिधा ललनाकुलललामभूता परमसुन्दरी स्त्री । सा हि ब्रह्मणा गौतमाय महर्षये दत्तेति स्मर्यते । तथा हि (अध्यात्मरामायणे बालकाण्डे ५ सर्गे)—

'शृणु राम पुरावृत्तं गौतमो लोकविश्रुतः ।
सर्वधर्मभृतां श्रेष्ठस्तपसा राधयन् हरिम् ॥१६॥
तस्मै ब्रह्मा ददौ कन्यामहल्यां लोकसुन्दरीम् ।
ब्रह्मचर्येण सन्तुष्टः शुश्रूषणपरायणाम् ॥२०॥

गौतममहर्षिणा च सह तस्या अहल्यायाः सम्बभूव विवाहसम्बन्धः । सानन्दं निवसतोस्तयोः कालो व्यत्येति स्म । गौतमस्य सम्बन्धात् साऽपि परमविदुषी महातपस्विनी चाऽभूत् ।

अथानुश्रूयते देवराजः शचीपतिस्तस्या अनुपमं सौन्दर्यं दृष्ट्वा तदाऽऽसक्तमनाः सम्बभूव । एवमेकदा निशीथान्ते सुरपतिरिन्द्रः* कुक्कुटध्वनिं कृतवान् । तेन च महर्षिः शयनादुत्थाय स्नानवेलां सम्प्राप्तामभिज्ञाय च स्नानार्थं नदीतटं प्राप ।

*'इन्द्रसाहाय्यसम्पादनार्थमागतश्चन्द्र एव कुक्कुटरुतं चकार,' इत्यपि केचिद्वदन्ति ।

तदैवाऽवसरमिमं लब्ध्वा धृतगौतमवेषोऽसुरद्वेषो देवराजो गौतमाश्रमं प्रविश्याऽहल्यां च सम्भोगार्थं प्रेरितवान् । आसीत्तदा रात्र्याः समयः । असमाप्तपूर्णनिद्रैव प्रबुद्धाऽहल्या । तदानीमपि तस्याः नेत्रयोः स्थितिं नात्यजत् निद्रा । सा शक्रस्य तमिमं कपटं न प्रत्यभिज्ञातवती तदा । अत एव सा सुरराजस्य कथनमंगीचकार, परं शीघ्रमेव सा शङ्काऽऽकुलाप्यजायत । स्वस्य सर्वनाशमाशङ्कमाना साऽन्ते विज्ञातवती यन्नायं गौतमः, अपि तु देवराज इति । ततस्तु महर्षेः कोपं स्मृत्वाऽतिवेपमाना सा भृशं शक्रं भर्त्सितवती ।

वाल्मीकिरामायणे तु—

"तस्यांतरं विदित्वा च सहस्राक्षः शचीपतिः ।
मुनिवेषधरो भूत्वा अहल्यामिदमब्रवीत् ॥१७॥
ऋतुकालं प्रतीक्षन्ते नार्थिनः सुसमाहिते ।
संगमं त्वहमिच्छामि त्वया सह सुमध्यमे ॥१८॥
मुनिवेषं सहस्राक्षं विज्ञाय रघुनन्दन !
मतिं चकार दुर्मेधा देवराजकुतूहलात् ॥१९॥
अथाऽब्रवीत् सुरश्रेष्ठं कृतार्थेनान्तरात्मना ।
कृतार्थाऽस्मि सुरश्रेष्ठ ! गच्छ शीघ्रमितः प्रभो !२०'

इत्युक्तरीत्या देवपतिना सह अहल्याकर्तृकः संभोगः सुस्पष्टं प्रतीयत एव । इन्द्रेण सह कामक्रीडायां तस्याः प्रवृत्तिरपि देवराजकुतूहलादेव । एवं सम्भोगान्ते तु मरुत्वान् स्तेन इव गौतमाश्रमाद् यावद्द्रुतगत्या पलायनं कर्तुं चकमे, तावदेव गौतमोऽपि कृतस्नानो धृतसमित्कुशः समाजगामैव । धावति च तस्मिन् मघोनि गौतमस्य दृष्टिर्निपपात । महर्षेः तस्य च कोपात् सर्वे देवदानवादयोऽपि बिभ्यति स्म । अतएव समागतं मुनिं विलोकयतः शतक्रतोरपि मनसि महाभीतिरुदपद्यत । तदा स पदात्पदमपि गन्तुं न शशाक । महामुनिमेनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोपे साक्षादग्निमेव मन्यमानो मरुत्वान् विषण्णवदनो बभूव ।

तदा क्रोधताम्राक्षो मुनी रोषादुवाच—हे दुर्मते ! कामान्धेन त्वया मम भार्यायां अनार्यमाचरितम् । अतस्त्वं 'विफलो भवे'ति शशाप । एवं मुनौ ब्रुवत्येव क्षणादिन्द्रस्य वृषणौ पेततुर्भूमौ । परमध्यात्मरामायणे तु—

'योनिलम्पट ! दुष्टात्मन् सहस्रभगवान् भव ।'*
इत्येवं महर्षिणा मघवा शप्तः ।

अतः परमहल्यां शशाप—दुष्टे त्वमत्राश्रम एव सुदीर्घं कालं यावत् तथा निवस, यथा नान्यस्त्वां कोऽपि ज्ञातुं शक्नुयात् । किंचैवं जलपानमप्यकुर्वती भूमावेव पतिता तिष्ठेति । अथ सा 'भगवन् ! ममायं महानप्यपराधः कृपालुना भवता क्षम्यतामि'ति सविनयं पतिमभ्यर्थयामास । तदा महाकारुणिकः स मुनिस्तु—यदा दशरथात्मजः श्रीरामचन्द्रो घोरमिदं वनमायास्यति, त्वां च स्प्रक्ष्यति, तदा तव समुद्धारो भविष्यति—इत्युक्त्वा तत्रैव चैनां त्यक्त्वा हिमवन्तं नगोत्तमं जगाम तपस्तप्तुम् ।

एवं तदाप्रभृत्येवाऽहल्या बभूव शिलामयी । बहूनि च वर्षाणि तत्रैव स्थितिश्चकार च । यदैव भगवान् लोकाभिरामः श्रीरामः सह विश्वामित्रलक्ष्मणाभ्यां तत्राजगाम, विश्वामित्रस्तदा तदाश्रमस्य पुरातनं समुपवर्ण्य सर्वमितिहासं समादिष्टवान् रामं, भद्र ! निजचरणरजःस्पर्शेनैनां समुद्धरेति । एवं गुरोरादेशमनुपालयतो भगवतो रामस्य पादरजःस्पर्शमात्रेणैव सा क्षणात् तत्याज शिलामयीं तनुम् । ★ क्रमशः

*मम रूपं समास्थाय कृतवानसि दुर्मते ।
अकर्तव्यमिदं यस्माद्विफलस्त्वं भविष्यसि ॥
गौतमेनैवमुक्तस्य सुरोषेण महात्मना ।
पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् ॥

इति रामायणद्वयवचनावलोकनेन मुनिदत्तः शापो द्विविधो दृष्टिमायाति, तथापि तस्य समाधानं कल्पभेदेन कर्तुं शक्यते विद्वद्भिरिति ।

हरिनगर शूगर मिल्स लि०

★★★ फेक्टरी ★★★

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा–रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई–२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन शुगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधानत्वम्

पुर्वानुवृत्तम्— मान्याः श्रीमोतीलालशर्माणः, मानवाश्रमः, दुर्गापुरा

विज्ञानं. विद्या वाभिन्नौ पदार्थौ । तदिदं विद्यारूपं विज्ञानं पाश्चात्ये बुकेवलमेकाङ्गेन पदार्थविज्ञानेनैव परिसमाप्तमिति स्पष्टं तद्विज्ञानस्यापूर्णत्त्वम् । अस्तु–पराधिकारचर्चया न कश्चिल्लाभोऽस्माकमिति समालोचनयात्रैव विरम्यते । पूर्वोक्तेषु पदार्थ-शारीर-तारा-विज्ञानेषु प्रथमं तावत् पदार्थविज्ञानमेव संक्षेपेण विज्ञानविदां पुरत उपस्याप्यते । उक्तं पूर्वं-पाञ्चभौतिकेऽस्मिन् विश्वे घनाः–द्रवाः–बाष्पाः इति कृत्वा त्रिविधा एव पदार्था अवलोक्यन्ते । येषां पदार्थानां परमाणवोऽतिशयेन संहता भवन्ति, ते घनाः । भूः–अश्मा–आदर्शः–वज्रम्–अस्थि–मांसमित्यादयः । येषां तु पुनरवयवाः किञ्चित्श्लथा भवन्ति, ते द्रवा जलादयः । ये तु विरलावयवास्तेजोवाय्वादयस्ते बाष्पाः । तदित्थं सैषा पदार्थविद्या एतेष्वेव त्रिषु भावेषु पर्य्यवसितेति विभावनीयम् । पदार्थविज्ञानसम्बन्धे भारतीयानां पञ्चतत्ववादोऽतीव सुप्रसिद्धः । मोहमयेऽस्मिन् भ्रान्तयुगे कल्पनारसिकैर्नवनवोन्मेषशालि–विज्ञानोपासकैस्तत्र भवद्भिः पाश्चात्यैः–यथोपवेदभूतस्यायुर्वेदशास्त्रस्य युक्तियुक्तो विज्ञानसिद्धस्त्रिदोषवाद उपहस्यते, तथैव पञ्चतत्ववादेऽपि तेषामुद्गारास्तथैव भ्रान्ताः, इति के नाम विज्ञानविदो न मन्येरन् । "प्रत्यक्षदृष्टानि पञ्चमहाभूतानि सर्वथा योगजानीति न तानि तत्वकोटौ निवेशयितुं शक्यानि" इति हि तेषामुद्गाराः । तत्र पृथिवीतत्वं तावत् स्वर्ण-रजत-लौह-हीरक-पारद-गन्धकादीनां सप्ततितत्वानां समष्टिरूपमिति न कदाचिदपि तत्तत्वं भवितुमर्हति । हाइड्रोजन-आक्सिजन-तत्वयोर्नियतमात्रया रासायनिकसंयोगेनोत्पन्ना आपः अपि तत्वसीमया वहिष्कृता एव । एतयोरेव संश्लेषसिद्धो वायुरपि तत्वातिक्रान्तमर्य्याद एव । अग्निशब्देन यदि तापाख्यः पदार्थोऽभिप्रेतः–तर्हि तु स अवस्थाविशेष एव । एवं सति नाग्निः कश्चित् स्वतन्त्रः पदार्थः । सुप्रसिद्धा ज्वाला यद्यग्निशब्देन विवक्ष्यते, तर्हि सः आक्सिजन-अङ्गाराख्यतत्वयोः संयोगादुत्पन्नः कश्चिद्यौगिक एवार्थः स्यात् । एवमेव शून्यरूपत्वेनाकाशस्यापि न तत्वभावत्वमिति तत्वपारदर्शकानां ? पाश्चात्यानां महतीयमनर्गला वाक्परम्परा । वयं तु ब्रूमः–अवश्यमेव पृथिव्यादीनि तत्वानि । भारतीयविज्ञानशास्त्रे भौतिकविज्ञानसम्बन्धे गुणभूतानि, अणुभूतानि, रेणुभूतानि, महाभूतानि–इति कृत्वा भूतप्रपञ्चसम्बन्धीनि चत्वारि विवर्त्तानि । तत्र शब्द-स्पर्श-रूप-रस-गन्धाख्यानि, पञ्चतन्मात्रारूपेण सांख्यनये प्रस्तुतानि सर्वथा अयोगजानि मूलभूतान्येव गुणभूतानि । त्रिंशत्परमाणुसंयोगजानि तान्येवाणुभूतानि । पञ्चीकृतानि तान्येवाणुभूतानि महाभूतानि । तत्र गुणभूतान्यणुभूतान्येव चैकद्रव्यत्वादिह तत्वानि विवक्ष्यन्ते । न त्वपराणि महाभूतानि । तेषां पञ्चीकृतरूपत्वेन-भारतीयैरेव यौगिकत्वं स्वीकृतमिति पाश्चात्यैरत्र तत्ववादे यत्किञ्चिदभिहितं, तत्तेषां प्रौढिवादमात्रमेवेत्यलमतिपल्लवितेन । आत्मविद्यायां यथा भारता गुरुः सर्वेषां, तथैव भूतविद्यायामपि वेदैकशरणो भारतः सर्वमूर्द्धन्य एवेति निःसन्दिग्धम् ।

तानि चैतानि भूतजातानि वाङ्मयानीति नः सिद्धान्तम् । "वाचीमा विश्वा भुवनान्यर्पिता"—'अथो वागवेदं सर्वम्' इत्यादिश्रुतिवचनैस्तथैव सिद्धान्तितत्वात् । सैषा वाक् मर्त्याकाशात्मिका इन्द्रपत्नी एव बलग्रंथिभ्यः प्रथमं वायुरूपे परिणता भवति । वायुश्च तेजोरूपे, तेजश्वाब्रूपे परिणतं भूत्वान्ततः पृथिवीरूपतामापद्यते । तदित्थं वागात्मक आकाश एव सर्वभूतानां प्रभवो मूलप्रतिष्ठा, नामरूपयोर्निर्वहिता च । तथा चाह श्रुतिः—

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी" । "आकाशो वै नामरूपयोर्निर्वहिता" ।

आत्मा खल्वन्यो विश्वाधिष्ठाता । तदिमात्मतत्वं अखण्ड-सखण्ड-भेदेन द्विधा विभक्तो द्रष्टव्यः । सर्वबल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशिष्टो रसमूर्तिरमायी परात्परोऽसीमः कश्चनाविज्ञेय-तत्वविशेषोऽखण्डात्मा । तस्मिन्नेतस्मिन्नखण्डधरातले मायोपाधिकृतावरणात्—मायावच्छिन्नो मायी महेश्वरः प्रादुर्भूतो भवति सहस्रवल्शोऽश्वत्थमूर्तिरव्ययः पुरुषः । परात्परे त्वस्मिन्नसीमे अनन्तानि मायाबलानि नित्यं प्रतिष्ठितान्युदयास्तभावमयानि । तेषु चैकैकं मायाबलमेकैकस्य मायिनो महेश्वरस्य स्वरूपसमर्पकमिति कृत्वा परमेश्वरमूर्तौ तस्मिन् परात्परगर्भेऽनन्तमहेश्वराणां प्रतिष्ठावगम्यते । परात्परस्तु परमेश्वरः सर्वथा सर्वदा एक एव । तत्र चानन्ता महेश्वराः प्रतिष्ठिताः । एकैकस्मिन् महेश्वरे सहस्रसंख्याकाः प्राजापत्याः पंचपुण्डीरा वल्शाः । एकैकस्यां वल्शायां वेदसृष्टेरधिष्ठाता प्राणमयो ब्रह्मा स्वयम्भूः, लोकसृष्टेरधिष्ठाता आपोमयो विष्णुः परमेष्ठी, प्रजासृष्टेरधिष्ठाता वाङ्मयः इन्द्रः सूर्यः; भूतसृष्टेरधिष्ठाता अन्नादमयोऽग्निः पृथिवीरूपः, धर्मसृष्टेश्चाधिष्ठाता अन्नमयः सोमश्चन्द्रमाः—इति कृत्वा पंच पंच पर्वाणि । स एष पचपुण्डीरात्मकावच्छिन्न एक ईश्वरः। एतादृशा वल्शात्मकाः सहस्रेश्वरास्तत्रैकस्मिन् महेश्वरेऽश्वत्थमूर्तौ नित्यमवतिष्ठन्ते । ईश्वरावयवभूता स्वयम्भुरूपा प्रथमा वल्शा परमप्रजापतिः . अन्ये च परमेष्ठ्यादयः पृथिव्यन्ताः खण्डात्मान उपेश्वराः । स एष उपेश्वर एवोपास्यः, नेश्वरः, नापि महेश्वरः । का कथा—असीमस्य परात्परस्य निराकारस्येति स्पष्टं गीताविज्ञानभाष्ये उपासनाकाण्डरहस्ये-इति तत एवावगन्तव्यम् । योऽयमसीमो निराकारः परात्परः, स सर्वथा अनुपास्यः, अविज्ञेयः, इति कृत्वैवाहोपनिषच्छ्रुतिः—

संविदन्ति न यं वेदा विष्णुर्वेद न वा विधिः ।
यतो वाचो निवर्तन्ते-अप्राप्य मनसा सह ॥१॥
यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥२॥

स्मृतिरप्याह—

अतीतः पन्थानं तव च महिमा वाङ्मनसयो—
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि
स स्य स्तोतव्यः कतिविधगुणः कस्य विषयः ।

—क्रमशः

ओरियण्ट पेपर मिल्स

निम्नलिखतानि वस्तूनि निर्मीयन्ते

बन्धनाय:-

(१) एम्. जी. रिब्ड क्राफ्ट
(२) एम्. एफ्. अनरिब्ड क्राफ्ट
(३) अक्लेद्य (वाटरप्रूफ) क्राफ्ट
(४) क्रेप क्राफ्ट

लेखनाय, मुद्रणाय च:-

(१) श्वेतपत्रम्
(२) क्रीमरङ्गस्य
(३) अर्धश्वेतीकृतपत्रम्
(४) अश्वेतीकृतं पत्रम्

आवरणाय-पेटकानां, पुटकानां च निर्माणाय कार्टनबोर्ड, ग्रेबोर्ड, डुप्लेक्स, ट्रिप्लेक्स, कार्ट्रिज, टिकटबोर्ड, आवरणवर्ड प्रभृतिवस्तूनि निर्मीयन्ते ।

ओरियण्ट पेपर मिल्स (सीमितम्)

प्रबन्धाभिकर्त्तारः-बिरलाबन्धवः [स्वतन्त्रम् सीमितम् बजरङ्गनगर, (उडिसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

त्रिशङ्कोरुपभोगाय न द्यौरपि न गौरपि

अंग्रेजीशासनारम्भादेव भारतीयाः पाश्चात्यशिक्षाभिमुखा एव शिक्षाक्षेत्रेऽभ्युन्नतिं कामयन्ते, कुर्वते च। स्थानस्थानतः प्राचीनशिक्षाकर्णधाराणां विशेषतः संस्कृतशिक्षाकार्यकर्तृणां प्रतिवर्षं परिणामविवरणानि (रिपोर्ट) प्रकाश्यन्ते यद् भारते 'संस्कृतशिक्षाक्रमः प्रतिवर्षं ह्रासोन्मुख एव दृश्यते। उपरितो यथा यथा सर्वकारादीनां साहाय्यादेः अभिनय इव प्रकाश्यते, तथा तथा वास्तवी स्थितिः शोचनीयैव। संस्कृतसेविभिः एतदर्थं प्रबलः प्रयत्नः सम्भूय समनुष्ठेयः'! एतद्विपरीतं पाश्चात्यशिक्षायां प्रतिवर्षं भारतस्य प्रायः प्रत्येकप्रान्त एव समधिका सामयिकी समुन्नतिः समवाप्यते। प्रतिप्रान्तम् आङ्गलविद्यालयानां संख्या प्रवृद्धयुन्मुखी। नवा नवा विश्वविद्यालया दृढीक्रियन्ते। आङ्गलशिक्षितेभ्यो विद्यालयेषु सर्वतः पूर्वं स्थानं दीयते, प्रभूते च वेतनं नियम्यते, किन्तु एतद्विपरीतं प्राचीनशिक्षानुगामिभ्यः संस्कृतपरीक्षोत्तीर्णेभ्योऽपि समये स्थानप्राप्तेरभावः। वेतनमपि तादृक् प्राप्यते येन स्वल्पकुटुम्बपोषणमपि दुष्करम्। अस्तु, 'भारतीयाः पाश्चात्यशिक्षायामेव भवन्तु कृतकार्याः। सामयिकी सेयं विद्या'। इत्यादि हृदये कृत्वा भारतहितैषिणः साम्प्रतपर्यन्तं यथाकथंचित्संतोषमुपयन्ति स्म।

किन्तु यो मद्रासप्रान्तः पाश्चात्यशिक्षायां सर्वाग्रगामी उत्तरदिग्वासिभिरवगम्यते स्म। 'तत्र हि साधारणा भृतिकारिणोऽपि आङ्गलभाषामनिवारितं व्यवहरन्ति' इत्यादि प्रान्तेऽस्मिन् प्रसिद्धयति। किन्तु एषु दिनेषु ये संवादाः श्रूयन्ते तैरत्यन्तं विषादः प्रकाममवसादश्च प्रवृत्तो यद् 'भारतीयाः स्वकीयसंस्कृतिं तिरस्कृत्य पाश्चात्यशिक्षायां नेत्रे निमील्य प्रवृत्ता अपि न साफल्यं भजन्ति'। हन्त उर्दू कवितै[1]वात्र संघटिता नूनम्। यतो हि मद्रासस्य विधानसभायाम् अप्रेलमासस्य २२ तारिकायां तदिदं वित्ररणं प्रविष्टम्—'वर्तमानशिक्षितयुवकेषु आङ्गलभाषयाः स्तरः अतितरामधः पतितः!'

विधानसभायामेतस्य प्रमाणमपि निर्दिष्टं यत् 'मद्रासलोकसेवा—आयोगस्य' परीक्षायां ये छात्राः स्थितास्तेषां उत्तरपञ्जिकाः सम्यक् समीक्ष्य—अनुतापमापन्नैः परीक्षकैस्तदिदं परिणामफलं निर्दिष्टं यत्—'एते शब्दानां वर्तनीम् (हिज्जे) न जानते, विना क्रियां (लट् आदिकम) वाक्यं पूरयन्ति। वाक्येषु विरामचिह्नान्यपि न परिचिन्वन्ति। ते हि एतावत्पर्यन्तेऽपि अनभिज्ञाः यद् प्रत्येकवाक्यस्य प्रथमशब्दः 'कैपिटल' अक्षरात्प्रारभ्यते''।

एतत्परीणामं दृष्ट्वा परीक्षकैः पुनश्छात्राणामुत्तरपुस्तिकाः परीक्षिताः। एतदनन्तरं तैर्विद्वद्भिर्विवशतया सोयं परिणामो घोषितः—'प्रश्नपत्रस्योत्तरदाने परीक्षार्थिभिर्यास्त्रुटयो विहितास्ताभिर्विचारशीलः परीक्षकः स्पष्टमेषु संकेतेषु प्रविशति यद्—'वर्तमाननवशिक्षितयुवकेषु (येषु प्रारम्भात्प्रभृति एम्॰ एस्॰ एल्॰ सी॰ आर्टप्रभृतिपरीक्षोत्तीर्णाः सन्ति) आङ्गलभाषास्तरो नितान्तमधः पतितः। स्थूलतया वर्तनी'हिज्जे'सम्बन्धिनः प्रमादाः प्रतिपदं प्रलोक्यन्ते। कैश्चिच्छात्रैस्तु प्रश्नपत्रस्य प्रतिलिपिं कुर्वद्भिरपि 'हिज्जे' विषयकं स्खलितं न नाम समुल्लङ्घितम्। अनेकैः 'लकारिक', क्रियाविरहितानि वाक्यानि प्रयुक्तानि। न किञ्चिद् विरामचिह्नं, न च पूर्णविरामः, किन्तु तेषां वाक्यप्रवाहः अनर्गलं प्रचरति।'

विवरणस्यान्ते सूचितम्—'उच्चकक्षीयविद्यालयेषु आङ्गलभाषाध्यापनस्य क्रमोऽत्यन्तं विकृतः। छात्राणां स्तरो नितरामधः पतितः। अंग्रेजीपठनस्योपेक्षया छात्राणां तद्भाषाया उपरि अधिकारो नितान्तमवपतितः। कौशलं तिरोहितम्॥'

१—'न खुदा ही मिला, न विसाले सनम्। न इधर के रहे न उधर के रहे॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षोपयोगि लेखमाला—मुम्बईस्थविद्याभवनस्य परिचयपरीक्षाया गद्यलेखानुवादः

हिमालयः

भारतवर्षे हिमालयो नाम पर्वतः अतीव प्रसिद्धः। येऽन्ये पर्वताः सन्ति तेषु श्रेष्ठः असौ। अतएवैनं नगाधिराज इति कथयन्ति। अत्युच्चानि शिखराणि नगस्यैतस्य। भारतवर्षस्य उत्तरस्यां दिशि पर्वतोऽसौ तिष्ठति। इत्थं असौ सीमाप्रदेशे रक्षकः इव स्थित्वा राष्ट्रं धारयति।

भारतवर्ष में हिमालय नाम का अत्यन्त प्रसिद्ध पर्वत है। जो दूसरे पर्वत (भारतवर्ष में) है उनमें यह श्रेष्ठ है। इसीलिए इसको पर्वतराज़ कहते हैं। इस हिमालय पर्वत के अत्यन्त ऊंचे शिखर हैं। यह पर्वत भारतवर्ष के उत्तर दिशा में है। इस प्रकार यह भारत की सीमा पर रक्षक की तरह खडा हुआ (हमारे) राष्ट्र को धारण करता है।

हिमालयस्य शिखराणि सर्वदैव हिमेनाच्छादितानि भवन्ति, अत एवास्याभिधानम्, 'हिमस्य आलयः' इति प्रथितम्। अस्योत्तुंगानि शिखराणि मेघाः आश्रयन्ति। श्रूयते यत्तत्र तपस्विनः निवसन्ति, एकाग्रेण चित्तेन च परमेश्वरं ध्यायन्ति।

बर्फ के शिखर सदैव बर्फ से ढके रहते हैं। इसीलिए इसका नाम 'हिमस्य आलयः' बर्फ का घर यह प्रसिद्ध है। इसके ऊंचे शिखरों पर बद्दल ठहरते हैं। (यह भी) सुनते हैं कि इसके ऊपर तपस्वी लोग एकाग्र चित्त से परमेश्वर का ध्यान करते हैं।

सुविशालश्च मानसं नाम सरोवरं अपि नगस्यातितुंगे शिखरे वर्तते। तस्मिन् सरोवरे राजहंसाः विहरन्ति, विविधानि च कमलानि विकसन्ति। भगवान् शङ्करस्यावासस्थलमप्यत्रैवासीत् यत्र हि भूतगणाः निवसन्ति स्म। तत् स्थानं अद्यावधि भूतस्थानं (भूटान) इति नाम्ना प्रसिद्धम्। हिमवतः पुत्री पार्वती शङ्करस्य भार्या।

बहुत बडी मानसरोवर झील भी इस हिमालय के अत्यन्त ऊंचे शिखर पर विद्यमान है। उस मानसरोवर में राजहंस विहार करते हैं और अनेक प्रकार के कमल खिलते हैं। भगवान् शङ्कर का निवासस्थान भी यहीं था, जहां अनेक भूतगण रहते थे। वह स्थान आज तक भूतस्थान (भूटान) इस नाम से प्रसिद्ध है। हिमालय की पुत्री पार्वती भगवान शङ्कर की भार्या थी।

गंगा, यमुना, ब्रह्मपुत्रादीनां नदीनामुद्गमः हिमालयादेव संजातः। नगेऽस्मिन् निबिडानि अरण्यानि सन्ति, यत्र हि हिंस्राः पशवः बाहुल्येन दिवापि इतस्ततः अटन्ति। अस्मिन्नेव पर्वते पुरा देवाः गन्धर्वाः यक्षाश्च निवसन्ति स्म इति श्रूयते। अद्यत्वेऽपि श्रीमन्तः जनाः ग्रीष्मावकाशे पर्वतस्यास्योपरि स्थितेषु नगरेषु निवासं कर्तुं प्रतिवर्षं गच्छन्ति। भारतवर्षस्य मूर्ध्नि मुकुट इव शोभते हिमालयः।

गंगा, यमुना, ब्रह्मपुत्र इत्यादि नदियों का उद्गम (निकास) हिमालय से ही हुआ है। इस पर्वत पर बहुत घने वन हैं, जहां हिंसक पशु (सिंह आदि) अत्यधिक संख्या में दिन में भी इधर उधर घूमते हैं। इस ही पर्वत पर पूर्व काल में देवता, गन्धर्व और यक्ष रहते थे, यह सुनते हैं। आज भी धनवान लोग ग्रीष्मकाल की छुट्टियों में इस पर्वत पर बसे नगरों पर निवास करने को प्रतिवर्ष जाते हैं। हिमालय भारतवर्ष के मस्तक पर मुकुट की तरह शोभायमान होता है।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथाः—

अमूल्यमातिथ्यम्

(ले० कमलानाथशर्मा, जयपुरम)

सर्वैरेव मनुष्यैर्निजजीवने कदाचित् आतिथ्यमनुभूतं स्यात्, किन्तु बहुमूल्यं तदेव आतिथ्यमस्ति यस्मिन् आतिथ्यकर्तुः हृदयस्य प्रेम सम्मिलितं भवेत्। एवं विधम् आतिथ्यं भाग्येनैव लभ्यते।

कतिपयवर्षाणां वार्ता। वयं चत्वारः सुहृदः 'नैमिष' यात्रार्थं प्रचलिताः। यद्यपि रेलशकटी अपि तत्र गच्छति, किन्तु अस्माभिः 'वायुशकल' द्वारा यात्रैव निर्धारिता। सिद्ध-भोजनसामग्रीं सह नीत्वा अपराह्णे वयं गृहात्प्रस्थिताः। संयोगात् मध्ये एव सूर्योऽस्तमुपगतः। सर्वेषां विचारोऽभवत् यत्समीपगते कस्मिंश्चिद् ग्रामे एव रात्रिर्यापनीया। संमुखस्थे ग्रामे एकस्य गृहस्य सम्मुखे वयं प्राप्ताः। दृष्टम्—यत्तत्र बहवो मनुष्याः अलिन्दे तिष्ठन्ति। मध्ये च एको वृद्धः खट्वायां निषण्णोऽस्ति। तं प्रति रात्रिनिवासे विज्ञापिते, तेन प्रोक्तम्—'अग्रे ग्रामे एव भवतां निवाससौकर्यं भवेत्, नात्र भवतां सुविधा'। तदिदं कथनमतीव रूक्षम्, नास्माकं प्रियमभवत्। किन्तु विवशतया तस्माद् द्वाराद् वयमग्रे प्राचलाम। द्वारस्थितेभ्यः पुरुषेभ्य एकः अस्माभिः सहैव प्राचलत्। यदा स तस्माद् द्वाराद् दूरं आगतः, तदा तेन प्रोक्तम्—'श्रीमन्! मम दीनस्य गृहे निवासेन भवतां कष्टं भवेत्, किन्तु दयावशात्तत्र निवासो भवेत्, चेत्समीपे एव मम गृहम्'।

आसीद् वर्षासमयः। अतएव सर्वसम्मत्या निवास एव स्थिरोऽभवत्। अग्रे गत्वा तस्य गृहमदृश्यत। आसीदति साधारणम्। द्वारं छदिषा आच्छादितम्। तेन तत्रैवास्माकमावासो निर्धारितः। यथास्थानं स्थितेषु अस्मासु तेन भोजननिर्माणस्य आग्रहो विहितः। यतो हि स आसीद् गोपः (ग्वाला), वयं च ब्राह्मणाः। अस्माकं सविधे आसीद् भोज्यसामग्री, अतएव अस्माभिः निर्माणस्य निषेधः कृतः। तस्य आसीद् भूयानाग्रहः—'सेयं सामग्री श्वो भुज्यताम्, अद्य अत्रैव भोजनकृपा करणीया'।

सिद्धभोजनं दिनद्वयपर्याप्तमासीत्, अतएव नेदमङ्गीकृतम् कथमपि। विवशोऽसौ, अन्ते दुग्धपूर्णमेकं पात्रमानयत्। तस्यगृहे तावदेव सम्पूर्णं दुग्धमभवत्। हार्दिकेन तस्य प्रणयेन सर्वेऽपि प्रीता अभवन्।

प्रत्येक मनुष्य के निज जीवन में कभी कभी आतिथ्य का अनुभव हुआ होगा, किन्तु कीमती आतिथ्य तभी है जिसमें आतिथ्यकर्ता का प्रेम भी मिला हो। इस प्रकार का आतिथ्य भाग्य से ही मिलता है।

बहुत वर्षों की बात है। हम चार व्यक्ति नैमिष यात्रा के लिए चले। यद्यपि रेलगाडी भी वहां जाती है, लेकिन हमने साइकिल द्वारा ही यात्रा करने का निर्णय किया। खाना साथ लेकर हम शाम को घर से रवाना हुए। संयोग से बीच में ही सूर्य अस्त होगया। सबों ने विचार किया कि पास के किसी गांव में ही रात बिताई जाय।

सामने वाले गांव के एक घर के सम्मुख हम पहुंचे। देखा कि वहां बहुत से मनुष्य पोली में बैठे हैं। बीच में एक वृद्ध चारपाई पै बैठा है। जब हमने रात्रि में वहां रहने की बात कही तब वृद्ध बोला—'आगे वाले गांव में ही आप लोगों के रहने की सुविधा होगी।' उसका यह कहना अत्यन्त रूखा हम लोगों को अच्छा नहीं लगा। लेकिन विवशता से उस घर से आगे चले।

द्वार पर बैठा एक व्यक्ति हमारे साथ चल दिया। जब वह उस द्वार से दूर आगया तो बोला—'मेरे गरीब के घर में रहने से कष्ट तो होगा लेकिन दया करके मेरे घर में रहें तो मेरा घर पास ही है।'

वर्षा का समय था, इसलिए सबों की सम्मति से निवास करना ही निश्चित रहा। आगे जाने पर उसका घर दिखाई दिया। बिल्कुल साधारण था। द्वार छप्पर से ढका हुआ था। उसने वहीं हमारा रहना निर्धारित किया। वहां बैठे हम लोगों से उसने भोजन का आग्रह किया। वह तो ग्वाला था और हम ब्राह्मण। हमारे पास भोजन की सामग्री थी, अतः हमने भोजन बनाने का निषेध किया। उसने अत्यन्त आग्रह किया—'अपना भोजन कल खा लेना आज तो यहीं भोजन कीजिए। बना हुआ भोजन दोबार के लिए काफी था अतः यह कैसे भी अलग नहीं किया जा सका। उसने विवश होकर अन्त में दूध से भरा हुआ लोटा रख दिया। उसके हार्दिक प्रेम से सब प्रसन्न होगये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गागर में सागर



आज भौतिक स्तर पर भी ज्ञान-योग आश्रित रस-रसायन के सूक्ष्मीकरण सिद्धान्त को समझना आसान कर दिया है। एक विशिष्ट द्रव्य या धातु को यदि निरन्तर सूक्ष्म से सूक्ष्म (बारीक) किया जाय तो उस पदार्थ में निहित शक्ति प्रकट होने लगती है; रस-रसायनों के विलक्षण प्रभाव का यही रहस्य है। बैद्यनाथ रस-रसायन सैकड़ों हजारों अग्निपुटों, औषध-संस्कारों और स्वरसभावनाओं के द्वारा सूक्ष्मीकरण की शास्त्र-सम्मत प्रक्रिया से तैयार होते हैं।

बैद्यनाथ रस-रसायन

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

बैद्यनाथ सिद्ध मकरध्वज, बैद्यनाथ वसन्तकुसुमाकर रस, बैद्यनाथ पूर्णचन्द्र रस वृहत्, बैद्यनाथ श्वास चिन्तामणि रस वृहत्, बैद्यनाथ योगेन्द्र रस आदि आदि बैद्यनाथ रस-रसायन स्वयं स्फूर्त शक्तिपुंज होते हैं।

श्री बैद्यनाथ आयुर्वेद भवन प्राइवेट लि०

कलकत्ता · पटना · झाँसी · नागपुर · इलाहाबाद

विश्वस्तं निर्माणकेन्द्रम्

श्री वैद्यनाथ-आयुर्वेद-भवनम्

(प्रायवेट लिमिटेड्)

कलिकाता, पटना, झांसी, नागपुरम्, इलाहाबाद

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्ये भेषजानीमानि लभ्यन्ते

राजस्थानस्य विक्रयकेन्द्राणि

कांसली आयुर्वेदिकस्टोर्स—जौंहरी बाजार, जयपुर

जोधपुर आयुर्वेदिकस्टोर्स—सर्राफा बाजार, जोधपुर

अजमेर आयुर्वेदिकस्टोर्स—स्टेशन रोड, अजमेर

सूक्ति--सुधा

शक्तिरहितोऽपि कुप्यति सेवासक्तोऽपि मानमुद्वहति।
अधनोऽपि हि कामयते जानाति विधिर्विडंबयितुम्॥१

शक्ति (ताकत) रहित होने पर भी जो क्रोध करता है, दूसरे की सेवा करता हुआ भी जो अपने मन में बड़ा अभिमान करता है, निर्धन होने पर भी नाना प्रकार की कामनाएं (इच्छा) करता है, (तो कहना होगा कि) यह विधाता विडम्बना करना जानता है। अपने में शक्ति न होने पर क्रोध किस वित्ते पर करे? दूसरों की नौकरी करता हुआ भी अभिमान किस बल पर करे, नहीं करना चाहिए। निर्धन होने पर नाना इच्छाएं नहीं करनी चाहिए। धन रहने पर ही इच्छाएं होना शोभित होता है। अन्यथा ये सब उपरोक्त बातें विधाता की तरफ से विम्डबना है॥१

अनुचितकर्मारम्भः स्वजनविरोधो बलीयसि स्पर्द्धा।
प्रमदाजनविश्वासो मृत्युद्वाराणि चत्वारि॥२॥

अनुचित (समय से विपरीत) काम करना, अपने आदमियों से विरोध करना, अत्यन्त बलवान के साथ मुकाबला करना, प्रमदाजन अर्थात् प्रमाद भूल, अभिमान करने वाली स्त्रियों पर विश्वास करना ये चार बातें मृत्यु के द्वार हैं। इनसे कभी न कभी मरण तक हो जाता है॥२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[भारतीय स्वाधीनताक्रान्तेः (१९४२ई०) कालतो स्थापितम्]

★ नयनाभिरामदृश्यैः ★ पुरस्कृतकथाभिः ★ रोमांचकारिघटनाभिः ओतप्रोतम्
★ हृदयग्राहिगाथा ★ मनोहरं मुद्रणम् ★ ज्ञानवर्धकं पारिवारिकं मनोरंजनम्

'देशमुख' हिन्दी साप्ताहिकम् प्रतिगुरुवासरमिदं पत्रं प्रामाणिकलेखैः, बालस्तंभैः, चित्रैः, व्यङ्ग्यचित्रैः शब्द-चित्रैश्च सह चलचित्रदृश्यमयीं सामग्रीमुपहरति।

इदं भवत्परिवारस्य सर्वेभ्यः सदस्येभ्यो मनोरंजनसाधनानि समर्पयति एतस्य साहित्यं भवतो ज्ञानं वर्धयति, भवतो जीवने नवीनमुत्साहं भरति, स्फूर्तिमानयति। बौद्धिक-राजनैतिक-आर्थिक-सामाजिकविचारान् द्रढयति।

अतएव-सर्वत्र 'देशमुख' साप्ताहिकं सम्मान्यते, प्रख्यायते च।

❀ त्वरितं पठन्तु

समस्तभारते सर्वाधिकविक्रयाय प्रमाणित सचित्रं हिन्दी-साप्ताहिकम्

महाराष्ट्रराज्यस्यैकलं संध्याकालसमाचारदैनिकम्

देशमुख

[सामाजिकक्रांतेः सचित्रं साप्ताहिकम्]

'DESHMUKH'

(Social Revolutionery Hindi Weekly)

पोस्ट बाक्स ६०२९ Post Box 6029

बम्बई-१२ (भारत) Bombay-12 (India)

❀ इष्टमित्रान् पाठयन्तु

पञ्चशील का प्रबल प्रचारक !

एकवर्षस्य मूल्यम्	१०)
षण्मासानाम्	६)
पुस्तकालयेभ्यः	३)

लेखकेभ्याश्चित्रकरेभ्यश्च निःशुल्कम्

प्रति सप्ताहं १६ पृष्ठानि बृहदाकारे। एकप्रतेः २५ नवपणाः। विशेषांका वार्षिकं निःशुल्कम्

देशमुखं भवदीयपरिवारस्य बालवृद्धनरनारीमातृभगिनीप्रभृतीन् सर्वान् कुशलान् नागरिकान् निर्माति

देशमुखं भवतो मित्रम्, परिवारसदस्यः, समयदर्शकश्च, समाजस्य समस्याः समादधाति।

"साप्ताहिक स्तम्भ"—बम्बई की रातें, देखी-सूनी बातें, कहो कैसे कही ? इनसे मिलिये, नई-पीढ़ी, मुस्कराहट का सेम्पुल, धरती गाती है, नये प्रकाशन, नवाब राजे-महराजे, श्रमिक-संगठन, विश्व एक नजर में, नेता के विचार, चित्र कसौटी, शिक्षक-समाज, महिला जागरण, सितारों की कलम से, अर्ज करता हूँ, आपके पत्रों के उत्तर, देशमुख के साप्ताहिक चहरे, क्या खोया क्या पाया ! भारतीय मार्कीट व्यवसाय, पर्वत की वासनाएँ, अन्तराल की आत्मा (उपन्यास), वेश्यावृत्ति और उसका अन्त, कैसे हो ? नेहरू चाचा, परिवार विज्ञान के बढ़ते चरण, सयानों ने कहा, सम्पादक की डायरी, भूदान चर्चा कसौटी पर बापू ने कहा था ? अनमोल बोल, ये समाज के कोढ़ जलते पृष्ठ, ये अन्याय-अनाचार-उत्पीडन कैसा ? सफल जीवन की कुँजियां, ये पथभ्रष्ट ललनायें जब माता बनेंगी ? जाने पहचाने-चेहरे, प्रेमकथा, मस्ती, कूटकथा, गूढ़जाल, रम्यकथायें, उन्माद, अजब कथायें, मील के खम्भे, स्वतन्त्रता के प्रहरी, भूत के गर्भ में छिपा इतिहास का एक पृष्ठ, घर-गृहस्थी की बातें।

★ एते भवतो रसिकप्रवृत्तिमुल्लासयिष्यन्ति, हृदयमाक्रन्दयन्ति, जीवनस्य विभिन्नावस्थानां दर्शनं कारयिष्यन्ति।

★★★ **अद्यैव १०) शुल्कं प्रेषयित्वा देशमुखं पठत।**

श्रीमान् वितरणनिर्देशकः, दैनिकदेशमुखम् (साप्ताहिकम्) पोस्टबाक्स-६०२९, बम्बई-१२ (भारत)

तडित्पत्रम्— 'देशमुखी' बम्बई, Telegram : 'DESHMUKHI' Bombay.

सम्पर्क करें—पत्र विक्रेता, समाचार-प्रतिनिधि, फोटोग्राफर, विज्ञापन एजेंट, लेखकगण, चित्रकार,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)

मुद्रकः—श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

GURUKULA KANGRI LIBRARY HARDWAR

आर्यसंस्कृतिसुरक्षणदक्षः पारतन्त्र्यनिगडप्रतिहन्ता।
केसरीव बलवीर्यवरिष्ठो लोकमान्यतिलकस्तिलकोऽयम्॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वर्षम् १० | दशमाङ्कः | वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकप्रतेः चत्वारिंशत् नवपणाः (४० नयेपैसे)

Digitized by Arya Samaj Foundation Chennai and eGangotri

'गागर में सागर'



अणु-शक्ति के आविष्कार ने आज भौतिक-स्तर पर भी ज्ञान-योग आश्रित रस-रसायनों के सूक्ष्मीकरण सिद्धान्त को समझना आसान कर दिया है। एक विशिष्ट द्रव्य या धातु को यदि निरन्तर सूक्ष्म से सूक्ष्म (बारीक) किया जाय तो उस पदार्थ में निहित शक्ति प्रकट होने लगती है; रस-रसायनों के विलक्षण प्रभाव का यही रहस्य है।

बैद्यनाथ रस-रसायन सैकड़ों-हजारों अग्निपुटों, औषध-संस्कारों और स्वरसभावनाओं के द्वारा सूक्ष्मीकरण की शास्त्र-सम्मत प्रक्रिया से तैयार होते हैं।

बैद्यनाथ

रस-रसायन

...ी दवाओ का सब से बड़ा और विश्वासी कारखाना

बैद्यनाथ सिद्ध मकरध्वज, बैद्यनाथ वसन्तकुसुमाकर रस, बैद्यनाथ पूर्णचन्द्र रस वृहत्, बैद्यनाथ श्वास चिन्तामणि रस वृहत्, बैद्यनाथ योगेन्द्र रस आदि आदि बैद्यनाथ रस-रसायन स्वयं स्फूर्त शक्तिपुंज होते हैं।

श्री बैद्यनाथ आयुर्वेद भवन प्राइवेट लि०
कलकत्ता · पटना · झाँसी : नागपुर · इलाहाबाद

भारतीय-औषधानां सर्वाधिकं बृहत्
विश्वस्तं निर्माणकेन्द्रम्

श्री बैद्यनाथ-आयुर्वेद-भवनम्
(प्रायवेट लिमिटेड)

कलिकाता, पटना, झाँसी, नागपुरम्, इलाहाबाद

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्ये भेषजानीमानि लभ्यन्ते

राजस्थानस्य विक्रयकेन्द्राणि

कांसली आयुर्वेदिकस्टोर्स—जौंहरी बाजार, जयपुर
जोधपुर आयुर्वेदिकस्टोर्स—सर्राफा बाजार, जोधपुर
अजमेर आयुर्वेदिकस्टोर्स—स्टेशन रोड, अजमेर

राजस्थान मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारैर्स्वीकृता —

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ संख्या
१.	अ-शक्तता	श्रीशिवशरणझा, झांसी	२२७
२.	भारतीय संस्कृतिः	श्रीनरनाथझा, ऋषिकुल चूरू	२२८
३.	श्रीकात्यायनीस्तुतिः	श्रीगणेशरामशर्मा, झालावाड़	२३१
४.	वेदस्य सर्वविद्यानिधानत्वम्	श्रीमोतीलालशर्माणः, दुर्गापुरा	२३३
५.	खगोलवर्णनम्	श्रीमल्लिनाथचौमालः	२३६
६.	अमृत-वाणी		२३९
७.	फेनकाष्टकम्	सहसम्पादकः	२४०
८.	संस्कृत-समाचाराः	,,	२४०
९.	सम्पादकीयम्	सम्पादकः	२४१
१०.	अहल्या	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	२४३
११.	राजधान्यां संस्कृतोन्नतेः प्रयत्नः	सम्पादकः	२४५
१२.	संकटसमये भगवतः स्मरणम्	श्रीकमलानाथशर्मा, जयपुरम्	२४६
१३.	सूक्ति-सुधा	सम्पादकः	२४७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | श्रावणमासः, सं० २०१७ (अगस्त मासः सन् १९६०) | अङ्कः १०

अ०शक्तता

(ले० श्री शिवशरणझा झाँसी)

प्रिय-गान-विधाने विचलति कस्माद् रागः ।
मानसमावृणुते कुतस्तदा हि विरोगः ॥

मस्तके घनश्चिन्ताया उदयं गच्छति
यो मनःप्राङ्गणे गहनं तमः प्रयच्छति
संभवति तनौ कर्तव्य-विमुखता यस्मात्
द्रुतमियं दशा न तु परिहातुं मामिच्छति
एतेन हेतुना भवति राग-पथ-त्यागः ॥१

आदाय वेदना-वीणां गातुं यावत्
आरिप्साम्यश्रूणि तारान् तावत्
विक्लेदयन्ति विघ्नन्ति निवेदन-गानम्
अन्तर्वसतामेषां प्रहरणमेतावत्
केनानुकम्पिना नेयो दुःखे भागः ॥२

प्रियमुखमीहेते चेन्मम चरणौ चलितुम्
अभिवाञ्छति तरसा चाशा वल्ली फलितुम्
मुदमास्वादयितुं समाशास्ते चेतः
अथ निपतति नियतिः कुटिला सकलं दलितुम्
बाधयाऽनया व्यथते मम मनो निरागः ॥३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीय संस्कृतिः

(ले० व्या० आ० पं० नरनाथझा ऋषिकुल चूरू)

समुपसर्गात् कृधातोः भावे क्तिन्प्रत्यये भूषणेऽर्थे सुडागमेन संस्कृति-शब्दः निष्पद्यते । ततः आक्षेपेण मानवानां भूषणभूता सम्यक्कृतिः संस्कृतिशब्दस्य योगार्थः, कृतेः भूषणं तदेव येनाचारेण—विचारेण वा मानवा अस्मिन्परस्मिंश्च लोके सर्वक्षेत्रेषु सर्व-विधमुत्कर्ष-मभ्युदयं वा लभेरन् भूषणस्वरूपा सा कृतिरेव संस्कृति-रुच्यते ।

अस्याः मूलाधारशिलाः सर्वोपादेयाः नित्या अपौरुषेयाः श्रुतयः उद्देश्यमात्मनोऽन्तःकरणस्य वा अनादिकालात्सञ्चितस्य पापतापाज्ञानादेः मलस्यापनयन-

कियतः कालाद्वाञ्छामि दर्शनं यस्य
अन्तः स्याद् येन द्रुतमन्तःसन्तापस्य
यद्यसौ न मिलिता मदुपेक्षा-भावनया
तन्मुषितो निधिरपि स्यान्मद्विश्वासस्य
उपसर्पति दंष्टुं मामाशङ्का - नागः ॥४

अस्त्येकः श्रोता मम मानसिककथायाः
अद्यावधि नापर-श्रुति-गोचरं गतायाः
चेदुपगत-दुःस्थिति-विवशतया नूतनया
अन्यः श्रोताऽभूद् हेतोस्तदुपेक्षायाः
शोषणमुपयास्यति तनु-भावना-तडागः ॥५

अनुरागो विहितः प्रागविदित-गति-भावे
आश्वस्तं चेतः श्रुत-जन-काम्य-प्रभावे
सन्तापिनि मार्गे कुसुमकामना मनसः
कथमुपपन्ना स्यादस्मिन् दुःस्थिति-दावे
भविता मे स्नेहः तदुपेक्षा-बलि-छागः ॥६

त्वं मनः ! परेषां सौभाग्यान्न विषीद
मौनं गृह्णद् विधि-लभ्यादेव प्रसीद
कामना फलति वै विरलतया सरलानाम्
इति जानन् मोघायासादहो, निषीद
अयि, त्वया न साध्यो बत, तदुपासन-यागः ॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरःसरं शनैः शनैः भक्तेः ज्ञानस्य वातिशयाधानेन भगवत्प्राप्तिः मोक्षो वा। तस्मादियमध्यात्मप्रधाना। धर्माच्च विलक्षणा, यतः सर्वाधारभूता संस्कृतिः क्षेत्रम्, तत्र जायमानो विभिन्नसम्प्रदायशाखो धर्मः कल्पतरुः। अपि च धर्मः मन्वादिशास्त्रैः समधिगम्यते, परमियं शास्त्रेण तदविरुद्धलौकिकव्यवहारेणाप्यूह्यते, एवमेव सभ्यतायाः अपि संस्कृतिरतिरिच्यते, यतः अनुभवजन्यज्ञानप्रभवा आभ्यन्तरप्रयत्नसाध्या संस्कृतिः नित्या, सभ्यता तु समायां साधुः सभ्यः तस्य भाव इति व्युत्पत्त्या बुद्धिजन्यज्ञानप्रभवा बाह्यप्रयत्नसाध्या परिवर्तनशीला।

अस्याः पोषकाः प्रचारकाः भौतिकसुखविमुखाः त्यागिनः तपस्विनः एवाभवन् ये शान्तिमयं जीवनमेव जीवनं मन्वानाः प्रत्येकस्मिन्-कर्मणि त्यागस्य सन्तोषस्य विद्यावयोऽनुभववृद्धानां सम्मानस्यार्जवस्यादर्शं निजाचरणेनावस्थापयाञ्चक्रुः। एभिरनुप्राणितेयं संस्कृतिः सुदृढा सहस्रं वर्षाणि परतन्त्रासती विभिन्नसंस्कृतिमयानि-परिधानानि परिदधती प्रधानपथस्खलिता प्रतिरथ्यं भ्रमन्ती अपि प्रतिकूलप्रकम्पनस्य साम्मुख्यं कुर्वती अद्यापि समुज्जीवति। यदा च एतस्यां स्थितौ ग्रीस-मिस्ररोमादि देशसमुद्भूताः कियत्यः संस्कृतयः स्मृतिशेषाः काष्ठ-पाषाणखण्डानुमेयाः इतिहासपृष्ठेष्वेव पठनीयाः प्रतीयन्ते।

एतस्याः व्यापकता अप्येतावतैवानुमीयते यद्विश्वस्य सकलाः संस्कृतयः मानवानां वर्तमानशरीरमेव सम्बध्नन्ति, परमियम् अनन्तामितजन्मभ्यः प्राणिनः सम्बध्नती जीवानां चरमं लक्ष्यं प्रापय्य एव विश्राम्यति, एतस्योद्देश्यस्य पूर्तये जन्मान्तरवादः परलोकवादः श्राद्धम् तदङ्गभूता "सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे" इति सा शुद्धा यथा स्यादिति साङ्कर्यात्संरक्षिका वर्णव्यवस्था। एवमेव "सती च योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपी"ति दिशा जन्म जन्मान्तरावधि अविच्छेद्यसम्बन्धविधायी विवाहादि संस्कारः आत्मनः क्रमेण विकासाय आं ईषत् श्रमेण त्यागोपासनारूपेण लक्ष्यप्राप्तेः व्यवस्था आश्रमव्यवस्था प्रभृति जगति भारतीय संस्कृतेरेव परमं वैशिष्ट्यम्।

एषा भारतीया संस्कृतिः नैकदेशीया, प्रत्युत विश्वव्यापिनी सती भारतीयानन्यांश्च सर्वानेव मानवान् निर्विशेषमुपकरोति। विश्वस्य सकला एव मानवाः एतस्याः आदर्शानामनुगमनेन शाश्वतिकं कल्याणं लब्धुमर्हन्ति। केवलं भौतिकपथे अहमहमिकया अग्रगमनेन न यतोऽद्यावधि कस्यचिदपि देशस्य समाजस्य वा शाश्वतिकं कल्याणं कदाचिदपि केवलं राजनीत्या नाभवत् नवा भविष्यति काले भविष्यति।

अधुना मानवानां प्रतिभाशक्तिः समुपलब्धं ज्ञानविज्ञानादिसाधनं, यमध्वानमनुसरतः तेन मानवतायाः लाभस्य लेशोऽपि न सम्भाव्यते। अनेकानि राष्ट्रीयाण्यन्ताराष्ट्रीयाणि संस्थानानि सन्ति, परं तैरपि परस्परं वैमनस्यमेव विवर्धमानं विलोक्यते। यदा चावश्यकतास्ति यत् मानवाः मानवतायाः स्वरूपं विजानीयुः, विज्ञाय च तद्विकासे सहयोगिनः स्युः, प्रगतिमता विज्ञानेन परस्पर प्रतिस्पर्धायाम् ईर्ष्याद्वेषादिकान् दोषान् सृजता "वसुधैव कुटुम्बकम्" इत्यस्याः संस्कृतेरादर्शः न केवलं विस्मारितः प्रत्युत विभिन्नेन साधनेन प्रत्येकं राष्ट्रस्य मानवस्य मानसे भयमविश्वासः जुगुप्सादयो निन्दनीयाः भावाः समुद्भाविताः।

चिराद् उपेक्षितानामुत्पीडितानां च सर्वेषां जीवनयापनस्तरस्योत्थापनाय भवनमशनं वसनं च व्यवस्थापयितुं सर्वविधोपलब्धसाधनशक्त्या क्रियमाणे प्रयत्ने यत्रतत्र कार्यरूपेण परिणम्यमानेऽपि स्वार्थत्यागभावनायाः विरहेण निर्माणेऽपि स्खलनेन पोषणस्थाने शोषणस्य प्रवेशेन नामतोऽपि शान्तिः न श्रूयते। अस्यां संस्कृतौ "त्यागाच्छान्ति" रिति सूत्रभूतां गीतोक्तिं व्याचक्षाणाः महनीयमहिमानो महर्षयः जीवनस्य पदे पदे त्यागमुपादिशन्, येन सर्वेषां हृदये सन्तोषेण विश्वासेन प्रेम्णा सर्वत्र शान्तेः साम्राज्यमासीत्, यस्याः साक्षिभूता इतिहासस्वरूपा "रामायणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभारतं श्रीमद्भागवतं चेति त्रयो ग्रन्थाः समुज्ज्वलैरादर्शैः देदीप्यमानाः सरोमोद्गमम् अद्यापि उल्लासयन्ति मनस्विनां मनांसि ।

अवदधतु पाठकाः ! पित्रा प्रदत्तं प्राज्यं साम्राज्यं परित्यज्य परिजनःपरिवृतो भरतः भगवन्तं परावर्तयितुं पद्भ्यामेव चित्रकूटं प्रयाति, तत्र प्रार्थयति च प्रभुं सुशोभयितुं साम्राज्य-सिंहासनम्, परं मर्यादापुरुषोत्तमो-भगवान् रामः एकतः सत्यसन्धस्य पितुरादेशपालनम् इतरतोऽनुपमस्य भ्रातुः भारतस्य स्नेहानुवर्तनमित्यसमञ्जसमापन्नः क्षणं क्षणहीनां साम्राज्यलक्ष्मीं चतुरक्रीडकयोरन्तराले कन्दुकोपमां कुर्वाणः भूयो भरतमेव विपदि सहयोगाय समनुरुरोध । भरतोऽपि सेवकधर्मं जानन् प्राक् साम्राज्यमधुना स्वस्य समीहामपि विहाय रत्नविभूषिते दिव्ये तत्पादुके समादाय भगवन्तं परिक्रम्य च नातिप्रमनाः न्यवर्तत । तत आगत्य पद्मपत्रमम्भसेव लक्ष्म्या चतुर्दशवर्षाणि निर्लिप्तः असिधाराव्रतमपालवत्, एषोऽस्ति अस्यां संस्कृतौ त्यागः ।

विभावयन्तु भावुकाः ! तां महाभारतीयां कथाम् । यत्र "न जातु कामान्न भयान्न लोभाद् धर्मं जह्याज्जीवितस्यापि हेतो" रिति आपत्तौ प्राप्तायामपि धर्ममनुपालयन्ती एषा संस्कृतिः "शुनि चैव श्वपाके च पण्डिताःसमदर्शिनः" इति जुगुप्सां नास्पदीकुरुते, यतः सदेहं स्वर्गच्छन् धर्मराजोऽनुगच्छन्तं श्वानमप्यपहाय नैच्छद् गन्तुमिति एकस्य शुनः कृते स्वर्गीयभोगलिप्सामुपेक्ष्य शरणागतवत्सलताम्प्रति आत्मनः सुदृढामास्थां प्रादर्शयत् । वस्तुतः एतस्यां संस्कृतौ लालिताः पालिताः पोषिताश्च शिशवः प्राणान्–तृणाय मन्यमानाः धर्मं सदैव ररक्षुः ।

भक्तिसुधारसरसिकाः ! भगवतो गुणगणानां श्रवणमननाद्युपासनाप्रधाने श्रीमद्भागवते उपासनया द्रवीभूते चेतसि सर्वभूतेषु भगवद्भावं दर्शयन्ती एषैव अमरसंस्कृतिः "वासुदेवः सर्वम्" सर्वं खल्विदं ब्रह्मेति वा अन्येनाननुभूतपूर्वं विलक्षणमादर्शम् उपस्थापितवती ।

दिङ्मात्र मुद्ध्रियमाणमन्यदौदार्यं प्रति दृष्टिं पातयन्तु प्रेक्षावन्तो महाभागाः ! "सर्वदेवमयोऽतिथि" रिति समागतातिथेः दानसम्मानाभ्यां परितोषणस्य का कथा "सर्वभूतहिते रताः" इति भावनां पोषयन्ती प्रत्यहं गृहस्थस्य गृहे आकीटपतङ्गान् पशुपक्षिणः सन्तर्प्यैव स्वयमन्नग्रहणायादिशति । अन्यथा "भुञ्जते ते त्वघं पापाः ये पचन्त्यात्मकारणा" दिति पापाशिनां पङ्क्तौ प्रक्षिपति ।

"वृद्धसेवायाः विज्ञान" मिति विद्यावयोऽनुभववृद्धानां श्रद्धया सेवायामपि नूनमनूनं स्थानं वितरति । "अभिवादनशीलस्य नित्यं वृद्धोपसेविनः, चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बल" मिति बुद्ध्या उत्पादनाक्षमा अपि ते वृद्धाः" आदरदृष्ट्या विलोक्यन्ते सेव्यन्ते च । एवमेव "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इति मनूक्तिं हृदयेषु निधापयन्ती आद्यशक्तिप्रतीकभूतानां ललनाललामानामपि भूयसीं प्रतिष्ठां तनोति । ताः गृहस्थाधिष्ठात्र्यः सत्यः सर्वैः स्वजनैः गृहलक्ष्मीपदेन सम्बोध्यमानाः परैः "मातृवत्परदारेषु" इति अत्युच्चतमभावनया मातृवत्पूज्यन्ते ।

मनाक् सभ्यंमन्यानन्यानपि देशान् पश्यन्तु, यत्र युवतीनां यौवनेऽपि जीवनमनिश्चितं सङ्घर्षमयं च भवति । वृद्धावस्थायां तु सर्वथोपेक्षणीयं दुःखमयं च बोभवीति । सन्ततयः तां प्रति उदासीनाः कर्तव्यज्ञान-विहीनाः विषयभोगासक्ताः पालन-पोषणविरताः जायन्ते । अनुभवन्तु सहृदयाः श्लाघनीयाया अस्याः भारतीयसंस्कृतेः कियती महत्ता । यया जाताकर्षणाः ताभ्यः सभ्यताभ्य उद्विग्नाः पाश्चात्या एना मन्विष्यन्ति ।

यस्याम् "आदानं हि विसर्गाय सतां वारिमुचामिवे" ति आदानमपि प्रदानाय, सतां विभूतिः परोपकाराय परद्रव्येषु लोष्ठवत्, "समलोष्ठाश्म काञ्चनः" इति भावना एव वासनाविनाशिनी, "सत्यमेव जयते नानृत" मिति सत्यमेवोभयलोकसम्बलम्, "अहिंसा परमो धर्मः" इति अहिंसैव श्रेयसः प्रेयसश्च साधनम्, "ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नते" ति ब्रह्मचर्यमेवामरत्वप्रदायकम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकात्यायनीस्तुतिः

ले० विद्याभूषणः श्रीगणेशरामशर्मा, साहित्यरत्नम्, झालावाड़ (राजस्थानम्)

या देवी सुरनरसिद्धसन्मुनीन्द्रै-
गन्धर्वैर्गुह्गणकिन्नराप्सरोभिः ।
देवर्षिद्विजपतिभूमिपालसङ्घै-
र्वन्द्या तामिह जगदम्बिकां प्रपद्ये ॥१

चिद्रूपागमनिगमेषु कीर्तितापि
व्यक्तापि त्रिगुणयुतापि विश्वयोनिः ।
अव्यक्तां तदपि जगुर्विरञ्चिमुख्या-
स्तां दुर्गां दुरधिगमां शिवां प्रपद्ये ॥२

मायां प्रकृतिमपरां परामजां च,
व्याकृत्युत्कृतिविकृतिस्वभावरूपाम् ।
वेदान्ताध्वनि मुनिहृत्प्रहर्षिणीं त्वा-
मद्वैतामृतरसवर्षिणीं प्रपद्ये ॥३

भक्तार्तिप्रशमनि ! भद्रपीठसंस्थां
भास्वन्तीमथ तपसा विभूतिदात्रीम् ।
भीतिघ्नां नभसि नटीव तां नटन्तीं
भूयोऽहं मनसि भजामि भद्रकालीम् ॥४

श्रीकामेश्वरहृदये विराजमाना-
मानन्दोदधिमिव चिद्घनस्वरूपाम् ।
मातस्त्वामयि ! त्रिपुरेश्वरीं शरण्यां
श्रीविद्यामथ ललिताम्बिकां श्रयेऽहम् ॥५

नीलाभ्रच्छविकबरीपतत्प्रसूनै-
र्वासन्तीं ललितलताश्रियं दधानाम् ।
आलीभिर्नवमधुकुञ्जमण्डपे त्वां
नृत्यन्तीं त्रिदशकुमारिकां प्रपद्ये ॥६

फुल्लेन्दीवरदलमञ्जुलायताक्षीं
लावण्यामृतसरसीमिवेन्दुगौरीम् ।
मुग्धान्तः करणवतीं च शारदां त्वां
सानन्दां त्रिभुवनमोहिनीं भजेऽहम् ॥७

वाग्देवीममृतकलां ललामवाणीं
साकारां गुणवदनल्पकल्पनाख्याम् ।
कल्याणीं कविकुलकीर्तिकौमुदीं त्वां
वन्देऽहं नवरसभारतीं स्फुरन्तीम् ॥८

कुन्देन्दुस्फटिक तुषारहीरहार-
क्षीराच्छच्छविघनसारकान्तिकान्ताम् ।

इत्यादिकाः नैतिकगुणाः प्रतिजनं प्रतिजनान्तःकरण श्चानुस्यूताः । यैरेषा अस्मानुन्नताननान् विदधती अद्या-वधि अजीवयत्, तां वयं विस्मरेम चेदुपेक्षेमहि वा ध्रुवं नङ्क्ष्यामः । यतो भौतिकाभ्युदयः कमपि जीवनलक्ष्यं प्रापयितुं न चाभवत्, सम्भवतिः, तत्प्रतिस्पर्धायां वयं चिरसमृद्धराष्ट्राणां साम्मुख्यमपि कर्तुं न शक्नुमः। अहिंसासत्यादिभिः नैतिकगुणैस्तु अद्यापि अन्तर्राष्ट्रीय जगति सबहुमान स्थानं लभामहे । अतः राजनीति दृष्ट्या सर्वतन्त्रस्वतन्त्रा वयं स्वीयैस्तैरेव यमनियमादि नैतिकगुणैस्तथा व्यवहरेम येन सकृत् पुनरस्माकमेष उद्घोषः दिग्दिगन्तं प्रसरेत् यत् 'एतद्देशप्रसूतस्य सका-शादग्र जन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमा-नवाः । इति अवसाने पुनरस्याः स्पृहणीयसंस्कृतेस्तामुदात्तां भावनामनुस्मरन् विरमाभि :—सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग् भवेत् ॥ ॐ शान्तिः ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हंसीं त्वां बुधजनमानसे वसन्तीं
वन्दे वाङ्मयजननीं च सर्वशुक्लाम् ॥९

गम्भीरध्वनिमहतीं बहुश्रुतार्थां
सुस्पष्टाक्षरपदवाक्यशक्तिरम्याम् ।
पीयूषद्रवमधुमाधुरीझरीं त्वां
वर्षन्तीं श्रुतिपुटकेष्वहं प्रपद्ये ॥१०

शब्दार्थध्वनिविशदां ललामलेखां
दिव्यां सद्गुणगणगुम्फनाच्छशैलीम् ।
सुस्पष्टां त्रिभुवनसुन्दरीं स्वभाषा-
विज्ञानाक्षरलिपिनागरीं नमामि ॥११

हृत्तन्त्रीगुणकृतमूर्तरागमालां,
सानन्दं मधुरकलोपवीणयन्तीम् ।
तद्ब्रह्माक्षरभवनात्ततत्त्वविद्या-
मीडे त्वां श्रुतिलहरीं मृदुध्वनन्तीम् ॥१२

यां देवा न विदुरजाच्युतेशमुख्याः,
सर्वान् मोहयति बलाद्गुणप्रवाहैः ।
यामाहुः सविधिनिषेधमात्मसिद्ध्यै,
भूयात्साधनसुलभा स्वयोगमाया ॥१३

ऐं ह्रीं क्लीं प्रणवशिवात्मरूपहृद्यां,
बीजार्थोद्भटकविलोमलोमसंस्थाम् ।
विज्ञानाक्षरतनुहादिकादिविद्यां,
वन्दे शाबरकुलमन्त्रमातृकां त्वाम् ॥१४

मुद्राभिः श्वसननिरोधनासनाद्यैः,
न्यासस्थापनविनियोगमन्त्रकृत्यैः ।
संस्कारैर्विधिभिरहं श्रये स्वयं तां,
सिद्ध्यन्तीमिह हठयोगपद्धतिं त्वाम् ॥१५

त्वां सार्द्धत्रिवलयदेहभास्वराभां,
षट्चक्रोद्गतिभिदुरां त्रिमार्गमध्याम् ।
वन्दे मातरमजरामरस्वरूपां,
जाग्रत्कुण्डलिनि ! शिवात्मयोगसिद्ध्यै ॥१६

स्वाध्यायाभ्यसनविमर्शशास्त्रतत्त्व-
प्रज्ञानाश्रयगुरुदर्शितात्मविद्ये !
साक्षाद्ब्रह्मणि हरिबिम्बितेऽद्वयेऽजे !!
शांते !!! ते निखिलगुहाशये !!! नमोऽस्तु १७

सद्वर्णाश्रमविधियुग्विधानधर्म-
ज्ञानोपासनगुणकर्मशीलरम्ये !
संस्कारानुभवसमन्वयक्रमे !!! प्राङ्
मर्यादाविशदपरम्परे !!! नमस्ते ॥१८

चारित्र्याचरणतपोव्रतोपवासैः
शीलेनार्जवगुणभावुके ! मनोज्ञे !!
सम्यग्धर्मिणि !!! हृदि शुद्धबुद्धमुक्ते !!!
सर्वाभ्युन्नतजनसंस्कृते !!! नमस्ते ॥१९

सन्देहोद्धरणपरीक्षिताग्निसत्ये !
जीवे दर्शितकरुणे !! पशौ सधैर्ये !!!
दुःखान्तेष्वपि हतजीवनेषु वृत्तौ-
निर्धूताखिलदुरितेऽम्बिके !!! नमस्ते ॥२०

निर्द्वन्द्वे । विरहितफल्गुभोगतृष्णे !!
निष्कामे !!! शमितकुशासने !!! प्रशांते !!!
साधूनां हृदि पुरुपार्थराजयोगो-
द्याकाङ्क्षे !!! बलगुणगौरवे !!! नमस्ते ॥२१

सौन्दर्योदधिमथनोत्थरूपराशेः
साराविष्कृतमुखचन्द्रचारुकान्ते !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधानत्वम्

पूर्वानुवृत्तम्— मान्याः श्रीमोतीलालशर्माणः, मानवाश्रमः, दुर्गापुरा

सोऽयं प्रथमोऽसीम आत्मा-अखण्डः। सखण्डस्तु महेश्वर-अक्षरेश्वर-उपेश्वर-भेदात् त्रिधा विभक्तः। महेश्वरः षोडशीपुरुषोऽव्ययात्मा सर्वखण्डात्मनामालम्बनभूमिः। तथा चाह कठश्रुतिः—

एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।
एतदालम्बनं ज्ञात्वा यो यदिच्छति तस्य तत्॥

अक्षरेश्वरः स्वयम्भूरधिदैवतकाण्डे। स एव चाध्यात्मसंस्थायामव्यक्तात्मा प्रथमः प्राकृतात्मा। उपेश्वरविवर्त्तस्य प्रथमः खण्डात्माधिदैवतकाण्डे परमेष्ठी नाम। स एव चात्र महानात्मा श्रद्धासूत्रप्रवर्त्तको द्वितीयः प्राकृतात्मा त्रिगुणमूर्तिराकृतिप्रकृत्यहङ्कृतिभावानां पुरुषयोनिः। तृतीयः खण्डात्मा तत्र सूर्यः। अत्र च विज्ञानात्मा बुद्धिर्वा तृतीयः—प्राकृतात्मा। चतुर्थः खण्डात्मा तत्र चन्द्रमाः, अत्र तु सर्वेन्द्रियाधिष्ठातृ प्रज्ञानं मनो वा चतुर्थः प्राकृतात्मा। पञ्चमश्चोपेश्वरस्तत्र भूपिण्डः, अत्र तु पाञ्चभौतिकं शरीरं भूतात्मा पञ्चमः प्राकृतात्मा। तदित्थं सम्भूय पुरुषः, स्वयम्भूः, परमेष्ठी, सूर्य्यः, चन्द्रः, पृथिवी—इति षट् खण्डात्मानस्तत्रेश्वरसंस्थायां, पुरुषः, अव्यक्तम्, महान्, बुद्धिः, मनः, शरीरमिति षट् खण्डात्मानोऽत्र जीवसंस्थायां स्वस्वसंस्थासञ्चालकाः स्वस्वरूपेण सर्वथा विभक्ता अपि पुरुषदृष्ट्या अविभक्ता एव नित्यमवतिष्ठन्ते। तमेतं क्रमसिद्धं खण्डात्मविवर्त्तं निरूपयन्नाह महर्षिः कठः—

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥१॥
महतः परमव्यक्तमव्ययात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।२

तदिदं सर्वं खण्डात्मविज्ञानं, अखण्डविवेचनञ्चेशोपनिषद्विज्ञानभाष्ये महता समारम्भेण प्रतिपादितमिति तत्रैव द्रष्टव्यम्। सर्वासूपनिषत्सु खण्डात्मनामेवोपासना विधीयते—"आदित्यमुद्गीथमुपासीत" "विज्ञानं ब्रह्मेति व्यजानात्"—प्राणोऽस्मि वा प्रज्ञानात्मा, तं मामायुरमृतमित्युपास्व"—योऽयं दक्षिणेऽक्षन् पुरुषः, स मे आत्मा"—"योऽसावादित्ये पुरुषः सोऽहम्"—"अन्नं ब्रह्मेति व्यजानात्"—"प्राणो ब्रह्मेति व्यजानात्"—"मनो ब्रह्मेति व्यजानात्"—"ओमित्येतदक्षरमुद्गीथमुपासीत"—"आदित्यो ब्रह्मेत्यादेशः"—"अथ होवाचोद्दालकमारुणिं—गौतम! कं त्वमात्मानमुपास्से—इति? 'पृथिवीमेव भगवो राजन्निति होवाच"—इत्याद्युपनिषद्वचनैस्तथैव प्रतिपादित-

---

लावण्यामृतसरसे !! स्वभावमुग्धे !!!
श्रीकान्ते ! युवतिशिरोमणे !! नमस्ते ॥२२

दानान्धद्विरदघटाविघूर्णमान-
व्यूहान्दोलनबलदेवताप्रतीके !
शश्वध्द्रेषिततुरगक्षुराग्ररेणु-
स्तोमोद्धूलितदशदिङ्मुखप्रभावे !! २३

गर्ज्जद्दुन्दुभिघननादभूप्रकम्पे !
स्फीताभ्रङ्कषविजयध्वजे जयेऽम्ब !!
मेघाडम्बरयुतचामरातपत्रे !!!
सोत्साहं विहितरणस्थलाभियाने !!! २४

उत्कर्षाच्चलचतुरङ्गिणीचमूनां,
चञ्चच्छूरगणमदोद्धताट्टहासे !
साम्राज्याभ्युदययशःशरीरभव्ये !!
श्रीराजेश्वरि !!! रिपुमर्दने !!! नमस्ते ॥२५

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वात् । ये तु मान्या जगन्मिथ्यात्त्ववादिनः सर्वकर्मपरित्यागलक्षणसंन्यसानुयायिनः 'सर्वे वेदान्ता अखण्डब्रह्मनिरूपकाः' इत्याहुस्तेषां प्रौढिवादमात्रमेवेति नीरक्षीरविवेकशीलैर्विद्वद्भिरेव मुकुलितनयनैर्विचारणीयम् ।

उक्तं पूर्वं—मायावच्छेदेनाखण्डात्मनि महेश्वरोदय इति । मायाबलोदयादेवासीम्नि परात्परेंऽशरूपेण सीमाभावोदयः । सीमाभाव एव लेखात्मकं पुरम् । तत्रागतः स असीमः 'पुरि शेते' इति ब्राह्मणश्रुतिनिर्वचनात् पुरुषपदाभिधः । सोऽय ससीमः पुरुषः केन्द्रबलावच्छेदेन समनस्कः सन् नित्यं कामयमानोऽवतिष्ठते—"एकोऽहं बहु स्याम्" इत्येवंरूपेण । स एष मनसः प्रथमं रेतः काम एव सृष्टेर्बीजम् । तथा चाह मन्त्रश्रुतिः—

कामस्तदग्रे समवर्त्तताधि मनसो रेतः प्रथमं यदासीत । सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ इति ॥

कामयमानः स तप्यति, अथ च श्राम्यति । कामतपःश्रमाणां संघातेनैव स एष पुरुषात्मा महेश्वरः सर्वं सृजति, यदिदं किञ्चेति—'सोऽकामयत, स तपोऽतप्यत, सोऽश्राम्यत्' इत्यादिवचनैः स्पष्टम् । पुरुषः खलु प्रकृत्या-अविनाभूतः । प्रकृतिश्च-परा-अपरा-भेदेन द्विविधा, यथोक्तं प्राक् । परा प्रकृतिरक्षरः, अपरा तु क्षरः । क्षराक्षराभ्यामविनाकृतरूपः पुरुष एवेदं सर्वं यद्भूतं, यच्च भाव्यम् । विकृतेरधिष्ठाता क्षरपुरुषः सर्वभूतप्रवर्त्तकः । प्रकृतिभावप्रवर्त्तकोऽक्षरः कूटस्थः । उभयोः सञ्चालकः सर्वाधारो निराधारः पुरुषो लोकत्रयाधिष्ठाता पुरुषोऽव्ययः । तमेतं त्रिपुरुषपुरुषात्मकं, प्रकृतिपुरुषात्मकं वा विज्ञानं निरूपयन्नाह भगवान्—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्यय बिभर्त्यव्यय ईश्वरः ॥२॥

परात्पर एव मायोदयादंशभावेन पुरुषः । पुरुष एवांशेन प्रकृतिः । प्रकृतेर्व्यक्तावस्थैव विकृतिः । विकृतेरभिव्यक्तावस्थैव गुणभूतानि, तेषां संघातावस्थैवाणुभूतानि, तान्येव पञ्चीकृतानि महान्ति भूतानि । महद्भ्यो भूतेभ्यो निष्पन्ना भौतिकाः पदार्थाः—इति हि सञ्चरक्रमः पुराणभाषायां सर्गक्रमो वा । प्रतिसंचराख्ये प्रतिसर्गक्रमे तु भौतिकानां पदार्थानाम् महाभूतेषु विलयनं, तेषामणुभूतेषु, अणूनां गुणभूतेषु गुणानां विकृतौ, तस्याश्च प्रकृतौ । प्रकृतिः पुरुषे विलीना भवति । पुरुषस्तु मायाबलग्रन्थ्युच्छेदादखण्डे परात्परे त्वेकमेवाद्वितीयं ब्रह्म, यदिदं सर्वम् । सर्वं खल्विदं ब्रह्म । तथा च विश्वदृष्ट्या-पुरुष-प्रकृति-विकृति-गुणाणुभूतभौतिकवादभेदेनानेकतत्ववादिनो वैज्ञानिका महर्षयः परमार्थतः—केवलं ब्रह्मतत्त्ववादिन एवेत्येषास्माकं तत्वमीमांसा । सर्वत्रानेकत्वं परिपश्यन्तोऽपि वयं परमार्थतः सर्वत्र व्याप्तमेकत्वं न विस्मरामः, इत्येतदेव भारतीयतत्वविज्ञानस्य, पदार्थविज्ञानस्य, किं वाधिभौतिकविज्ञानस्य सर्वोत्कृष्टत्वम् "भिन्नेष्वभिन्नवद् भाति"— "अविभक्तं विभक्तमिव च स्थितम्"—"एक एवाग्निर्बहुधा समिद्धः एकः सूर्यो विश्वमनुप्रभूतः, एकैवोषाः सर्वमिदं विभाति, एकं वा इदं वि बभूव सर्वम्"—"तमेकं सद्विप्राः बहुधा वदन्ति"— इत्यस्यार्य्यमहाभागानां विदितवेदितव्यानामधिगतयाथातथ्यानां, विज्ञानपाथोधितलावगाहिनां घण्टाघोषः । स एष संक्षेपेण आत्मतत्ववादः प्रदर्शितो द्रष्टव्यः ।

इति-आत्मव्याप्तिनिरुक्तिः —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पेट्रोल व केरोसीन तेल



अब लिटरों में बिकते हैं

पेट्रोल उद्योग ने अब मेट्रिक प्रणाली अपना ली है । पेट्रोल और केरोसीन तेल अब लिटरों में बिकते हैं ।

इस प्रकार के परिवर्तन का इनकी कीमतों पर कोई असर नहीं पड़ेगा ।

गैलन	लिटर	गैलन	लिटर	लिटर	गैलन	लिटर	गैलन
१	४.५५	२०	९०.९	१	०.२२	२०	४.४
२	९.१	३०	१३६.४	२	०.४४	३०	६.६
३	१३.६	४०	१८१.८	३	०.६६	४०	८.८
४	१८.२	५०	२२७.३	४	०.८८	५०	११.०
५	२२.७	६०	२७२.८	५	१.१०	६०	१३.२
६	२७.३	७०	३१८.२	६	१.३२	७०	१५.४
७	३१.८	८०	३६३.७	७	१.५४	८०	१७.६
८	३६.४	९०	४०९.१	८	१.७६	९०	१९.८
९	४०.९	१००	४५४.६	९	१.९८	१००	२२.०
१०	४५.५			१०	२.२०		

१ गैलन = लगभग ४½ लिटर

मेट्रिक प्रणाली

सरलता व एकरूपता के लिए

भारत सरकार द्वारा प्रचारित

DA 60/7

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खगोलवर्णनम्

(ले० श्रीमल्लिनाथचौमालः)

पुर्वानुवृतम्

केन्द्रोन्मुखाकर्षणशक्त्या पिण्डः स्वकक्षातो दूरं न गच्छति, तथा केन्द्रपराङ् मुखाकर्षणशक्त्या एकः पिण्डोऽन्यस्य परिक्रमां करोति । अतो गतिरोधनेन गतिप्रक्षेपणेन च केन्द्रोन्मुख-केन्द्रपराङ् मुखशक्त्योरुत्पत्तिर्भवति । तथा पिण्डस्य दूरस्थितिः, निकटस्थितिः, लघुत्वमहत्वादिहेतुभिः साऽनेकधा बुधेन्द्रैः कथिता । यदि पिण्डयोर्मध्ये एकः पिण्डोऽन्यस्माद्दूरस्थितस्तदाकर्षणशक्तेः स्वल्पः प्रभावः । यदि निकटस्थस्तदाधिकः प्रभावो भवति । लघुपिण्डस्य गुरुत्वाकर्षणं लघु । बृहत्पिण्डस्य गुरुत्वाकर्षणं महत् । इत्यादि भेदैः साऽनेकधा भवति, केन्द्रोन्मुखकेन्द्रपराङ् मुखशक्त्योः प्रभावेण प्रतीपगाकर्षणशक्तिरुत्पद्यते यया पिण्डस्य वामाकर्षणं भवति । ययाकृष्टं समुद्रस्य जलं गङ्गादिनदीषु अतिवेगेन गच्छति तेन ताः परिपूर्णाः भवन्ति सैव समुद्रस्य ह्रासवृद्धी इति प्रसिद्धम ।

अथ खगोलवर्णनम्---

प्रकाश [1] धर्मिण्यवकाशमात्र-
व्यापिन्यथाकाश उदीदयमाणे ॥
दृष्ट्या स्वया यंत्रसहायया वा,
यदीक्ष्यते वर्णनमत्र तस्य ॥

स्पष्टार्थमेतत् । अथ विश्वरूपाणां ताराणां ग्रहोपग्रहाणामुत्पत्तिः, तथा या आकाशगङ्गा तथा पौराणिकानां मते शिशुमारचक्रमिति संज्ञया प्रसिद्धा सा किमीत्यादिकानामत्र निर्णयमाह । तदादावाकाशगङ्गामाह—

अथाकाशगङ्गा

स्फुरत्पयःफेनचयावभास,
श्छायापथो दूरतमः पृथिव्याः ॥
दृश्यः क्वचित्तारकितः परत्र
सिताभ्रसङ्घातनिभः प्रसिद्धः ॥९॥
शुभ्राभ्रकाञ्चीप्रतिमः प्रवेष्ट्य,
तारादिकं व्योम्नि विभासमानः ॥
छायापथोऽयं विपुलोऽस्ति बाष्पा
वस्थास्थितो द्रव्यचयश्चिरन्तनः ॥१०॥
घनीभवद्बाष्पचयादमुष्मात्,
कालेन तारानिकरो व्यजज्ञे ॥
ततो ग्रहोपग्रहवर्ग आसीदुत्प्रेक्षितं,
कैश्चिदिदं सुधीभिः ॥११॥

एतेषामपि स्पष्टोऽर्थः । या आकाशगङ्गा रात्रौ शरद्वार्दलमिव प्रकाशमाना दृश्यते अमुष्माद्वाष्पसमूहात् वा एतादृशेभ्यो अन्यसमूहेभ्यस्ताराणामुत्पत्तिर्जाता । ग्रहाणामप्येवमेव ज्ञातव्या । आकर्षणशक्त्या प्रेरिते कार्यालये (टंकशालायां) प्रतिक्षणं अनेकानां ब्रह्माण्डानां सृष्टिर्लयश्च भवति । परं भूतानां सृष्टिश्चामुना प्रकारेण । यथा अस्य संसारस्योपादानं कारणं सूक्ष्मातिसूक्ष्म एक एव पदार्थोऽस्ति, यं प्रकृतिमाहुः आत्मानं वा । तस्याः प्रकृतेः आत्मनो वा प्राकृतातपदार्थाद् घनीभूतात महत्वं जायते ततोऽपि घनीभूतादहंकारः, ततोऽपि घनीभूतादाकाशगङ्गादिवार्दलसमूहानामुत्पत्तिः । ततः पिण्डब्रह्माण्डानामुत्पत्तिः, ततः प्राणिनां सृष्टिः, एवं सृष्टिक्रमः । इति गोलनवांकुरे खगोलाध्यायः प्रथमः ।

1—वाङ मयार्णवे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ द्वितीयो भगोलाध्यायः

अथ भगोलवर्णनम्

तत्रादौ वर्गक्रमेण ताराणां वर्णनम्। यतः

विद्वत्सु तारानिकरस्य वर्गाः—
सप्तर्षिमुख्याः प्रथिता अनेके
वर्गक्रमेणेत्र सुखेन तेषां—
विशेषविज्ञानविधिः सुसाधः ॥१॥

उत्तर ध्रुवतः

तक्षकशिशुमारशिफाः सुमेरुसविधेऽक्षगतिवृत्ते ।
वीणाजानुगमुकुटं कृषकश्वयुगर्षयो वनोतुश्च ॥२
चित्रक्रमेलकश्यपगोधा हंसा शिवा परे वृत्ते ।
गरुडनरेन्द्रभुजङ्गाः करिमुण्डः सिंहशावकः सूतः ॥३
परशुत्रिकोणदोला वाज्यश्वतरौ तिमिर्बाणः ।
एते तृतीयवृत्ते चतुर्थवृत्ते तु राशयः प्रथिताः ॥४

दक्षिण ध्रुवतः

सरटह्रदाऽहि घटिकाः सुवर्णयष्टिः कपोतश्च ।
पोतशलाकाष्टास्रं कुमेरुसविधेऽक्षगतिवृत्ते ॥५
वृत्तत्र्यस्र मयूराश्चतुरस्रं श्येनिका सरिच्च शशः
शुनकस्त्रिशङ्कुमुष्कौ सुपर्ण इति च द्वितीयवृत्ते तु ॥६
महिषवृकवेदिदूरेक्षणकोटीराणि सिन्धुश्च ।
सूक्ष्मेक्षणमपि सारसशकुलौ टंकस्तिमिंगिलो व्याधः
शृङ्गी श्वशिशुः शेषश्चमसः काकस्तृतीयवृत्तगताः ।
ज्योतिर्गणिताभिज्ञैरिति तारावर्गसंग्रहो विहितः ॥८

स्पष्टार्थः। तथापि भगोलचित्रे निवेशनमाह। आकाशस्य उत्तरध्रुवतो नाडीवृत्तपर्यन्तमेको विभागः, उत्तरगोलार्द्धं वृत्ताकारं लेख्यम्। तथैव दक्षिणध्रुवतो नाडीवृत्तपर्यन्तं दक्षिणगोलार्द्धं लेख्यम्। तत उत्तरध्रुवतो जिनांशान्तरेणैकं वृत्तं विधेयम्, तदेवाक्षगति वृत्तम्। तत एकविंशति लवान्तरे द्वितीयवृत्तं, तत एकविंशतिलवान्तरे तृतीयं वृत्तं विधेयम् चतुर्थं वृत्तं तु नाडीवृत्तमेव (भूमध्यरेखा), एवमुत्तरगोलस्य विभागचतुष्टयं भवति। एवमेव दक्षिणध्रुवतो विभागचतुष्टयं विधेयम्। ते च क्रमशः २४-२१-२१-२४ इति संख्याका भविष्यन्ति। एवं भगोलस्य विभागद्वयं विधाय तत्र मण्डलानि निवेशयन्ति। तारकाणां कल्पितरेखाभिर्मेलनात्तत्तदाकारमाकाशे दृश्यते। यथोत्तरध्रुवपरितो जिनांशवृत्ते तक्षकमण्डलं, शिशुमारमण्डलं, शिफामण्डलं च दृश्यते। मण्डलान्येव ताराणां वर्गाः। एवं द्वितीयवृत्ते वीणामण्डलं, जानुगमण्डलं, मुकुटं, कृषकमण्डलं, श्वयुग्ममण्डलं, ऋक्षमण्डलं, वनोतुर्वनमार्जारमण्डलम्, चित्रक्रमेल, कश्यप, गोधा, हंसा, शिवाशृगालमण्डलानि सन्ति। तृतीयवृत्ते तु गरुड, नरेन्द्र, भुजङ्ग, करिमुण्ड, सिंहशावक, सूत, पर्शु त्रिकोण, दोला, वाजी, अश्वतर, तिमि, बाण, इत्यादि मण्डलानि सन्ति। चतुर्थवृत्ते तु उभयतोराशयः एव सन्ति। एवमेव दक्षिणध्रुवतः क्रमेण यथानामनिवेशितानि मण्डलानि ज्ञेयानि। द्रष्टव्य च भगोलचित्रे सर्वम्। अत्र कतिचिन्मण्डलानि तु प्राचीनकालत एव कल्पितान्यायान्ति यथा तक्षकमण्डलं उक्तञ्च महाभारते 'त्वमिन्द्र हन्ता विस्रस्तं विषंगं पन्नगोत्तमम्। आस्तिकैस्तिष्ठतिष्ठेति वाचरिःस्रोऽभ्युदीरयत्। वितस्थे सोन्तरिक्षे च हृदयेन विदूयता। शिशुमारमण्डलं, यथा 'तारामयं भगवतः शिशुमाराकृति प्रभोः। दिविरूपं हरेर्यस्तु तस्य पुच्छे स्थितो ध्रुवः। इति विष्णुपुराणे। सारमेयमण्डलं यथा 'द्वौ उदपततां तौ दिव्यौ श्वानौ अभवताम्' इति तैत्तिरीयब्राह्मणे। सप्तर्षिमण्डलं चित्रशिखण्डीमण्डलं वा यथा 'सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः।' इत्यमरः। तथैमे एव ऋक्षमण्डलं यथा 'ऋक्षाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओरियण्ट पेपर मिल्स

निम्नलिखतानि वस्तूनि निर्मीयन्ते

बन्धनाय:-

(१) एम्. जी. रिब्ड क्राफ्ट
(२) एम्. एफ्. अनरिब्ड क्राफ्ट
(३) अक्लेद्य (वाटरप्रूफ) क्राफ्ट
(४) क्रेप क्राफ्ट

लेखनाय, मुद्रणाय च:-

(१) श्वेतपत्रम्
(२) क्रीमरङ्गस्य
(३) अर्धश्वेतीकृतपत्रम्
(४) अश्वेतीकृतं पत्रम्

आवरणाय-पेटकानां, पुटकानां च निर्माणाय कार्टनबोर्ड, ग्रेबोर्ड, जुप्लेक्स, ट्रिप्लेक्स, कार्त्रिज, टिकटबोर्ड, आवरणबर्ड प्रभृतिवस्तूनि निर्मीयन्ते।

ओरियण्ट पेपर मिल्स (सीमितम्)

प्रबन्धाधिकर्त्तारः-बिरलाबन्धवः [स्वतन्त्रम् सीमितम् बजरङ्गनगर, (उडिसा)

हरिनगर सूगर मिल्स लि०

*** फेक्टरी ***

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्--

मर्यादा-रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई-२

दूरभाषयन्त्रम्-

'क्रिस्रूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेनरक्षगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तर्षयः' इति सायणः । काश्यपीयमण्डलं यथा 'वशिष्ठः कश्यपोऽथात्रिर्जमदग्निः सगौतमः । विश्वामित्रो भरद्वाजः सप्त सप्तर्षयोऽभवन् ।' इति विष्णुपुराणे । तिमिमण्डलं यथा 'पतितं तत्र च एव एकः मत्स्यो जग्राह बालकम्' इति विष्णु पुराणम् । ब्रह्ममण्डलं यथा 'ब्रह्मराशिर्विशुद्धश्च' इति वाल्मीकीयरामायणे । सुवर्णाश्रममण्डलम् यथा इत्येवमुक्त्वा भगवान् जगाम दिशं स यामीं सहसा-न्तरीक्षम् । तत्राश्रम रम्यतरं हि कृत्वा स शुद्ध-जाम्बूनदतोरणान्तम् । तत्राथ निक्षिप्य विदर्भपुत्रीं स्वमाश्रमं सौम्यमुपाजगाम' इति वामनपुराणे । कालपुरुषमण्डलं मृगमण्डलं च 'प्रजापतिर्वै स्वां दुहितरमभ्यधावत—तां ऋक्षः भूत्वा रोहिद् भूता-मभ्यैत् उदप्रपतंतमेतं मृग इति आचक्षते' इति ऐतरेय ब्राह्मणे । अर्णवयानमण्डलं 'हिरण्मयी नौ अचरत् हिरण्यबन्धना दिवि । तत्र अमृतस्य पुष्पं देवाः कुष्ठं अवन्वतः । इत्यथर्ववेदे । शुनी-मण्डलं वा सरमामण्डलं 'अपः यदद्रीं पुरुहू-तदर्दः आविर्भुवत् सरमापूर्वन्ते' इत्यथर्ववेदे । ह्रदसर्पमण्डलं 'नात्र स्थेयं त्वया सर्प कदाचित यमुनाजले । स भृत्यपरिवारस्त्वं समुद्रसलिलं व्रज ॥ इति विष्णु पुराणे ।

—क्रमशः

अमृत--वाणी

पाश्चात्यानां संपर्केण अस्माकं अभिमानः तथा विनष्टः यथा अस्माकम् आचरणस्य अंशे अंशे तेषां प्रभावः स्फुटं दृश्यते । भवतु सा गृहनिर्माणपद्धतिः उत वेष पद्धतिः । सर्वत्र तेषामेव अनुसरणं दृष्टिपथम् आयाति । अस्य परानुकरणस्य अयमेव अर्थः यत् आत्मनः तेभ्यः निकृष्टतरान् मन्यामहे अनुकरणेन च नूनं तेषां पूजनं कुर्महे । परानुकरणस्य इयम् अधम-प्रवृत्तिः हिन्दुराष्ट्रस्य निःशेषं विनाशस्य कारणं भवितु-मर्हति । अतः अस्मज्जीवनं साभिमानं कर्तुं प्रयतेमहि । हिन्दुत्वस्य आविष्कारः जीवने भवतु इतीदृशमाचरणं कुर्वीमहि । हिन्दुत्वस्य अभिमानः नितरां श्रेयोयुतः । हिन्दुजीवनपद्धतिः श्रेष्ठा पद्धतिः । कानपि विशेषान् भजमाना जीवनप्रणालिः सा । अतः साग्रहं तदनुसारम् आचरणं कृत्वा, हिन्दुराष्ट्रस्य पुनर्जागरणं प्रारब्धमिति विश्वासं लोकेषु जनयेम ।

★

त्वर्यताम् !!! संस्कृते अभिनवं सचित्रं वर्णनकाव्यम् अनुग्राहकैः—

जयपुरवैभवम्

(लेखकः—भारतप्रसिद्धः कविशिरोमणिभट्टश्रीमथुरानाथशास्त्री)

राजथानस्य, जयपुरस्य च ऐतिहासिकं सचित्रं विनोदमयं काव्यगतं च वर्णनम् । हिन्दी-अनुवादः सहैव दत्तोऽस्ति ।

भारतीग्राहकाणां कृते मूल्ये ७% न्यूनता

मूल्यं ५) पृष्ठ संख्या ७००

प्राप्तिस्थानम् :—"भारती"ग्रन्थागारः, मञ्जुनिकुञ्जः, सी-स्कीम जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फेनकाष्टकम्

(कवयिता—श्रीकलानाथशास्त्री, सहसम्पादकः)

(आधुनिकयुगे फेनक(Soap)स्य दिने दिने वर्धमानं प्रचारं वीक्ष्य सहसा नवयुग—कविस्तदिदं स्तोतुं बद्धादरः स्यादित्यत्र नाश्चर्यम्। 'द्रव्यशुद्धिः' (धर्मशास्त्रस्याध्यायविशेषः) अस्मिन् युगे फेनकमेवाधारीकरोति।)

—संपादकः

क्षणेन गात्रं निमिषेणहस्तं पलेन वस्त्रं परिमार्जयन्तम्।
मुखत्वचः कान्तिकरं समन्तात् वन्देऽनिशं फेनकतल्लजन्तम्॥

"मृत्स्नाविमर्दं कुरु पंचकृत्वः शौचाय शश्वत्करयोस्तवे"ति।
येनाऽद्य रूपान्तरितास्ति लोके सा धर्मशास्त्रस्य पदार्थशुद्धिः॥

प्रातर्मलोत्सर्गविधेः परस्ताद् यद्घर्षणं कीटहरं विधाय।
करौ मुखं च प्रविमार्ज्य नित्य येन त्रिवर्गं मनुजा लभन्ते॥

यस्योज्ज्वलैः फेनकणैः स्वकीयत्वक्स्वास्थ्यसौन्दर्यमुपैधयन्त्यः।
जनस्य चेतांसि हरन्ति चञ्चन्मुखच्छविषश्चित्रपटस्य ताराः॥

कान्तेस्तडागं सुषमाहृदाभं चन्द्रप्रकाशोज्वल-निर्झराभम्।
सौरभ्यसिन्धुं ह्यमृतस्य बिन्दुं तत्फेनकं फेनकरं नमामि॥

पानीय-संगाद् बहुमुक्तफेनं सुदीर्घमेनं नहि कश्चचन्द।
को रोमकूपोद्गमितैर्जगाद प्रेम प्रहृष्टैः पुलकैर्न च स्वम्?

पुरायुगे चेदिदमुद्गतं स्यान्म्लानाङ्गतालाञ्छनकं सुदाम्नः।
दुर्वाससो वस्त्रयुगस्य चैव मालिन्यनिन्दा खलु नाभविष्यत्॥

सूर्यप्रभा[1]—लक्स[2]—हमाम[3]—मुख्यैरेतत् प्रसिद्धं बहुनामरूपैः।
विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमिदंतया वा॥

---

१. सनलाइट २. लक्स ३. हमाम

संस्कृत-समाचाराः

व्यासजयन्ती-महोत्सवः प्रमाणपत्रवितरणञ्च

जयपुरस्थ-श्रीसंस्कृतवाग्विवर्द्धिन्या परिषदा संस्थापिते रात्रिसंस्कृतविद्यालये व्यासजयन्तीमहोत्सवो १०—७—६० दिनांके संमानितः। सूरत—नागपुर—मोहमय्यादि संस्कृत-प्रचारपरीक्षाणां प्रमाणपत्राणि शुभाशीर्वादाभिनन्दन-पुरःसरं छात्रेभ्यो वितीर्णानि। तत्तत्परीक्षासु सर्वाधिकाङ्कप्राप्तिकर्तृभ्यः विद्यार्थिभ्यः समितेः प्राप्तानि पारितोषिकाणि केन्द्रपक्षाच्च अग्रिमपरीक्षाणां पाठ्यपुस्तकानि पुरस्काररूपे प्रादीयन्त।

परिषन्मन्त्रिणा केन्द्राध्यक्षेण श्रीनारायणशास्त्रि-काङ्करेण सभापतिसभाजनोत्तरं परीक्षासमितीनां पूर्णं परिचयं कारयता विगत दशवर्षेभ्यः संस्थापितस्य रात्रि-संस्कृतविद्यालयस्य प्रगतिविवरणञ्चोपस्थापयता समुत्तीर्ण-स्नातकानां तदभिभावकानां सहयोगिसज्जनानाञ्च अभिनन्दनं कृतम्।

अथ राजस्थानशिक्षाविभागीयपरीक्षासञ्चालकाः पं० श्रीयुगलकिशोरशर्माणो महाभागाः प्राचीनकालिक गुरु-शिष्याणां मधुर सम्बन्धम् निदर्शयन्तो वर्त्तमानेऽविरत-मभिवर्धमानाया अनुशासनहीनताया अनैतिकताया भ्रष्टाचारितायाश्चावरोधाय शिक्षायां संस्कृतभाषायै अविलम्बं समुचितं स्थानं प्रदातुमावश्यकं घोषितवन्तः। संस्कृत—तत्साहित्यस्य च शिक्षणार्थं पृथक् पृथक् शालासंस्थापनार्थं तदनुरूपं पाठ्यक्रमञ्च निर्मातुमपि स्वीयान् विचारान् प्रकटितवन्तः।

ततोऽध्यक्षपदादभिभाषमाणाः श्रीचन्द्रशेखरद्विवेदिनो महाभागाः संस्कृतभाषाध्ययनस्य तात्कालिकीमुपयोगितां प्रदर्शयन्तो राष्ट्रभाषात्वेन संविधानद्वारा स्वीकृताया हिन्दीभाषायाः श्रियोऽभिवृद्धौ तां संस्कृतभाषां परमसाहाय्य प्रदात्रीं साधितवन्तः। तदनु संस्कृतस्य विविध-दृष्टान्तैः सातिशयसारल्यं द्योतयन्तस्तदीयं महत्वं मण्डयन्तः परिषदविद्यालयप्रगत्या सन्तोषं च प्रकटयन्तो बालकबालिकाः संस्कृतमध्येतुं प्रेरितवन्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान को स्मरण रखिये

★ किले ★ राजप्रसाद ★ झीलें ★ वन्य-जीवन ★ आवास ★ तीर्थस्थान ★ स्थापत्यकला ★ चित्रकला ★ मूर्तिकला ★ भव्य हस्त उद्योग ★ छपाई और बंधाई का काम ★ केलिको की छपाई ★ लाख की चूड़ियां ★ पीतल, हाथीदांत तथा चन्दन के सामान ★ जस्ते की बनी पानी की अटैचियां ★ कसीदाकारी का सामान ★ आभूषण जवाहरात।

★ देश का सबसे बड़ा मशीनरी-युक्त सूरतगढ़ कृषि फार्म

★ विश्व की सबसे लम्बी राजस्थान नहर (निर्माण कार्य चालू है)

★ सांभर का सबसे बड़ा स्थलीय नमक उत्पादन क्षेत्र

★ देश में सबसे अधिक ऊन उत्पादन करने वाला प्रान्त

★ संगमरमर, चांदी तथा एमरेल्ड की भारत प्रसिद्ध खानें

★ राजस्थान प्रथम योजना काल में खाद्य-स्वावलम्बी बन गया। द्वितीय योजना-काल में खाद्यान्न उत्पादन का लक्ष्य ३५ से ४३'१२ लाख टन

★ सामूहिक विकास क्षेत्र में राज्य के नागरिकों ने ४६६'८५ लाख रु० का योग दिया जो ५० प्रतिशत अनुदान के बजाय ८४ प्रतिशत रहा

★ नई ग्रामीण बीमा योजना के अन्तर्गत राज्य के ५००० ग्रामीणों ने १'४७ करोड़ रु० का बीमा कराया, जिसमें ग्राम पंचायतों को २० हजार रु० की अतिरिक्त आय प्रतिवर्ष होगी।

★ जब आप राजस्थान के गुलाबीनगर जयपुर को देखने आवें तो कृपया राजस्थान स्टेट होटल (वातानुकूलित कमरों) में ठहरिये

राजस्थान सरकार द्वारा प्रचारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

'देवनागर' लिपेः संशोधितं रूपम्

सेयं संस्कृतभाषा चिरकालाद् यान्यक्षराणि लेखनव्यवहारे स्वीकरोति, तान्यक्षराणि विज्ञानसंमतानि। तेषां तादृशं रूपं केनचित्कारणेन तादृशमेव स्थिरीकृतम्। एतेषामक्षराणामाकृतौ अन्यथाभावो न संभवतीति प्राचीनाचार्यैर्विमर्शपूर्वकं निर्धारितमासीत्। तन्त्रेषु ('वर्णोद्धारतन्त्रे') तत्तेषामक्षराणां स्वरूपम्, आकृतिश्च असंदिग्धरूपेण स्थिरीकृतेति मार्मिकाः संस्कृतविद्वांसो जानन्ति। वङ्गाक्षरेषु, देवनागराक्षरेष्वपि च "शब्दकल्पद्रुम" नामा यः संस्कृतकोषः प्रकाशितस्तस्मिन् आदिमं यदक्षरमादाय शब्दा निर्दिष्टास्तस्य वर्णस्य स्वरूपं लेखनप्रकारश्च "वर्णोद्धारतन्त्रस्य" नामनिर्देशपूर्वकं सर्वतः पूर्वं प्रबोधितमिति सर्वेप्यक्षरमुखाः प्रेक्षितुं प्रभवेयुः। किन्तु वर्तमानशिक्षया प्रबोधमापन्ना नवीनशिक्षितमहाभागाः तामिमां देवनागरलिपिम् बहोः कालादतिसूक्ष्मरूपेण आलोचितवन्तः, लिप्यामेतस्यां नानाविधानि संशोधनानि कर्तुमाग्रहं च प्राकाशयन्।

'भारतीयशिक्षामन्त्रालयस्य' एकस्यां विज्ञप्तौ घोषितमभूत्—"देवनागरलिपेरक्षराणाम् एकविधरूपनिर्धारणार्थम् 'मुद्रणे, अक्षरलिपियन्त्रे ('टाइपराइटिङ्ग') च आवश्यकसुविधार्थं नागराक्षरलिप्यां संशोधनस्य समभूदावश्यकता" इति।

इतः पूर्वम् एतस्मिन् विषये प्रतिष्ठितव्यक्तीनाम्, एतद्विषयकसंस्थानाम्, तत्तत्प्रदेशीयराजतन्त्राणां चापि प्रबोधनानि ('सुझाव') समुपालभ्यन्त। अतएव १९५३ तमस्य खिष्टवत्सरस्य नवम्बरमासे उत्तरप्रदेशीयसर्वकारेण लखनऊनगरे एकं महत्संमेलनमकारि, यत्र देवनागरलिप्यां संशोधनानि प्रदर्शितानि नानाविद्वद्भिः। १९५५ तमखिष्टवत्सरस्य जनवरीमासे तान्येतानि संशोधनानि सर्वकारद्वारा स्वीकृतान्यभूवन्। अन्यान्यप्रदेशीयराज्येषु सूचना च प्रेषिताऽभूत्—"यत् हिन्दीभाषाकार्येषु संशोधनानुसारमेव अक्षररूपाणि व्यवहार्याणि" इति।

एतासां सूचनानां प्रत्युत्तरे राज्यसर्वकारैर्निवेदितमभूद् यत्—"लखनऊसंमेलनस्य संशोधनानि पूर्णरूपेण नानुमतानि"। हिन्दीजनतायामपि संशोधनानामेषा विरोधः प्रकटितोऽभूत्। किं बहुना, १९५३तमवर्षमारभ्य ५७तमे वर्षे यावत्, स्वयम् उत्तरप्रदेशीयसर्वकारस्य सविधेऽपि नवीनसंशोधितरूपाणां स्वीकारेण लेखनादिविषये महती व्यावहारिकी कठिनता समुपातिष्ठत्। अतः उत्तरप्रदेशीयसर्वकारेण १९५७तमवर्षस्य अक्टूबरमासे संशोधनविषये पुनर्विचारार्थमेकं संमेलनमामन्त्र्यत यस्मिन् अद्यावधिजातानां संशोधनानां विचारः, किञ्चित् परिवर्तनं चाऽक्रियत।

तदनन्तरं भारतसर्वकारस्य शिक्षामन्त्रालयेन विषयेऽस्मिन् पुनर्मर्मणि विचारः कृतः, "इमे विचाराः 'शिक्षामन्त्रिणां सम्मेलने' स्थ प्येरन्निति निश्चयश्च" कृतः। भारतसर्वकारेण विशेषज्ञानामेकं महत्संमेलनं पुनरामन्त्रितं येन "शिक्षामन्त्रिणां संमेलनम्" एतद्विषयकविशेषज्ञानां सिद्धान्तं ज्ञातुं प्रभवेत्। सारांशश्चायम्—१९५९ वर्षीये अगस्तमासे शिक्षामन्त्रिणां संमेलने अद्यावधिजातानां संशोधनानां, परिवर्तनानां च पूर्णविचारः समभूत्। एतद्विषये आवश्यकं स्पष्टीकरणं च प्रकाशितमभूत्। अग्रे 'एतदनुसारमेव कार्यं परिचाल्येत' इति घोषणापि प्राकाश्यत। एतदनुसारं संशोधिता नागराक्षरमाला निम्नलिखितास्ति।

सेयं संशोधिता वर्णमाला प्रायः प्राचीनप्रकारिकैव। केवलं 'खकारे' 'र'कारस्येवायमादिभभागः शिरोरेखया विशेषरूपेण संमिलितो भवेत्। 'छ'वर्णस्य ग्रन्थेरग्रे या रेखा आसीत् सा छिन्ना, केवलं 'छ' इतिरूपं स्यात्। 'ध' 'भ' वर्णयोः प्रारम्भे 'ध, भ' इति ग्रन्थिर्योजिता, यथा महाराष्ट्रप्रान्ते प्रचलिता। महाराष्ट्रप्रान्तीयः 'ळ' कारः संगृहीतः, 'त्र' अक्षरस्य पूर्णतो निर्वासनं जातं,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहल्या

(ले० दीनानाथत्रिवेदी 'मधुपः' जयपुरम्)

पूर्वानुवृत्तम्

ततः शापाद्विमुक्ता साऽहल्या सम्मुखे समुपस्थितस्य रामस्य शुभदर्शनेन पूर्वामात्मनोऽवस्थां सस्मार। तदर्थं च कृत्वा पश्चात्तापं बाष्पवारिपरिपूर्णलोचना बद्धांजलिः सा भक्त्या श्रद्धया च रामलक्ष्मणावुभावपि ववन्दे। अथ स्वकीयः शेषो जीवनस्य समयः सदा सदाचारमनुपालयन्त्यैव तया यापितः। अत एवाद्यापि भारतवर्षस्य विशिष्टासु सतीशिरोमणिषु तस्या नाम प्रथमं भवति परिगणितम्।

अपि चाहल्याचरितादस्मादेषा शिक्षाऽपि मिलति यज् ज्ञातरूपेणाऽज्ञातरूपेण वा कृतस्य कुकर्मणः परिशुद्ध्यै यदि जनः सत्येन मनसा पश्चात्तापं कुर्यात्, तथा पुनरग्रे तथाविधस्य जुगुप्सितस्य कर्मणोऽननुष्ठानस्य सङ्कल्पञ्च कुर्यात्। तदा महापातकिनोऽपि जनान् भगवान् पतितोद्धरणदक्षः क्षणात् समुद्धरतीति।

किं च रामचरितमानसस्याऽध्ययनेन बहूनामेव जनानामयमस्ति विश्वासो यद् भगवता रामेण अहल्या पदा स्पृष्टेति। परं नैवमस्ति, यतो हि मर्यादापुरुषोत्तमः श्रीरामः कर्मेदं कथं कर्तुमर्हति स्म। तथा हि विश्वामित्रो रामं प्रत्याह—

"गौतम नारी साप बस उपलदेह धरि धीर।
चरन कमल-रज चाहती करहु कृपा रघुबीर॥"
(मानसे)

"तव पादरजःस्पर्शं कांक्षते पवनाशना।"
(अध्यात्मरामायणे)

अत्रोभयत्रापि समाधनमित्थं कर्तुं शक्यते यद् रामस्य साक्षाच्चरणस्य स्पर्शो न बोध्यते, अपि तु तदीयचरणरजसः। इति। एवमग्रेऽध्यात्मरामायणे—

तत्स्थाने 'क्ष' इति रूपं गृह्येत। हिन्दीभाषायां दीर्घस्य 'ॠ'कारस्य प्रयोगो न भवतीति तस्यापि बहिष्कारो जातः।

संयुक्ताक्षरनिर्माणे तदिदं संशोधनं जातं यत् येषु वर्णेषु उत्थिता रेखा '।' संयुज्यते यथा—ख, ग, ज, श इत्यादिषु। तेषां तामिमां रेखां पृथक् कृत्वैव संयुक्ताक्षरं निर्मीयेत, यथा—ख्यातिः ग्यारस, छज्जा, पथ्य इत्यादि। ककार-फकारयोः संयोगः प्राचीनप्रक्रिययैव। यथा—संयुक्तः, पक्का, दफ्तर इत्यादि। ङ, छ, ट, ठ, ड, ढ, द, एतेषां संयोगेन यान्यक्षराणि भवेयुस्तत्र हल्चिन्हं दत्वैव रूपं निष्पाद्येत, यथा—वाङ्मय, लट्टू, बुड्ढा, विद्या इत्यादि। 'रेफ' संयोगस्य प्राचीनाः त्रयोऽपि प्रकारा यथावत्स्वीकृताः। यथा—प्रकार, धर्म, राष्ट्र, इत्यादि। 'श्र' इत्यस्य प्राचीनमेव रूपं भवेद्। यथा—'श्रीः' इति। 'ह'कारस्य संयोगो द्विधापि भवेत्, हल्चिह्नेन सहितं यथा—चिह्न इति। चिह्नं चेति प्राचीनप्रसिद्धम्।

एतानि संशोधनानि हिन्दीवर्णमालायां विहितानि। संस्कृतभाषायां तु पुराणशैल्यापि वर्णलेखो भवेदिति निर्दिष्टम्। बहवो नवीनशिक्षिताः शिरोरेखाविरहितान्यक्षराणि प्रचारयन्ति, यथा—"कमाल, ब्रजसाहित्य", इत्यादि। किन्तु मन्त्रालयेन सेयं शिरोरेखा सर्वथा दृढरूपेण स्थिरीकृता।

इदानीं संस्कृतसेविनः संघीभूय स्वयं विचारयेयुस्तैः किं कर्तव्यम्, येषां हि व्यवहारे दीर्घ 'ॠ' कारोऽपि भवति। कामं सोयं व्याकरणमात्रे प्रसिध्यति, सोपि उदाहरणार्थं कृत्रिमरूपेण, यथा—'होतॄकारः'। लृकारस्य तु प्रयोगः केवल 'क्लृप्तः' इति 'कृपू' सामर्थ्ये' इति धातोः प्रयोगे एव। तदा हिन्दीभाषायां 'लृ' कारस्य का कथा। स तु सर्वथा बहिष्कृतः। अस्मदादीनाम् अक्षराभ्यासकाले हिन्दी-अध्यापका अपि—"ऋ ॠ, लृ ॡ" इत्यादि समघोषयन्। किन्तु वर्तमानकालेन तद्विषये साधु संशोधनसमीक्षा संविहितेति किमधिकं वक्तव्यम्।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"रामः शिलां पदा स्पृष्ट्वा तां चाऽपश्यत्तपोधनाम् ।
ननाम राघवोऽहल्यां रामोऽहमिति चाब्रवीत् ॥"

इह तु यद्यपि साक्षात् चरणस्य स्पर्श एवोपवर्णितः कविना, परमस्ति स शिलायाम् । रामो विगतचेतनभावां शिलारूपां तां पदा स्पृष्टवान्, परं यदैव चरणस्पर्शात् त्यक्तशिलारूपां सद्यः सम्प्राप्तपूर्वदेहां तां दृष्टवान्-तदैव 'मुनिपत्नीयं मम मान्येति बुद्ध्या रामः पुनरहल्यां प्रणनामापि । अत एवाऽहल्योक्तिरपि रामचरणरजःकणसम्बन्धमेव बोधयति । यथा—

"अहो कृतार्थाऽस्मि जगन्निवास ते, पादाब्जसंलग्नरजःकणादहम् ।" इति

रामचरितमानसेऽपि यथा—

"परसत पद पावन सोक नसावन,
प्रकट भई तप पुंज सही ।

अर्थात् शोकनाशक—जगत्पावन—रामचरण—स्पर्शानन्तरमेव तेजःपुञ्जशालिनी साऽहल्या प्राकट्यमाप, न तु रामचरणस्पर्शात्पूर्वम् । अतोऽपि न दोषः । एवमेव पद्मपुराणवचनस्यापि सङ्गतिः करणीया । तथाहि—

"गच्छतस्तस्य रामस्य पादस्पर्शान्महाशिला ।
काचिद् योषाऽभवत्सोऽपि विस्मितो मुनिरब्रवीत् ॥"

अत्रापि महाशिलारूपायां तस्यां यावद् रामचरणस्पर्शो न जातस्तावत् साऽहल्याऽहल्यारूपे आसीदेव न । किं च रामचरणस्पर्शानन्तरमपि 'काचित् योषा' इति पदाभ्यां नाऽप्यहल्यायाः सहसा स्फुटप्रतीतिरपि । अतोऽपि चरणस्पर्शजनितस्य दोषस्य शंकैव न जागर्ति ।

वस्तुतस्तु वाल्मीकीयरामायणे—

"राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा ।
स्मरन्ती गौतमवचः प्रतिजग्राह सा हि तौ ॥"

इत्युक्तरीत्या वाल्मीकिनात्रोक्तदोषः सर्वथा परिहृतः ।

किं चात्र श्रीगणेशप्रसादमहोदयस्तु—ब्रह्मपुराणे वर्णितस्य ग्रहल्योपाख्यानस्य सरलतमं आधिभौतिकमर्थन्तूपयुक्तरीत्यैव प्रत्यपादयत् । तथाऽऽधिदैविकमर्थमित्थं निर्वक्ति—

आसीद् गौतमः कश्चन कृषीवलः । अभूत् तस्य क्षेत्रस्य भूमेश्च नाम अहल्येति । यतो हि सा हलेन आकृष्टा नासीत् । अतएव तन्नाम "अहल्या" इति प्रथितं जातम् ।

एकदा इन्द्रः (घनसमूहैः) तत्र अहल्याख्यभूमौ इयतीं महतीं वृष्टिं कृतवान्, यया तस्याः सस्योत्पादनसमर्था मृत्तिका सर्वापि प्रावहत् यद्वशान् नीचैः स्थिताश्च महान्तो महान्तः पाषाणाः प्रादुरभूवन् । ततः अहल्याभिधा सा उर्वरा मही पाषाणमयी बभूव । अथ किञ्चित्कालानन्तरं वृष्टिरवरुद्धाऽभूत् । खण्डशो भूत्वा घना अपि विलयमुपयाताः । एवमब्देषु गच्छत्सु यदा रामराज्यं प्रावर्तत, तदा तत्र कृषिरप्युन्नतिं बभार । नृपतिर्भ्रान्त्वा २ सर्वमपि देशं समुन्नतं कृतवान् । स च स्वचरणसंकेतेन मन्त्रिणः समादिष्टवान् यद् भवद्भिरितः सर्वेऽपि पाषाणास्तथा अपनेया यथेयं भूमिः उर्वरा स्यादिति तथैवाऽऽचरितं तैः । ततः पाषाणमयी अहल्या पुनः उर्वरा 'अहल्या' संवृत्तेति ।

आध्यात्मिकार्थविषये च—जीवात्मनोर्नाम वर्तते "गौतमः" इति । बुद्धेश्च नाम अहल्येति । इन्द्ररूपचित्तस्य विविधशङ्कारूपचाञ्चल्येन बुद्धिर्जायते कुण्ठिता । ज्ञानोदयेन च चित्तस्य सर्वासामपि शङ्कानां जाते विलोपे बुद्धिः पुनः स्थैर्यं भजते, येन रामराज्यस्य शान्तिः सम्भवति सुलभेति ।

वस्तुतः पुराणानां वेदार्थोपबृंहणं तदा पुराणेषु वेदार्थ एव मनोरमसरण्या विन्यस्तो वर्णितः । परं सोऽयमर्थो वाच्यार्थ इव साधारणैः सर्वैरपि जनैर्न सुखेन बुध्यते ।

तथा ह्यत्र विदुषां कथनमस्ति यत्—वेदे अहल्यापदेन प्रातःसन्ध्या अथवा रात्रिरुच्यते, 'अहनि लीयते या सा अहल्या' इति व्युत्पत्तेर्दर्शनात् । सूर्ये समुदिते सा पलायते, अन्ते च सा शनैः शनैः दर्शनाऽभावमुपयाति । अतएव अहल्याया जारश्च सूर्य एव उक्तः । "स्वसुर्यो जार उच्यते" (ऋग्वेद सं० भाष्ये मं ६ अ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ सू० ५५) अर्थात् इन्द्रस्य सूर्यरूपेण वर्णनात् । कथैषा मूलकथाऽऽधारेण भवत्युपपन्नेति ।

अथाऽत्र पूर्णो मन्त्रो यथा—"पूषणं न्वजाश्वमुपस्तोषाम वाजिनम्' स्वसुर्यो जार उच्यते ।" भगवान् सायणाचार्यस्तु–इत्थमाह—अजाश्वं छागवाहनं वाजिनं अन्नवलं बलवन्तं वा पूषणं पोषकं देवं नु अद्य उपस्तोषाम उपस्तवाम, यः पूषा स्वसुरुसो जारः उपपतिरित्युच्यते—तं पूषणामित्यन्वयः । इति

किं च कथेयं तन्त्रवार्तिकेऽपि मीमांसकमूर्द्धन्येन कुमारिलभट्टेन एवमुल्लिखिता वर्तते—

"एवं समस्ततेजाः परमेश्वरनिमित्तः इन्द्रशब्दवाच्यः सविता एव अहनि लीयमानाया रात्रेरहल्याशब्दवाच्यायाः क्षयात्मकजरणहेतुत्त्वाज्जीर्यत्यस्मादनेन वोदितेनेत्यहल्याजारः, न परस्त्रीव्यभिचारात् ।" —

एवमुक्तरीत्या विलोक्यते यद् वैदिके प्रकृति-वर्णने यत् स्वरूपमस्ति वर्णितं तदेव पौराणिकयुगमुपगतं रुचिरकथारूपेण परिणतमभूत् । इत्थञ्चोक्तवैदिकार्थदिशा लोकेतिविस्तारमुपयात इन्द्रसम्भोगसमुद्भूतः सोऽयं कलङ्कपङ्कोऽपि अनायासेनैव भवति प्रमार्जित इति वेदितव्यं विद्वद्भिरिति शम् —

☆

राजधान्यां संस्कृतोन्नतेः प्रयत्नः

—सम्पादकः

अस्मिन् मासे एव 'दिल्लीराज्यसंस्कृतसाहित्यसम्मेलनेन' 'दीवानहाल' भवने समायोजिताऽऽसीदेका बृहत्सभा, यस्यां 'राज्ये कैरुपायैः संस्कृतोन्नतिर्भवेत्' एतदुपरि विचारः समभूत् । सभाध्यक्षोऽभूत् श्रीमान् पं० मौलिचन्द्रशर्मा । पं० श्रीहरिहरस्वरूपशास्त्री प्रस्तावमकरोद् यत् 'एतदर्थं देहलीराजधान्यामेव न्यूनान्यूना दशसहस्रसंख्यकाः संस्कृतसम्मेलनस्य सदस्याः संपादनीयाः स्युः' । पं० श्रीमौलिचन्द्रशर्मणा प्रबोधनम् (सुझाव) प्रादायि—यत् प्रत्येकविद्यालये सेयं संस्कृतभाषा मातृभाषाया अङ्गरूपेण पञ्चमकक्षयातः अनिवार्यरूपेण पाठ्येत, यथा ह्युत्तरप्रदेशे संप्रति प्रचलितमपि ।

अखिलभारतीयसं०सम्मेलनमन्त्रिणा डा० श्री मण्डनमिश्रेण 'संस्कृतसाहित्यसम्मेलनस्य याः प्रादेशिक्यः शाखाः सन्ति, सर्वतः पूर्वं दृढीकरणीयाः येन अभीष्टकार्यदिशि सौकर्यं स्यात्' इति सबलं समर्थितम् । महाभागेनानेन सोपपत्ति समुपन्यस्तं—'सम्मेलनस्यैका योजनाऽस्ति यत्' सम्मेलनस्यैकः शताब्दीग्रन्थः प्रकाश्येत, यस्मिन् शतवर्षाभ्यन्तरे संस्कृतभाषायां यानि यानि कार्याण्यभवन् तेषां परिचयश्च, संग्रहश्च समुपादीयेत । किञ्च राजधान्याम् एकमनुसंधानप्रतिष्ठानं स्थाप्येत, यद्धि शताब्दीग्रन्थमिमं पूर्णसम्पन्नरूपे समानयेत् । कार्येऽस्मिन् लक्षसार्द्धलक्षमुद्राणां व्ययः सर्वतो निर्धारितः । एतदर्थं 'हरिहरनगरे' (असमप्रदेशे) भूदेशोऽपि नियमितः, संगृहीतश्च ।

पं० श्रीमौलिचन्द्रशर्मणोऽध्यक्षतायामेका समितिः संघटिता, या हि प्रादेशिकनिर्वाचनपर्यन्तं सम्मेलनकार्यमिदं सुचारुरूपेण संचालयेत् ।

भारतीयः प्रत्येकसंस्कृतसेवकः, संस्कृतशिक्षानुरागी च, संवादमिममाकर्ण्य "प्रियं प्रियं नः" इति हृदयान्तस्तलेन समुदीरयेत् । किन्तु सोयं प्रयत्नः पूर्णतया संपन्नः, फलेग्रहिश्च भवेदिति भगवन्तमभ्यर्थयामहे । यतो ह्यस्मिन् समये आपाततः सुखकरा अनेके संवादाः समाकर्ण्यन्ते, किन्तु तेषु केचिदेव परिणतिसीमानमासादयन्ति । सुकृतिसहायकः संपूरयतान्मनोरथं चराचरनायक इति किमितोधिकेन विस्तरेण ।

'संस्कृतं भारतीयज्ञानस्य कोषः'

गुरुपूर्णिमाया अवसरे केन्द्रीयशिक्षामन्त्रिणः डा० श्रीकालूलालश्रीमालिमहाभागस्य 'अखिलभारतीयसंस्कृत प्रचारकमण्डले' समभूदेकं मार्मिकं भाषणम् । त्रयोदश संस्कृतदिवससमारोहस्य उद्घाटनं कुर्वता प्रोक्तं–संस्कृतभाषाया व्यापकं महत्त्वमालम्ब्य—"संस्कृतभाषा सेयमार्याणां ज्ञानस्य अपूर्वः कोषः । कोषस्यास्य सर्वात्मना अस्माभिः संरक्षणं कर्तव्यं स्यात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथाः—

संकटसमये भगवतः स्मरणम्

(ले० कमलानाथशर्मा, जयपुरम्)

सेयं घटना तस्य समयस्याऽस्ति, यस्मिन् समये भारतस्य विभाजनमभूत् (अर्थात् १९४७ तम खिस्त-संवत्सरस्य)। पेशावरनगरे नन्दलालश्रेष्ठिनो वाणिज्य-व्यवसायः पूर्णरूपेण चलति स्म। तस्याऽपणः अति-धनिकः परिगण्यते स्म। येषु दिनेषु विभाजनस्य काण्ड-श्चलति स्म, तेषु दिनेषु नन्दलालश्रेष्ठिनः अत्यावश्यकं कार्यं रावलपिण्डी नगरे आसीत्। अतएव श्रेष्ठी सहसैव रावलपिण्डीनगरमगमत्। श्रेष्ठिनः पुत्रो रामलालो गृहे प्रधानमासीत्, यस्याऽवस्था केवलं चतुर्दश-वर्षात्मिका अभूत्।

सामाजिकविप्लववशात् मोहम्मदलुण्टाकैः श्रेष्ठिनो भवनस्योपरि आक्रमणमक्रियत। अवसरेऽस्मिन् गृहे केवलं बालकोऽयं पुत्रः, अबलाः स्त्रियश्चाऽऽसन्। सोयं यवनसंमर्दः गृहस्योपरिखण्डे समारोहत्। बालक-मिमं विवशीकृत्य धनवैभवस्य अनुसंधानमपृच्छत्। बालकोऽत्यन्तं भयभीतोऽभवत्। यमदूता इव ते इमे यवनाः प्रतीयन्ते स्म। धार्मिकवातावरणे पालितः सोयं बालको भीतेन किन्तु सत्येन हृदयेन भगवन्तं स्मृत्वा, नामध्वनिमकरोत्। अकस्माद् गृहद्वारस्य बहिः प्रदेशात् अत्युच्चस्वरे शब्दोऽभूत्—"पुलिस, पुलिस"।

तस्मिन् लुण्टाकमण्डले सहसैव भयस्य भयानकः प्रभावोऽभवत्। ते इतस्ततः पलायन्त। अस्मिन् जन-संमर्दे अलक्षितः सोयं रामलालोऽपि गृहाद् बहिर्निर-गच्छत् अन्यान् सहायकांश्च आह्वयत्। सत्यमस्ति, संकटे सहायकः त्रिभुवननायकः सोयम्।

यह घटना उस समय की है जब भारत का विभाजन हुआ (अर्थात् १९४७)। पेशावर में नन्दलाल सेठ का वाणिज्य व्यवसाय अच्छी तरह से चल रहा था। उनका फर्म धनवान गिना जाता था। जिन दिनों विभाजन काण्ड चल रहा था, नन्दलाल सेठ को किसी जरूरी काम से रावलपिण्डी जाना था, इसलिए सेठजी अचानक रावलपिण्डी चले गए। सेठजी का पुत्र रामलाल घर में प्रधान था, जिसकी अवस्था केवल चौदह साल की थी।

सामाजिक उपद्रवों के कारण मुसलमान लुटेरों ने सेठजी के मकान पर आक्रमण किया। उस समय घर पर केवल वह बालक और स्त्रियां ही थीं। यह मुसलमानों का झुण्ड मकान पर चढ़ चुका था। मुसलमान लोग बालक को विवश करके धन दौलत का पता पूछने लगे। बालक अत्यन्त भयभीत हुआ। ये मुसलमान उसे साक्षात् यमदूत मालूम पड़ रहे थे। धार्मिक वातावरण में पला हुआ यह बालक डर से किन्तु सत्य हृदय से भगवन्नाम का जप करने लगा। अचानक बाहर से बहुत ऊंचे स्वर मे ये शब्द सुनाई दिये—"पुलिस, पुलिस"

उन लुटेरों के दल में अचानक भय उत्पन्न हुआ। वे लोग इधर-उधर भागने लगे। इस झुण्ड में छुपा हुआ रामलाल भी भाग गया। उसने बाहर निकल कर दूसरे सहायकों को बुलाया। सत्य है संकट में सहायक भगवान ही हैं।

मण्डलस्यास्य संस्थापकाभ्यां श्रीछज्जूरामविद्यासागर-महाभागेन तथा श्रीवामदेवोपाध्यायेन मंडलस्य अद्याव-धिकृतासु सेवासु प्रादायि प्रकाशः। समारोहे प्रस्तावद्वयं पारितमभूत्। प्रथमः—'भारतसर्वकाराय प्रार्थनमक्रि-यत यत्—"मिडिले विद्यालये, हायरसेकेन्डरीविद्याल-च अध्यापकः कवलं शास्त्रिपरीक्षोत्तीर्ण एव गृह्येत" [तस्य मैट्रिक—बी. ए. परीक्षोत्तीर्णत्वं नावश्यकं भवेत्' यथा ह्येषु दिनेषु कृतम्]। द्वितीयप्रस्तावे-दिल्ली राजधान्यां संस्कृतस्यैका अनुसंधानशाला स्थाप्येत इति रामनाथ—अग्रवालेन प्रस्तुतम्।

समारोहस्याध्यक्षोऽभूत् स्वराष्ट्रमन्त्री श्रीबलवन्त-नागेशदातारमहाभागः। दातारमहोदयेन वर्तमानकाले संस्कृतस्य दयनीयां दशां विस्तरेण वर्णयित्वा—तस्याः समुचितसंस्कारार्थमासीत्सबलं समर्थनम्। अन्ते स्थानीयेभ्यः, बहिःप्रदेशेभ्यः समागतविद्वद्भ्यश्च समा-निता उपाधयः स्वर्णादिपदकानि च व्यतीर्यन्त।

देशस्य सर्वभावेन हितप्रतिभुवो भारतस्य शिक्षा-कर्णधाराः समुचितेऽस्मिन् प्रार्थने दद्यु रवधानमिति किं वा विशिष्य समर्थनेन।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति--सुधा

ययोरेव समं वित्तं ययोरेव समं बलम् ।
तयोर्विवादो मैत्री वा नोत्तमाऽधमयोः क्वचित् ॥१

जिनका धन बराबर का है तथा जिनका बल भी समान है, उनका ही आपस में विवाद अथवा मैत्री (मित्रता) योग्य है। उत्तम और अधम का विवाद और मित्रता दोनों ही ठीक नहीं ॥१

बलवानपि निस्तेजाः कस्य नाऽभिभवास्पदम् ।
निःशंकं दीयते लोकैः पश्य भस्मचये पदम् ॥२

बलवान् होने पर भी जो निस्तेज है, जनता में तेज प्रकट नहीं करता, वह किसके द्वारा पराभव अर्थात् हार नहीं पाता ? सब ही उसको दबा लेते हैं। देखो ठण्डी राख के ढेर में लोग निःशङ्क होके पैर देते हैं। पैरों से खूंदते हैं ॥२

यत्र न फलितास्तरवो विकसितसरसीरुहाः सरस्यो वा
न च सज्जनाः स देशो गच्छतु निधनं श्मशानसमः

जहां फलदार वृक्ष नहीं, जिनमें कमल खिल रहे हों ऐसी सुशोभित तलाब तलाई भी न हों। तथा जहां सज्जन न हों (अच्छे मनुष्यों का निवास नहीं) वह देश श्मशान के समान है, वह नाश को ही प्राप्त हो (उसका नाश हो जाय) ॥३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[भारतीय स्वाधीनताक्रान्तेः (१६४७ई०) अवसरे स्थापितम्]

★ नयनाभिरामदृश्यैः ★ पुरस्कृतकथाभिः ★ रोमांचकारिघटनाभिः ओतप्रोतम्

★ हृदयग्राहिगाथा ★ मनोहरं मुद्रणम् ★ ज्ञानवर्धकं पारिवारिकं मनोरंजनम्

'देशमुख' हिन्दी साप्ताहिकम् प्रतिगुरुवासरमिदं पत्रं प्रामाणिकलेखैः, बालस्तंभैः, चित्रैः, व्यङ्ग्यचित्रैः शब्द-चित्रैश्च सह चलचित्रदृश्यमयीं सामग्रीमुपहरति।

इदं भवत्परिवारस्य सर्वेभ्यः सदस्येभ्यो मनोरंजनसाधनानि समर्पयति एतस्य साहित्यं भवतो ज्ञानं वर्धयति, भवतो जीवने नवीनमुत्साहं भरति, स्फूर्तिमानयति। बौद्धिक-राजनैतिक-आर्थिक-सामाजिकविचारान् दृढयति।

अतएव-सर्वत्र 'देशमुख' साप्ताहिकं सम्मान्यते, प्रख्यायते च।

❀ त्वरितं पठन्तु

समस्तभारते सर्वाधिकविक्र-याय प्रमाणित सचित्रं हिन्दी-साप्ताहिकम्

महाराष्ट्रराज्यस्यैकलं संध्या-कालसमाचारदैनिकम्

देशमुख

[सामाजिकक्रांतेः सचित्रं साप्ताहिकम्]

'DESHMUKH'

(Social Revolutionery Hindi Weekly)

पोस्ट बाक्स ६०२६ Post Box 6029

बम्बई–१२ (भारत) Bombay–12 (India)

❀ इष्टमित्रान् पाठयन्तु

पञ्चशील का प्रबल प्रचारक!

एकवर्षस्य मूल्यम्	१०)
षण्मासानाम्	६)
पुस्तकालयेभ्यः	३)

लेखकेभ्यश्चित्रकरेभ्यश्च निःशुल्कम

प्रति सप्ताहं १६ पृष्ठानि बृहदाकारे। एकप्रतेः २५ नवपणाः। विशेषांका वार्षिकं निःशुल्कम्

देशमुखं भवदीयपरिवारस्य बालवृद्धनरनारीमातृभगिनीप्रभृतीन् सर्वान् कुशलान् नागरिकान् निर्माति

देशमुखं भवतो मित्रम्, परिवारसदस्यः, समयदर्शकश्च, समाजस्य समस्याः समादधाति।

"साप्ताहिक स्तम्भ"—बम्बई की रातें, देखी-सूनी बातें, कहो कैसे कही? इनसे मिलिये, नई-पीढ़ी, मुस्कराहट का सेम्पुल, धरती गाती है, नये प्रकाशन, नवाब राजे-महराजे, श्रमिक-संगठन, विश्व एक नजर में, नेता के विचार, चित्र-कसौटी, शिक्षक-समाज, महिला जागरण, सितारों की कलम से, अर्ज करता हूँ, आपके पत्रों के उत्तर, देशमुख के साप्ताहिक चहरे, क्या खोया क्या पाया? भारतीय मार्कीट व्यवसाय, पर्वत की वासनाएँ, अन्तराल की आत्मा (उपन्यास), वेश्यावृत्ति और उसका अन्त, कैसे हो? नेहरू चाचा, परिवार विज्ञान के बढ़ते चरण, सयानों ने कहा, सम्पादक की डायरी, भूदान चर्चा कसौटी पर बापू ने कहा था? अनमोल बोल, ये समाज के कोढ़, जलते पृष्ठ, ये अन्याय-अनाचार-उत्पीडन कैसा? सफल जीवन की कुँजियां, ये पथभ्रष्ट ललनायें जब माता बनेंगी? जाने-पहचाने-चेहरे, प्रेमकथा, मस्ती, कूटकथा, गूढ़जाल, रम्यकथायें, उन्माद, अजब कथायें, मील के खम्भे, स्वतन्त्रता के प्रहरी, भूत के गर्भ में छिपा इतिहास का एक पृष्ठ, घर-गृहस्थी की बातें।

★ एते भवतो रसिकप्रवृत्तिमुल्लासयिष्यन्ति, हृदयमाक्रन्दयन्ति, जीवनस्य विभिन्नावस्थानां दर्शनं कारयिष्यन्ति।

★★★ अद्यैव १०) शुल्कं प्रेषयित्वा देशमुखं पठत।

श्रीमान् वितरणनिर्देशकः, दैनिकदेशमुखम् (साप्ताहिकम्) पोस्टबाक्स-६०२६, बम्बई–१२ (भारत)

तडित्पत्रम्—'देशमुखी' बम्बई, Telegram : 'DESHMUKHI' Bombay.

सम्पर्क करें—पत्र विक्रेता, समाचार-प्रतिनिधि, फोटोग्राफर, विज्ञापन एजेंट, लेखकगण, चित्रकार,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

GURUKULA LIBRARY HARIDWAR

स्वतन्त्रे गणतन्त्रेऽस्मिन् भारते प्रतिभारते ।
भगवान् गणनाथोऽयं गुणिगण्यः प्रसीदतात् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एक

113544
Digitized by Arya Samaj Foundation Chennai and eGangotri

ताजे गुणकारी आवलों से तैयार

वैद्यनाथ च्यवनप्राश के सेवन से फेफड़ों के विकार, कफ, खांसी, श्वास, (दमा), शारीरिक और मानसिक दुर्बलता, रक्तहीनता, कैल्शियम की कमी, स्वर-भंग, मन्दाग्नि, अम्लपित्त, कब्जियत आदि रोगों में तत्काल और आशातीत लाभ होता है। यह बचपन, जवानी और बुढ़ापे में सब के लिये सदा सेवनीय रसायन है।

बैद्यनाथ च्यवनप्राश
अष्टवर्गयुक्त

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना
बैद्यनाथ आयुर्वेद भवन प्राइवेट लि०
कलकत्ता · पटना · झाँसी · नागपुर · इलाहाबाद

भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्
श्री वैद्यनाथ-आयुर्वेद-भवनम्
(प्रायवेट लिमिटेड़)
कलिकाता, पटना, झांसी, नागपुरम्, इलाहाबाद
सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे
निर्माणकारकम्
भारतवर्षे सर्वत्र एकमूल्ये भेषजानीमानि लभ्यन्ते
राजस्थानस्थ विक्रयकेन्द्राणि
कांसली आयुर्वेदिकस्टोर्स—जौहरी बाजार, जयपुर
जोधपुर आयुर्वेदिकस्टोर्स—सर्राफा बाजार, जोधपुर
अजमेर आयुर्वेदिकस्टोर्स—स्टेशन रोड, अजमेर

राजस्थान-मद्रास-मध्यप्रदेश सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारैस्वीकृता —

विषय-सूची

क्रम संख्या लेखा:	लेखका:	पृष्ठ संख्या
१. मेघं प्रति	वै० श्रीशङ्करलालशर्मा, फतेहपुरम्	२५१
२. भारतीया संस्कृतिः संस्कृत-भाषा च	श्रीलक्ष्मीनारायणपुरोहितः, उदयपुरम्	२५३
३. खट्टरकाकाः	अनु० विद्याभूषण श्रीगणेशरामशर्मा, झालावाड़ः	२५७
४. वेदस्य सर्वविद्यानिधानत्वम्	श्रीमोतीलालशर्माणः, मानवाश्रमः, दुर्गापुरा	२६०
५. इतिहासात् किं शिक्षिष्यामहे किंचित् ?	अनु० श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	२६१
६. खगोलवर्णनम्	श्रीमल्लिनाथशर्मा चौमालः	२६६
७. सम्पादकीयम्	सम्पादकः	२६९
८. लघुकथा	श्रीकमलानाथशर्मा जयपुरम्	२७०
९. सूक्ति-सुधा	सम्पादकः	२७१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर (राज०)

वर्षम् १० | भाद्रपदमासः, सं० २०१७ (सितम्बर मासः सन् १९६०) | अङ्कः ११

मेघं प्रति

(ले० वै० शङ्करलालशर्मा, फतेहपुरम्)

मेघ ! त्वं यदि नो भवेः भुवि तदा प्राणिस्थितिर्दुर्लभा
दृष्ट्वा त्वां नभसि प्रसन्नहृदया आषाढमासे भृशम् ।
जायन्ते कृषका दिवाकरकरैः सन्तप्तजोवास्तथा
त्वत्तः प्राप्य जलं त्यजन्ति वपुषस्तापं, लभन्ते सुखम् ॥१॥

ग्रीष्मे तिग्मरवेः करैः क्षितिरियं तप्ता विशुष्कद्रुम-
पर्णा म्लानवधूरिवाभ्र ! भवतः सम्प्राप्य तोयं पुनः ।
पालाशैस्तरुपत्रकोमलतृणैः संशोभमाना हरिद्
वस्त्राच्छादितविग्रहेव युवतिः संलक्ष्यते सम्प्रति ॥२॥

श्रुत्वा ते स्तनितं बलाहक ! मुदा नृत्यन्त्यमी बर्हिणः
हृद्यं रावमुदाहरन्ति तृषिताः संगृह्य बिन्दूनपाम् ।
सारङ्गा निजतर्षनाशनमहो ! त्वत्तः परः को भवेत्
यः संसारपरोपकारनिरतो जह्यान्निजं जीवनम् ॥३॥

युष्माभिर्दिवि संस्थितैर्ग्रहविधू रुद्ध्वा धरित्र्यां तमो-
व्याप्त्या भीषणतां गता अपि निशाः सौदामिनीभासिताः ।
सत्यो मानवमानसेषु सुतरां मोदं क्षणं तन्यते
को वा लोकहितेरतो वितनुतेऽनिष्टं क्वचित् प्राणिनाम् ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रैष्मं तीक्ष्णसमीरणं हिममृदूकृत्वा भवान् सौख्यदः
जन्तूनाञ्च तडागपल्वलसरःस्वापः प्रपूर्याऽधुना ।
संसुप्तान् खलु दर्दुरान् प्रियगिरा युङ्क्ते तथा कर्षकान्
केदारानभियातुमभ्र ! सततं सज्जीकरोति ध्रुवम् ॥५॥

ग्रीष्मे लब्धबलं दिवाकरमिमं संरुध्य शक्त्या भवान्
केदारेषु कृषिप्रसक्तकृषकान् संरक्षति ह्यातपात् ।
वायुप्रेरितभूरिधूलिनिचये नेदं नभो मण्डलम्
मालिन्यं भजतेऽथ वृष्टिसलिलैः स्वच्छं विधाता पुनः ॥६॥

कालो ग्रीष्मभवः प्रयाति भवति व्योम्न्यागते कष्टदः
तापश्चापि जहाति जीवनिवहान् मार्गाः जलार्द्रीकृताः ।
वृद्धः सोमगुणस्तनोति शनकैः शक्तिर्वपुःषु क्रमात्
भूमिः वासवगोपसंहतियुता विद्योतते सुन्दरी ॥७॥

पातुं वारि समाकुलो मृगगणो धावन्निदाघे भृशम्
प्राप्ते खे त्वयि वारिद ! प्रचुरतां लब्ध्वा जलस्याधुना ।
स्वैरं तच्च निपीय शीतलधरापृष्ठे शयानः सुखी
रोमन्थं विदधाति वै तव दया मोदप्रदा कस्य न ? ॥८॥

भृत्वा प्राज्यजलानि विष्णुचरणे धावन् स्थितः कुत्रचित्
मुक्त्वा तानि लघुर्भवन् गिरिशिखा आश्रित्य धूमाकृतौ ।
भूत्वा त्वं जलभारवाहनभवं दूरीकरोषि श्रमम्
निर्जीवैरनुभूयते ? क्व च सुखं दुःखञ्च किं भूतले ॥९॥

आदायोदकमम्बुराशितलतो भूमौ पुनः पातयन्
लोकानुग्रहवाञ्छया जलधर ! स्वार्थं विना ह्यात्मनः ।
सञ्चित्य द्रविणं ततो वितरथ त्यक्त्वा फलाशान्ननु
स्वं कर्तव्यमवेत्य भो ! नुदसि यत् त्वं कर्मणा मानवान् ॥१०॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीया संस्कृतिः संस्कृत-भाषा च

(ले० श्रीलक्ष्मीनारायणपुरोहितः, साहित्याचार्यः, कविकलानिधिः, उदयपुरम्)

किमपि वस्तु भवतु, तस्मिन् दोषनिराकरणपूर्वकं गुणानामुत्पादनमेव तस्य संस्कृतिर्वा संस्कारो वा संस्करणं वा कथ्यते। यावत् कस्यचिदपि वस्तुनः संस्कारो न भवति, तावत् तत् सदोषं गुणहीनमेव च तिष्ठति। संस्कारे जाते सत्येव तस्य दोषाणां दूरीकरणं गुणानामाविर्भवनं च दृश्यते। शाणे यावन्नारोप्यते, तावन्न हीरकमणेर्मृदावरणं दूरीभवति, न च तस्मिन् प्रकाश एव प्रस्फुटितो भवति, एवं न कृपाणस्य कुण्ठत्वं दूरीभवति, न च तस्मिन् छेदनशक्तिरेव प्रादुर्भवति। यदा च शाण आरोप्य तस्य संस्कारः सम्पादितो भवति, तदैव तस्य उक्तदोषा दूरीभूय वाञ्छिता गुणा आविर्भवन्ति। जडवस्तूनामिव चेतनवस्तूनां गजतुरगादीनामपि दोषनिराकरणपूर्वकं गुणोत्पादनाय संस्कार एव अपेक्ष्यते। संस्कारेणैव तेऽपि अनभीष्टां कुत्सितां गतिं त्यक्त्वा अभीष्टां विशिष्टां गतिं गृह्णन्ति। तात्पर्यमेतदेव, यत्—विश्वस्य यावन्ति वस्तूनि सन्ति, तानि समुपयोगीनि सम्पादयितुं संस्कारकरणस्यैव नितान्तमावश्यकता भवति। अन्यान्यवस्तूनीव मनुष्योऽपि उपयोगी भवितुं स्वस्य दोषाणां दूरीकरणाय गुणानामाविर्भावाय च संस्कारस्यैव अपेक्षां रक्षति, तदर्थं च तस्य संस्कार एव नितान्तमावश्यको भवति। संस्कारेण विनाऽसौ कदापि उपयोगी कार्यक्षमश्च भवितुं न शक्नोति, कदापि च कार्येषु सिद्धिं साधुवादांश्च प्राप्तुं न शक्नोति। संस्कारे जाते सत्येव सोऽपि उपयोगी कार्यक्षमश्च भवितुं शक्नोति, सिद्धिं साधुवादांश्च प्राप्तुं शक्नोति तथा च यशस्वी भूत्वा स्वकीयजीवनस्य चरमलक्ष्यपर्यन्तमपि प्राप्तुं शक्नोति।

मानवजीवनस्य सफलता धर्मार्थकाममोक्षाख्यचतुर्वर्गस्य प्राप्तावेव कथिताऽस्ति मान्यैर्महर्षिभिः। यदि कश्चित् मनुष्यो भूत्वाऽपि मनुष्योचितधर्माणां पालनं न कृतवान्, समुचितैः प्रकारैरर्थसंग्रहं च न सम्पादितवान्, अनिषिद्धकामानां (अभिलाषाणां) पूरणाय सफलतां न प्राप्तवान्, अन्ते च सांसारिकबन्धनैर्मुक्तो भूत्वा ब्रह्मप्राप्तेः समुचितान् उपायानपि नाऽवलम्बितवान्, तर्हि तस्य मानवं जन्म निष्फलमेव भवति। किन्तु उक्तधर्मादिचतुर्वर्गस्य प्राप्तिः काचित् साधारणीवार्ता नाऽस्ति। तदर्थं प्रत्येकव्यक्तीः कृते बल-बुद्धि-विद्या-विनय-शीलता-कला-कौशलादिसद्गुणगणैः सम्पन्नता अनिवार्या भवति। तदैव कश्चित् धर्मादि चतुर्वर्गं प्राप्तुं शक्नोति दोषाणां निराकरणपूर्वकः कथितानां समेषामपि सद्गुणानां प्रादुर्भावः अस्माकं भारतीयैर्वेदशास्त्रोक्तैः कर्मकलापैरेव भवितुं शक्नोति। भारतीया वेदशास्त्रविहिता कर्मकलापा एव च अस्माकं संस्कृतिः संस्करणं संस्कारो वा संक्रियतेऽनेनेति व्युत्पत्त्या।

ते चाऽस्माकं कृते विहिताः कर्मकलापाः कतिचित् मनुष्याणां बीजगर्भादिप्राप्तदोषाणां निराकारकाः, कतिचिच्च गुणाविर्भावनपराः, कतिचिच्च उभयविधाः। ते च गर्भाधानजातकर्मादयः उपनयनादयश्च संस्काराः मादकादिवस्तुपरित्यागादि व्रतानि, सायंप्रातर्हवनानि, त्रैविद्याख्यवेदव्रतानि, देवर्षिपितृतर्पणादि, गृहस्थावस्थायां पुत्रोत्पादनम्, पञ्चमहायज्ञाः, ज्योतिष्टोमादियज्ञादयश्च नित्यनैमित्तिकाश्च अस्माकं संस्कृतिरेव। अनयैव मानवः (पातकैः=पतनजनकैः) दोषैर्मुक्तो भूत्वा सद्गुणगणसम्पन्नश्च सन् चतुर्वर्गप्राप्तेर्योग्यो भवति। यथोक्तं महर्षिणा याज्ञवल्क्येन—"एवमेनः शमं याति बीजगर्भसमुद्भवम्।" इति महाराजेन मनुना चोक्तम्—

"गार्भैर्होमैर्जातकर्मचूडामौञ्जीनिबन्धनैः,
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते।
स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः,
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्ताऽपीयं समीचीना, यत्—यदि उन्नतेर्बाधकानां पातकानां निराकरणं यावन्न क्रियते, तावत् चतुर्वर्ग-मध्यात् कस्याऽपि सिद्धिर्न भवितुं न शक्नोति। कुतो यत्–यावत् कस्मिन्नपि जने पापदोषा वर्तमानाः स्युः, तावत् तस्य पुण्यानां गुणानां च संचयने प्रवृत्तिरेव न भविष्यति। यदि कश्चित् हीरके प्रकाशं, तन्मृदावरणं दूरमकृत्वैव प्रकटयितुं तत्परो भवेत्, यदि च कृपाणे छेदनशक्तिम्, तस्य कुण्ठत्वमनपाकृत्यैव उत्पादयितुं प्रवृत्तो भवेत्, तर्हि तत् तस्य धाष्ट्र्यमात्रमेव भवेत्।

अस्माकं पूर्वजाः पूर्वोक्तैरेव वेदशास्त्रविहितैः कर्मकलापैः संस्कृतजाताः सन्ति। तेषां बल-विद्या-वर्चस्तपोयोगादीनां यानि ऊर्जस्वलान्युदाहरणानि भारतीये साहित्ये अद्याऽपि देदीप्यमानानि वर्तन्ते, तानि तेषाम् उदारतमायाः संस्कृतेरेव वरप्रदानानि सन्ति।

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः,
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥"
"अग्रतश्चतुरो वेदाः पृष्ठतः सशरं धनुः,
इदं ब्राह्ममिदं क्षात्रं शापादपि शरादपि॥"
"नाऽहं विशङ्के सुरराजवज्रात्
न त्र्यक्षशूलान्न यमस्य दण्डात्।
नाऽग्न्यर्कसोमानिलवित्तपास्त्रा-
च्छङ्के भृशं ब्रह्मकुलापमानात्॥"

इत्यादीनि सहस्रशो वाक्यानि अद्याऽपि भेरीघोषेण सह तेषां संस्कृतेरेव विजयवार्तां श्रावयन्ति। अस्माकं पूर्वजाः संस्कृत्यैव आत्मानं सर्वथा शक्तिशालिनं चतुर्वर्ग-सम्पादनसमर्थं च साधयन्ति स्म। संस्कृत्यैव आत्मानं सर्वथा शक्तिशालिनं चतुर्वर्गसम्पादनसमर्थं च साधयन्ति स्म। संस्कृत्यैव च ते वर्चस्वितां यशस्वितां च अर्जयन्ति स्म। एवं संस्कृत्यैव च ते जगत्यस्मिन् गौरवशालीनि पदानि प्राप्नुवन्ति स्म। संस्कृति सम्पन्नतया तेषां संकल्पे सिद्धयो न्यवसन्। संस्कृतिसम्पन्नतयैव च तेषां कामनाया अनुवर्तने निधयः स्वसौभाग्यम् अमन्यन्त एवं संस्कृतिसम्पन्नतयैव च भुवनानां भूतयस्तेषां परिग्रहस्य प्रतीक्षाम् अकुर्वन्। संस्कृतेः कारणादेव च ते सर्वभूतानां सुहृद आसन्, परोपकाराय ते आत्मोत्सर्गमप्यकुर्वन्, अन्ते च ते ब्रह्मभूता अप्यभवन्।

अद्य सा संस्कृतिः कुत्राऽस्ति? अद्य तु समाजे तस्या विलोप एव जातोऽस्ति। यथाकथंचित् यावती विद्यमानाऽस्ति, साऽपि विकृतरूपेण मुमूर्षावस्थायां च वर्तते। न हि तस्या विधिविधानेन कोऽपि सम्पर्को रक्ष्यते, न च तस्याः किमपि मूल्यमेवाऽवबुध्यते। इदमेव कारणमस्ति, यत्—संस्कृतेः प्रतीकभूतौ उपनयनं विवाहश्चेत्येतौ द्वौ संस्कारौ विहाय प्रायशोऽन्येषां संस्कृतिप्रतीकानां संस्काराणां दर्शनमेव न भवति। उपनयनमपि किमपि स्वतन्त्रसंस्काररूपेण बुध्यते। अतएव प्रायेण मातापितरः अद्य बालकस्य सुदृढ-सुशिक्षित-शीलगुणान्वितत्वस्य चिन्तामकृत्वा विवाहस्यैव चिन्तां कुर्वन्ति न तु उपनयनस्य। उपनयनस्य किं प्रयोजनं, किं वा सामर्थ्यम्, न हि एतत् ते जानन्ति, ज्ञातुं वा वाञ्छति। "उपनयनं नाम आचार्यसमीपे नयनात्मको गायत्र्युपदेशप्रधानं कर्मविशेषः, किन्तु अद्य को मनुते? अद्य तु तस्य प्रयोजनमर्थश्च सर्वथा वैपरीत्यमवलम्बेते। अद्य बालक उपनयने सति वेदाध्ययनाय न हि, अपि तु विवाहाय अधिकारी मन्यते। सः गुरुकुले आचार्यसमीपं न हि, अपितु विवाहमण्डपे वधूसमीपं नीयते। मन्ये, सैव तस्य इतः परम् आचार्या भविष्यति, तस्याः समीप एव चाऽसौ स्त्रैणत्व – निर्बलत्व–श्रीहीनत्वादीनां परिचयं विधास्यति, दैन्य-दुःख-भ्रंशादीनां च व्रते शिक्षितो भविष्यति। यस्य बहुमूल्यस्य वयसो बल-विद्या-वर्चसामर्जनाय गुरुकुले विनियोगः क्रियते स्म, तस्यैव महार्घ्यस्य वयसोऽद्य दौर्बल्यदैन्य-दुःख-विनाशानामाह्वानाय विवाहसंस्कारस्य नामोपरि बलिदानं क्रियते। हन्त! कियद् वैपरीत्यम्!..........संस्कृतेः प्रतीकानामितरेषां सन्ध्यातर्पणादि नित्यकर्मणामपि मुमूर्षावस्थाऽद्य सर्वतोऽवलोक्यते।

यदा वयं समाजस्य अस्याः सांस्कृतिकदुरवस्थायाः कारणं विचारयामः तदा तस्याः प्रमुखं कारणं संस्कृते-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महत्वेन उपयोगितया च अपरिचितत्वमेव अस्माकं विचारपथमापतति। संस्कृतेर्महत्वेन उपयोगितायां च अपरिचितत्वादेव समाजस्य तां प्रति उदासीनता अवहेलना च दृग्गोचरीभवति। किन्तु एतस्य दोषं वयं तस्मिन्नारोपयितुं न वाञ्छामः। कुतो यत्—स तु तस्या उपयोगिताविषये सर्वथा अज्ञानी वर्तते। यदि सः तस्या महत्वम् उपयोगितां च अज्ञास्यत् तर्हि तस्मिन् तां विनाशयितुं दुर्भावनाऽपि नाऽजागरिष्यत्, न च तस्यां तस्य अवहेलनाऽप्यभविष्यत्। किन्तु दोषोऽस्ति, वैदेशिकशासकानां कूटराजनीत्याः। यस्याः शिक्षणव्यवस्थाया अनुसारेणैव समाजः अद्याऽपि शिक्षितो भवति। शिक्षितो भूत्वाऽपि च सः स्वविषये सर्वथा मूर्खोऽस्ति, स्वकीयहितकरवस्तुभिरपि सः अपरिचितो वर्तते, एवं तद्विषये अहितकारित्वरूपं विरुद्धं ज्ञानमपि तस्मिन् दृढ़मूलं जातमस्ति। यतः प्रभृति अस्माकं शिक्षणव्यवस्था कूटनीतिकानां षड्यन्त्रचक्रे निपतितास्ति, ततः प्रभृत्येव संस्कृतभाषाया अनादरो ह्रासो विनाशश्च भवितुं लग्नाः सन्ति। ततः प्रभृत्येव चाऽस्माकं सांस्कृतिकस्य शिक्षणस्य इति श्रीरप्यापतिताऽस्ति, एवं ततः प्रभृत्येव चाऽस्माकं समाजः स्वकीयजीवनस्य सफलतायाः साधनभूते सांस्कृतिकज्ञानविषयेऽपि नितरामज्ञो जायमानो वर्तते।

सांस्कृतिकसुव्यवस्थायै अद्य सर्वत्राऽपि संस्कृतभाषाशिक्षणप्रसारस्य नितराम् आवश्यकताऽस्ति। न्यूतान्नूनम् अस्माकं भारतीयानां तु एकोऽपि बालकः संस्कृतभाषया अनभिज्ञो न तिष्ठेत् यावत् अस्माकं समाजः संस्कृतज्ञो न भवति, तावत् अन्येन केनाऽपि प्रकारेण सांस्कृतिकज्ञानस्य प्रसारः, संस्कृतिश्च सुव्यवस्था भवितुं न शक्नोति। कुतोयत्—समाजस्य प्रत्येकजनः संस्काराणां पात्रं, कर्ता, कारयिता वा भवति। पात्रस्य, यस्य खलु संस्कारो विधीयते, तस्य कस्यांचिदवस्थायां मूके सत्यपि, कर्तुर्यजमानस्य, कारयितुश्च पुरोहितोपाध्यायादिकस्य तु संस्कारकर्मकाले, मन्त्राणां ये खलु संस्कृतमया एव भवन्ति, उच्चारणम् आवश्यकमेव भवति। यदि कर्ता, कारयिता च संस्कृतस्य अनभिज्ञौ स्तः, तर्हि तौ मन्त्राणां कदाचिदपि शुद्धमुच्चारणं कर्तुं न शक्नुतः। शुद्धोच्चारणस्य अभावे सत्येव कदाचित् कदाचित् 'इन्द्रशत्रुर्वर्धस्व' इति मन्त्रभागस्येव मन्त्राणां विपरीतार्थो भूत्वा इष्टप्राप्ते स्थाने अनिष्टप्राप्तिरपि भवितुं लगति। एवंविधाया अनिष्टप्राप्तेर्वर्जनाय तस्याः कारणम् संस्कृतज्ञानाभावम् अपरिमार्ज्यं संस्काराणामेव परिवर्जनं बुद्धिमत्ता नाऽस्ति। ज्वरजर्जरितो मनुष्यः, यदि अस्मात् कारणात् भेषजं परित्यजेत्; यत्—सस्य सविधे सेवनाभावे कदाचित् कश्चिद् अन्यो रोग आक्रमिष्यति, तर्हि तत् तस्य मूर्खतैव भविष्यति। आरोग्यस्येव श्रेयःप्राप्तेः उपायेष्वपि यदि सावधानतापूर्वकं परिश्रमः स्वीकरणीयो भवेत्, तर्हि तेन कस्याऽपि बुद्धिमतः तान् प्रति अरुचेः प्रकटीकरणं समुचितं नास्ति। अतएव अस्माकं समाजेनाऽपि संस्कृतेः, या खलु पुरुषार्थचतुष्टयस्य प्रापिका, वर्तते, महत्वज्ञानाय सम्पादनकौशलप्राप्तये च संस्कृताध्ययनस्य परिश्रमकष्टमपि स्वीकरणीयमेव। विना संस्कृतज्ञानेन अस्माकं समाजः संस्कृतिसम्पत्तेः प्राप्तियोग्यो न हि भवितुं शक्नोति।

संस्कृताध्ययनस्य परिश्रमकष्टात् आत्मनो रक्षणाय संस्कृतिप्रतीकानां संस्कारादीनां कृते हिन्दीप्रभृतीनां प्राकृतभाषाणां वा स्वीकरणम् केचित् मन्यन्ते, तत् अनुचितमेव स्यात्। कुतो यत्

(१) संस्कारादीनां मन्त्रैः सह युज्यमानस्य प्रणवस्य, व्याहृतीनां,स्वाहा स्वधादि शब्दानां च हिन्द्यादिभाषासु अनुवादो न भवितुं शक्नोति।

(२) संस्कारादीनां मन्त्राणामपि, येषां भिन्नभिन्नैराचार्यैः भिन्नभिन्नप्रकारैः अर्थाः कृताः सन्ति, एको निश्चितोऽनुवादः संस्कारादिपद्धतीनां कृते अशक्य एव।

(३) वेदा भगवन्निः श्वसितरूपाः सनातनाश्च सन्ति, यान् महर्षयस्तीव्रैस्तपोभिः स्वयंभुवो भगवतः प्राप्तवन्तः तेषां मन्त्राः यस्यां भाषायां, यस्याम् अक्षरपरिपाट्यां, येषु च स्वरेषु विद्यमानाः सन्ति, तेष्वेव मन्त्राणां तेषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माहात्म्यमस्ति, तेष्वेव च प्रयोगे तेषां निश्चिता अर्था भवन्तः प्रयोक्तुः अभीष्टमपि साधयन्ति।

(४) प्राकृतभाषाः उत्पद्यन्ते, विलीयन्ते च, कुतो यत्—ताः संस्कृतमिव संस्कारसम्पन्नत्वाभावात् सनातना न सन्ति, शौरसेनीमागधीपैशाची प्रभृतयः प्राकृतभाषाः, कदाचित् उत्पन्ना भूत्वा पुष्पिताः फलिताश्च जाताः, किन्तु अद्य अस्तमिताः सन्ति। पालीभाषामपि केचिद् अङ्गुलिगणिता एव जना जानन्ति। कुतो यत्—सार्ऽपि संस्कृतमिव दृढसंस्कारयुक्तत्वाभावात् परिवर्तनशीलैव अतिष्ठत्, परिवर्तिता भवन्ती च एकस्मिन् दिने सा विनष्टाऽप्यभूत्। हिन्दीभाषाऽपि परिवर्तनशीला वर्तते। तस्या यत् स्वरूपं शताब्दीनां प्राक् आसीत्, अद्य तत् सर्वथा परिवर्तितं वर्तते। यच्च स्वरूपं अद्य वर्तते, तद् भविष्यत्यपि परिवर्तितं भविष्यत्येव। कुतोयत्—साऽपि संस्कृतमिव संस्कारसम्पन्ना नाऽस्ति, वर्तमाने च हिन्द्याः किमपि एकं स्वरूपं नाऽस्ति। हिन्दीभाषाभाषिणां प्रान्तानाम् उपप्रान्तानां च संख्याया अनुसारेण हिन्द्या विविधस्वरूपाणामपि एक महती संख्याऽस्ति। हिन्दीं अतिरिच्य वर्तमानाः वर्तमानसमये गुजराती—मराठी—तैलगू-कर्णाटकी—बङ्गला—मिथिला प्रभृतयः कतिचित् ईदृश्यो भाषाः सन्ति, यासां हिन्द्या सह सामञ्जस्यं न भवति। ताश्च स्वप्रान्ते हिन्दीवत्पुष्पिताः फलिताः सम्पन्नाश्च सन्ति। अस्यां परिस्थितौ कस्यांचिदेकस्यां भाषायाम् अनूदिताः संस्कारादिपद्धतयः इतरभाषाभाषिणां प्रान्तानां कृते अनुपयुक्ता एव भविष्यन्ति। सर्वासु भाषासु प्रान्तानुसारि पृथक् पृथक् स्वरूपासु तासां अनुवादे कृते निरर्थकमेव श्रमगौरवम् भविष्यति।

(५) परिवर्तनशीलासु वर्तमानहिन्द्यादिभाषासु अनूदिताः संस्कारादिपद्धतयः शतपञ्चाशाद्वर्षानन्तरं तासां भाषाणां परिवर्तितत्वात् तत्तद्भाषाभाषिणां प्रान्तानां कृतेऽपि अनुपयुक्ता भविष्यन्ति।

(६) पाश्चात्यानुकारिणाम् उच्छृङ्खलानाम् अनुवादकानां स्वेच्छानुसारेण संस्काराणां मौलिकतत्त्वानां तन्मनोऽभिमतत्रोटनमोटनेषु गतिषु तेषां स्वरूपाण्येव विनाशं प्राप्स्यन्ति। तादृशै रूपान्तरापन्नैः संस्काराभासैः कस्यचिद् वाञ्छितफललाभस्याऽभावे ते कदाचित् अपसारिता अपि भविष्यन्ति। एवं यदि अस्माकं समाजः संस्कृताध्ययनपरिश्रमकष्टभयेन स्वसंस्कृतेः प्रतीकान् संस्कारादिकर्मकलापान् संस्कृतभाषात एव, या तेषां सनातनी सुदृढा च आधारवेदिकाऽस्ति, च्यावयिष्यति, तर्हि पश्चात् तेषां स्थितये किमपि स्थानं न भविष्यति। हिन्द्यादिषु का अपि प्राकृतभाषास्तान् आत्मनि अवरोद्धुं शक्ता भविष्यन्ति, कुतोयत्—एतास्वेव असंस्कृतभाषासु स्खलन्तः स्खलन्तस्ते एकस्मिन्नहनि चूर्णिता भूत्वा सर्वथा विनङ्क्ष्यन्ति। नित्या नैमित्तिकाश्च वेदशास्त्रविहिताः कर्मकलापा एव अस्माकं भारतीयानां संस्कृतेः प्रमुखाः प्रतीकाः सन्ति, अस्माकं सर्वार्थलाभानां संसाधकाः सन्ति, अस्माकं जीवनं च सफलं समुन्नतं च निर्मातार एकमात्रोपायाः सन्ति। संस्कृताध्ययनश्रमात् यदि अस्माकं समाजो भीतो भवति, तर्हि तस्य इदमेव तात्पर्यम्, यत् स आत्मनः अभ्युदयात् जीवनसाफल्यादेव च भीतो भवति, यत् सर्वथा अनुचितमस्ति।

एवं धर्मार्थकाममोक्षशास्त्राणि, दर्शनानि, इतिहासपुराणानि, धनुर्वेदगान्धर्ववेदादयः, स्थापत्यवास्तुशिल्पशास्त्रादयश्च विद्याकलानां प्रतिपादका निगमागमाः अपि अस्माकं संस्कृतेः प्रमुखानि अङ्गानि। यत एतैरपि विविधापेक्षित—विषयकाऽज्ञाननिराकरणपूर्वकज्ञानोत्पाद—नात्मकं संस्करणं वा, संस्कारो वा, संस्कृतिर्वा (किमप्युच्यतां,) भवत्येव। एतान्यपि संस्कृतमयान्येव सन्ति। संस्कृतस्य ज्ञानाभावे उक्तेन निगमागममयेन संस्कृतसाहित्येन या खलु अज्ञानरूपदोषनिराकरणपूर्वकज्ञानरूपगुणोत्पादनात्मिका भारतीयसमाजस्य संस्कृतिः, भवितुं शक्नोति, तयाऽसौ वञ्चित एव तिष्ठेत्।

यदि कोऽपि स्वकीयं जीवनं सफलं अभ्युन्नतं च निर्मातुं वाञ्छति, तर्हि तेन स्वकीय भारतीय संस्कृतेः सविधि स्वागतं करणीयं, एवं तस्या माहात्म्यज्ञानाय, स्वरूपबोधाय, संप्राप्तये च संस्कृताध्ययनपरिश्रमकष्ट-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खट्टरकाकाः

(ले० श्री हरिमोहनझा महाभागाः, अनुवादकः—विद्याभूषण श्रीगणेशरामशर्मा, झालावाडः)

तद्दिने खट्टरकाकामहाशयैः साकं प्राचीनसंस्कृति-विषये वार्तालापः प्रावर्तत ।

मयोक्तम्—दृश्यताम्, खट्टरकाका । तत्कालीना ऋषि-मुनयः कीदृक् त्यागपूर्णं जीवनं व्यत्ययायन्ति स्म ! गुहासु कन्दरासु च वसतिं प्रकल्प्य, कन्दमूलानि च भक्षयित्वा तपश्चरन्ति स्म । ब्राह्मे मुहूर्ते समुत्थाय, नदी-तटाकादिषु तीर्थेषु स्नात्वा, कमण्डलुं जलेनापूर्य, कुशासने उपविश्य, भगवन्तं परमेश्वरं ध्यायन्ति स्म ! कीदृशं सात्त्विक पवित्रं च जीवनमासीत् ! अद्यत्वेऽपि च श्मश्रुकूर्चान् काषायवस्त्राणि च दृष्ट्वा मनसि मम श्रद्धातिरेको लालसीति ।

श्रुत्वैतत् खट्टरकाका भृङ्गापत्राणि परिमार्जयन्तः प्रोचुः—अये, तदानीं वने रोमशत्रवो नापिताः सुलभा न बभूवुः, अतः श्मश्रूणि, रजको नोपलभ्यते स्म, अतः काषायवस्त्राणि, तैलाभावे जटाः, वस्त्राभावे वल्कलानि, अन्नाभावे कन्दमूलानि, तेषामप्यभावे एकाशनमथवोपवासः, धातुपात्रस्याभावे कमण्डलुना जलं पपुः । स्थालीनामभावे पत्रावलीषु पाणितले वा भोजनं चक्रुः । नैतत्सर्वं त्यागसूचकम्, वरं चाभावसूचकम् । 'अप्राप्तिस्तत्र कारणम् !'

अहम्—परन्तु……

खट्टरकाका—परन्तु किम् ? यदि ते पूलिकाः कचौरीश्चासादयिष्यन् तदा किमर्थं पपीता, कदलीफलानि वान्वैष्यन् ? यदि संयावकान्याप्स्यन् तदा ते किमर्थमौदुम्बरफलान्यत्रोटयिष्यन् ?? कलाकन्दमासादष्यन् ??? तदा वटहलं कस्मादपृच्छयन ??? गृहे कुण्डलिका अलप्स्यन्त तर्हि जम्बूफलानामन्वेषणं किमर्थमकरिष्यन् ??? अमृतपक्वान्नममिलिष्यत्तदामृतफलेभ्यः कुतोऽस्पृहयिष्यन् ??? यदि स्वगृहे खर्जूरीफलानि शृङ्गाटादीनि च सुलभान्यभविष्यन् तदा ते किमर्थं वन्यखर्जूरीफलैरुदरपूरणमकरिष्यन् ???

अहम्—खट्टरकाकाः ! ते वीतरागा बभूवुः । ते स्वाकाङ्क्षा जिग्युः ।

खट्टरकाकाः—नाहमेतन्मन्ये । तेऽपि च नोऽल्पाल्पं रसिका आसन् । पुष्पोपहारैर्विना न तेषां कार्यनिर्वाह एव भवति स्म । ते 'स्नो-पाउडर' स्थाने चन्दनभस्मालेपं कुर्वन्तिस्म । 'बेल्ट' स्थाने मुञ्जरज्जुरशनां परिदधेते स्म । स्वकीयामलङ्काररुचिं ते तुलसीरुद्राक्षमालाभिः पर्यतर्पयन् कौशेयरुचिं ते मृगचर्मणातर्पयन् । अये, युगं परिवर्तते, फैशनं परिवर्तते, परन्तु मनुष्यस्य मूलवासना नैव परिवर्तते ।

अहम्—तद्युगीना संस्कृतिरेवान्या बभूव ।

खट्टरकाकाः—अयि भोः ! तदानीं सर्वतोऽरण्यानि—महावनानि—एवासन् । तदा समये वन्यसभ्यतानुरूपाणि यानि यानि च वस्तूनि भवितुमर्हन्ति, तानि सर्वाणि बभूवुः । मृगाजिनं, व्याघ्रचर्म, कुशासनं, धूपश्चन्दनं, मधु, चामरं भोजपत्रं च । अधुनापि यदि द्वापरयुगीनं दृश्यावलोकनमभीष्टं भवेत्तदा झारखण्डप्रान्तं गत्वा दृश्यताम् । तान्येव धनूंषि, त एव बाणास्त एव मयूरपक्षाः सैव वंशी, सा चैकवस्त्रा नारी । यदि चाद्यत्वे सर्वाणि क्षौरगृहाणि, सौचिकानामापणाः, वस्त्रप्रक्षालनगृहाः वस्त्रोत्पादनशालाश्च समाप्तिं गच्छेयुस्तर्हि पुन-

---

स्याऽपि सहर्षमभिनन्दनं करणीयम् । संस्कृतज्ञाने जाते सत्येव कश्चिदपि संस्कृतनिष्ठां स्वकीयां भारतीयां संस्कृतिं ज्ञातुं प्राप्तुं च शक्नोति । संस्कृतिसम्पन्नतायाः प्राप्तौ सत्यामेव च कश्चिदपि निर्दोषो गुणवांश्च भवन् धर्मार्थकाममोक्षात्मकचतुर्वर्गं प्राप्तुं शक्नोति, यद्धि स्वकीयमानवजीवनस्य सफलताया एकमात्रं प्रयोजकमस्ति ।★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रेतायुगस्य दृश्यमुपस्थितं स्यात् । विलासितायाः स्रोतांसि निरुध्यन्तां, सर्वतो मुनय एव दरीदृश्येरन् ।

अहम्—ते कीदृक् कठिनं तपस्तेपुः ।

खट्टरकाकाः—अयि भोः ! ते वृथैव तपस्यां नाचेरुः ! उदरभरणस्य समस्या ब्रत तपसे प्रणोदति—प्रेरयति । तच्च पुनस्तपो हस्तपादं सञ्चाल्य भवेद्वा घण्टानादं ध्वनयित्वा वा स्यात्, खनित्रमुद्यम्य वा भवेद्वा नासिकां गृहीत्वा वा स्यात्, पाषाणं खण्डशो विधाय भवेद्वा पाषाणं सम्पूज्य वा स्यात् ।

अहम्—खट्टरकाकाः ! ते केवलमेकमेव हि कौशेयवस्त्रं परिदधानाः शीतमतिवाहयन्तिस्म । अप्येतन्नाम साधारणी वार्ता ?

खट्टरकाकाः—अथाधुनातनी नवीना युवतिस्ततोऽप्यतितरां प्रतनुतारेण कौशेयेन लीलया शीतयुद्धं जयति, अपि नाम सैषा न्यूनतरा तपस्विनी ? प्रदर्शनानुरोधात् फैशनापेक्षया वा यत् कष्टं विषह्यते, न तत् कष्टमपि कष्टमिव प्रतीयते ।

अहम्—खट्टरकाकाः, ते नन्वग्निहोत्रिणो बभूवुः ।

खट्टरकाका ईषन्मन्दस्मितं कृत्वा बभणुः—शीतत्राणार्थं केवलमुपायद्वयमद्वयी । 'हसन्ती वा हसन्ती वा हसन्ती वामलोचना' तदानीमपरा दुर्लभैवाभूत् । एवं सति ते लोका दिवानिशमग्न्याधानं कृत्वा निर्वाहं चक्रिरे । तस्मादेव हि तैस्तैः पञ्चाग्निसाधनस्यैतावन्महत्त्वमाघोषितम् ।

अहम्—खट्टरकाकाः, ते लोकानन्वध्यात्ममदृष्ट्याग्निहोत्रमाचेरुः ।

खट्टरकाकाः साट्टहासं जहसुः । अहमपृच्छम्—किमर्थं भवन्तोऽहसन् ?

खट्टरकाकाः भङ्गापत्राणि जलेनाद्राणि कुर्वन्तोऽब्रुवन्—

एतज्ज्ञातुमतीव प्राक्कालीनेतिवृत्तयुगे गन्तव्यं स्यात् अस्मा, प्राग्वैदिकं युगमालोडयितव्यं भवेत् । श्रूयताम्, अस्माकं पूर्वजा आदौ, अग्ने रहस्यं न विविदुः । दावानलं वाकाशे विस्फूर्जन्तीं विद्युद्वल्लीं वाभिवीक्ष्य ते चकितचकिता विभ्रान्ताः साश्चर्याश्च बभूवुः । यदृच्छया संयोगाज्ज्ञातवन्तो यद्धि घर्षणादग्निमुत्पादयितुं शक्यत इति । तामिमां विद्यामासाद्यैव ते खल्वानन्दोत्फुल्लहृदया हर्षातिरेकतो जहसुर्ननृतुश्च । पुरा तेऽपक्वं मांसं बुभुजुः, अधुना तत्परिपच्याचु मारेभिरे । जीवितमांसे मृतमांसे द्वयोरपि ते कमप्यपूर्वमास्वादमापुः । अतस्तेऽग्निं 'आमादं', 'क्रव्यादं' च सम्बोध्य—सम्बोध्य तं स्तोतुमुपचक्रिरे । पुरा तेऽपक्वानेव यवतिलान् भक्षयामासुः । इदानीमग्नौ परिपच्य गोधूमांश्चणकांश्च भक्षितुमारेभिरे । पुरोडाशमसाधयन् । प्राक् शीतार्तौ चकम्पिरे, अधुनाग्नितापसेवनस्यानन्दः सुलभो बभूव । प्राक् रात्रावन्धकारभयादात्मानं संगोप्य ररक्षुरिदानीं प्रकाशे सर्वमपि प्रत्यक्षमदृश्यत । 'तमसो मा ज्योतिर्गमय' सेयं प्रार्थना फलवती बभूव । अग्निज्वालामालोक्य वन्याः श्वापदा विभ्रान्ताः सन्तो दूरं पलायांचक्रुः । त इमे लोका अग्निं प्रज्वाल्याकुतोभयं निश्चिन्तं शयिमारेभिरे । यदाग्निदेवेनैतावन्त उपकारा बभूवुस्तदा कथं न ते तद्गुणानगास्यन् ? अतएव हि तैः कृतैरग्निदेवस्य गुणगानैः परिपूरितोऽस्ति वेदः ।

अग्निमीळे पुरोहितम्·········

अहम्—परन्तु हवनविधानम्······

खट्टरकाकाः प्रोचुः—दृश्यताम्, अग्नेराविष्कारादस्मत्पूर्वजानां हस्ते किलैका महती शक्तिः समाजगाम । परं त्वग्नेः प्रज्वालनार्थं ते महान्तं परिश्रमं कर्तुं विवशा अभूवन् । सुदीर्घं कालं यावदश्मघर्षणं वा काष्ठमन्थनं वा कर्तव्यम् भवति स्म । तदा महता काठिन्येनैकोऽग्निकणस्फुलिंगः कथमपि प्रादुर्भवति स्म । सैषा स्थितिरासीत्तदानीम् । अतएवेमे लोका महद्भिः प्रयत्नशतैरग्निरक्षणाय तत्परतामवालम्भिरे । 'न कदाचिदसौ प्रज्वलितोऽप्यग्निर्निर्वाणं व्रजेत् !' इत्याशङ्कया घृतं समिधश्च भूयोभूयः प्रक्षिप्य तमग्निं प्रज्वलन्तं ररक्षुः । एतदेवाग्निहोत्रस्य रहस्यम् । अहम्—आम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवम्, ज्ञातं मया ! तस्मादेव हि हेतोर्यज्ञस्यैतावन्महत्त्वमास्ते ?

खट्टरकाका भङ्गापत्राणि जलार्द्राणि कृत्वा कुण्डे न्यदधत। पुनस्तानि पाषाणेन निर्दलयन्तोऽवोचन्—अपि ते नेदानीं काचित्त्वरा शीघ्रता वास्ते ?··· तदा पुनः श्रूयताम्। अस्माकं पूर्वजाः पाषाणैः परिवार्य 'अश्मव्रजं' विदधिरे। तन्मध्ये मृत्तिकया चत्वरो न्यधीयत। तदुपरि समित् (सिल्ली) न्यधीयत। वर्षातोऽग्नेः संरक्षणार्थं तदुपरि तृणानां कटान्याच्छादयन्। तन्मण्डपे निषण्णास्तेऽग्निं परिचेरुः। होतृगणा आहुतीः प्रायच्छन्। उद्गातारो हि गीतानि गायन्तः प्रोत्साहवर्द्धनं चक्रुः। ब्रह्मा तत्रोपविश्य निरीक्षणं चकार। सर्वेषामेव कर्तव्यकर्माणि यथायथं विभाजितान्यासन्। कश्चित् समिध आजहार, कश्चन्मृदा 'शमिता-प्रणिता' पात्राणि रचयितुं नियुक्त आसीत्। 'शमिता'–निर्मातारो लोका मांसमुत्कृत्योत्कृत्याग्नौ परिपचन्ति स्म। बालिका अजाश्चादुहन्, अतएव हि ता 'दुहितरो'ऽभ्यधीयन्त। सोमलतामवच्छिद्य खण्डशः कृत्वा निष्पेष्य च रसो निष्पाद्यते स्म। महावेदीमध्यासीना लोकास्तं रसं पपुः दुग्धस्य, दध्नो, घृतस्य, मांसस्य तथा परिपक्वस्यान्नस्य च संग्रहो महान् सम्पद्यते स्म। सर्वादावग्निदेवाय 'हविः' समर्प्य ततो 'हुतशेषं' व्यतीर्यत। नानाविधा रङ्गविरङ्गा। भूरिभोगाः प्रावर्तन्त। यदि मन्येत चेत्, तदा स मनुष्यजातेः सर्वप्रथमं गोष्ठीगृहं (क्लब) आसीत्। यत्र सर्वेऽपि लोका एकत्र समवेत्यान्नं पानं च कुर्वाणा आनन्दमनुभवन्तो जगुर्जहसुर्ननृतुश्च 'संगच्छध्वम्, संवदध्वम्, सं वो मनांसि जानताम्'। सहनाववतु, सह नौ भुनक्तु, सहवीर्यं करवावहै।

अहम्—खट्टरकाका ! तेषां जीवनस्य लक्ष्यं किमासीत् ?

खट्टरकाका—तत्तु वेदमन्त्रैरेव ज्ञातव्यं भवति, जीवेम शरदः शतम्, पश्येम शरदः शतम्, शृणुयाम शरदः शतम् अर्थात् वर्षाणां जीवाम, शतं वर्षाणां पश्याम, शतं वर्षाणां शृणुयाम, शतं वर्षाणामानन्दं चानुभवाम। धनधान्यानां सन्ततेश्च वृद्धिर्भूयात्। यथाकालं मेघा वर्षन्तु। चह्वन्नं समुत्पद्यताम्। गावः प्रभूतं दुग्धं प्रयच्छन्तु। वृषभाश्रिराय हलं कर्षन्तु। वृक्षाः प्रभूतं फलन्तु। कन्दमूलानि सुलभानि सन्तु। इति। अधुनापर्यन्तं सदूर्वाक्षतमाशीर्वादप्रदाने तानीमानि सर्वाणि लक्ष्याणिसमुच्चार्यन्ते। दोग्ध्री धेनुः, वोढा अनड्वान्········ निकामे निकामे नः पर्जन्योऽभिवर्षतु फलवत्यो न ओषधयः पच्यन्ताम्·········।

अहम्—खट्टरकाका ! दूर्वाक्षतस्य कोऽभिप्रायः ?

खट्टरकाकाः—अये, स्वभोजनायाक्षताः पशूनां कृते च दूर्वा, ताविमौ द्वावपि हृदार्थौ पर्याप्तं भवेताम्। अयमेव हि दूर्वाक्षतस्याभिप्रायः। इदानीमपि मिथिलाप्रान्ते जामात्रा 'घसक्ट्टी' इत्यस्य संस्कारस्य विधिः सम्पाद्यते। तदेतत् तस्या एव परम्परायाः परिपालनमास्ते। तेषु दिवसेषु यथाउलूखले 'सोमं' निष्पीडयन्ति स्म तथैवाद्यापि च विवाहे धान्यकण्डनसंस्कारो विधीयते, पाणिवाग्निं परितः प्रदाक्षिणाविधानं भवति। इमाः सर्वाः प्रथास्तद्युगस्यैव वरदानम्।

अहम्—खट्टरकाका ! तेषां लोकानां जीवनं कीदृशमानन्दमयमासीत् ?

खट्टरकाकाः—बाढम्, वैदिके युगे जनाः सरसाः सहृदया दिनोदिन आनन्दिनश्च बभूवुः ! 'यावज्जीवेत्, सुखं जीवेत् ! इत्यासीत्तेषां जीवनदर्शनम् !! परन्तूपनिषत्कालीना महर्षयो मन्दा निरुत्साहा निष्पेदिरे। ईदृशोहतभाग्या आसंस्ते यत्तैरिन्द्रियैः सहमहायुद्धमुद्घोषितम् ! अरे, एतत् मतं, यदिन्द्रियाणि खल्वश्वसदृक्षाणि सन्ति नाम नूतम् (इन्द्रियाणि हयानाहुः), एवं सति किमश्वा हन्तव्याः ? तथा कृते रथः कथं गतिशीलः स्यात् ? प्रग्रहैरेव हस्तधृतैः किं फलं सम्पत्स्यते ? स्मृतिकाराश्चापि प्रादुर्बभूवुः परं ते केवलं वल्गाहस्ता एव। एभिः स्मृतिकारैर्यद्वस्तु स्वयं जीर्णतां नेतुं नाशक्यत, तदेव निषिद्धमुद्घोष्य प्रख्यापयितुं चेष्टितम्। तस्मादेव तैरेतैलंशुन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधानत्वम्

मान्याः श्रीमोतीलालशर्माणः, मानवाश्रमः, दुर्गापुर।

पूर्वानुवृत्तम्—

"अस्माकं विज्ञानं, अस्माकं विज्ञानं, वयं वैज्ञानिकाः, अहो वैज्ञानिकी चमत्कृतिः' इत्येवमहर्निशं डिण्डिमघोषं कुर्वतां प्रतीच्य-वैज्ञानिकानां स्वविज्ञानस्य श्राद्धेतिकर्त्तव्यता यत्र भूतमये वाक्प्रपञ्चे परिसमाप्ता दृश्यते, तत्रास्माकं विज्ञानं वाक्प्रपञ्चाधिष्ठातारं प्राणं प्राणाधारं मनः, तदाधारं विज्ञानकोशं, सर्वाधारमानन्दं, सर्वान्ते चाखण्ड-तत्त्वमित्थमनेकधा विभक्तमिति तदपेक्षया का कथा भौतिकविज्ञानमात्रैकशरणनां क्षणिकभूतविज्ञानवादिनां पाश्चात्यानाम्।

"न च भारतीयविज्ञाने-टेलीफोन-वायरलेसटेलिग्राफी-रेलवे-वेलून-फोनोग्राफ-रजतपटेत्यादीनां, अद्भुताविष्काराणां कुत्रापि किञ्चिदपि निदर्शनं न विद्यते। भारतीयानां सर्वाणि शिल्पजातानि यथाजातानां साधारणानां सामान्यमनुष्याणां सामान्या कृतिरेवेति स्पष्टमेव पाश्चात्य-पूर्वीय-विज्ञानतुलनायां पूर्वीयविज्ञानस्यापूर्णत्वं, लोका-भ्युदयशून्यत्वं, अतएव निःसा-रत्वमिति वाच्यम्। सर्वेषु युगेषु समानजातीयानामेकाकारवतामाविष्काराणामेव सत्ताया अभावात्, वर्त्तमानयुगेऽपि उत्तरोत्तरभाविनामाविष्काराणामपेक्षया पूर्वपूर्वयुगे आविष्कृतानामाविष्काराणां नैरर्थक्यस्य यथापूर्वं विद्यमानत्वेनादोषात्। मास्तु वैदिकयुगे वायरलेसटेलिग्राफी, नासन् तदानींयुगे धूम्र-शकट्यः, नैवासीदर्थशोषको रजतपटस्तदानीम्। नैव चाभवन् पुरुषार्थविनाशकान्यन्यानि वाहनानि कलहोत्पादकानि, शान्तिभङ्गकराणि च। ततः किं निश्छन्नम्। भीषणेऽस्मिन्नाविष्कारयुगे वैज्ञानिकैः किं लब्धम्?! अर्थसम्पत्तिर्लोकवैभवम्—साम्राज्यमिति चेत्। सम्पत्या किं क्रियते? सुखोपभोग इति चेत्-का तर्हि सुखदुःखमीमांसा! पशुवद्यदीन्द्रियारामत्वमेवसुखत्वमिति चेत्—त एव सुखिनः शपथपुरःसरं प्रष्टव्याः—किं नु सुखिनो भवन्त इति। ये आविष्काराः शान्तिरक्षकाः, लोकाभ्युदयपूर्वकमात्माभ्युदयहेतुभूता वा स्युस्त एवाविष्काराः। अन्ये तु क्षणिकसुखे उपयुक्ता अपि परमार्थतः—अशान्तेरेवोत्पादकाः सन्तो दूरत एव त्याज्याः। यथा यथा आविष्काराः प्रवर्द्धन्ते, तथा तथा आशान्तेर्दावानलः परिवृद्धो दृश्यते तत्र तत्र राष्ट्रेष्विति नाविदितं सामयिकात्रप्रेक्षकाणाम्।

वस्तुतस्तु वैदिकयुगेऽपि तादृशा आविष्कारा अवश्यमेव विद्यन्तेस्मेति निःसंदिग्धं ब्रूमः। आविष्काराणां स्वरूपाणि तु काले काले परिवर्तनशीलानीत्युक्तमेव प्राक्। तदा बहुधा विभक्तेषु तेष्वत्र निदर्शनार्थं कानिचिदेवोताहरणानि प्रस्तूयन्ते।

श्रूयते हि ऋग्वेदश्रुतौ—यत् त्वष्टनामकेन केनचित् स्वर्गीयरथकारेण देवविशेषेण सोमपानायेन्द्रार्थं दारुमयमेकं चमसं निर्मितमासीत्। तदिदं पानसाधनपात्रं दारुमयं सत् पानकाले सद्यश्चतुर्द्धा विभक्तं भवति स्मेति महदाश्चर्य्यम्। तस्यैतस्य महाशिल्पिनस्त्रयः

पलाण्डुसदृशेभ्यः पदार्थेभ्यो गालीप्रदानमारब्धम् ते मांसं त्याज्यमवोचुः स्त्रियं च विनिन्दितुमारेभिरे।

अहम्—किमर्थमेतदीदृशम्, खट्टरकाकाः!

खट्टरकाकाः—अये, अस्य सुस्पष्टं कारणमेतदासीयदसमर्थतया तेषां कृते जीवनोपयोगिनोऽनेके पदार्थाः सुलभा नाभूवन्। यद्वस्तु तैः स्वयं न प्राप्यते तदुपयोगमन्योऽपि च किमर्थं करोतु? सेयमीर्ष्यैव निवृत्तिमार्गस्य मूलम्। किं न पश्यसि, अधुनापि ये पण्डिताः संग्रहिणीरोगग्रस्ता भवन्ति, ते स्वान्तेवासिभ्यः सन्धितभक्षणं नानुमन्यन्त इति!

अहम्—खट्टरकाकाः, तेऽजानन् यल्लोकानामत्रैव कुशलमस्तीति।

—क्रमशः

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतिहासात् किं शिक्षिष्यामहे किञ्चित् ?

मूललेखकः—श्री उ० के० आपटेमहोदयः
अनुवादकः—दीनानाथत्रिवेदी 'मधुपः' जयपुरम्

५० पञ्चाशद्वर्षमितो व्यत्यगात् स कालः, यत्र केनचिद् वाङ्गसज्जनेन प्रस्तावोऽयं रचित आसीद् यत्—"वङ्गभाषायै देवनागरलिप्याः प्रयोगः कर्तव्यः' इति। परं वङ्गीया अन्ये विद्वांसोऽबिभयुः—यदेवंकरणेन वङ्गभाषाया अस्तित्वमेव विनश्येदिति। तावत्पर्यन्तं वङ्गपुस्तकेषु संस्कृतश्लोकानामुद्धरणमक्रियत, तदा तेषां देवनागरलिप्यामेव लेखनस्यासीत् प्रथा। तदनन्तरं संस्कृतस्य ग्रन्था अपि वङ्गलिप्यां प्राकाश्यं लभमाना अभूवन्। अद्यत्वे वङ्गीयेषु देवनागरलिपिज्ञानां जनानां संख्या नाल्पीयसी।

अदूरदर्शिता

अधुनैतावद्वर्षानन्तरं परिस्थितिं पर्यालोचयद्भिरस्माभिरेतद्वक्तुं शक्यते यत्—देवनागरलिपिमस्वीकुर्वद्भिस्तदानीन्तनैर्वङ्गीयैर्विद्वद्भिर्दूरदर्शितया कार्यं नानुष्ठितमिति। देवनागरलिप्याः स्वीकारेण मराठीभाषायाः

शिष्या अभूवन्—ऋभुः, विभ्वा, वाजश्च। ते चैते त्रयोऽपि भारतीयाः सुधन्वेत्याख्यस्य नृपतेः पुत्राः क्षत्रियवंशजाः सन्तोऽपि शिल्पविद्यायां निपुणतमा आसन्। निजकलानैपुण्याभिमानतस्त एते देवचमसनिर्म्मातारं स्वगुरुं त्वष्टारं प्रति—आक्षेपं चक्रुः। नात्र चमसनिर्म्माणसम्बन्धे त्वष्टुः काचिद्विशेषता, अपितु तद्वै शिष्यं तदारम्भकस्य दारुखण्डस्यैवेति तैरुक्तम्। इत्थं मनुष्यलोकनिवासिभिरेतैर्मनुष्यैः कृतां देवलोकस्थदेवविशेषस्य त्वष्टुर्निन्दां श्रुत्वा भारतवर्षस्य शवसोनपात्—अधिष्ठाता अग्निस्तान् प्रत्युवाच—मैवं वदत। त्वष्टा खलु देवलोकनिवासी देवशिल्पी, भवन्तस्तु भूलोकनिवासिनो मानवाः। त्वष्टुर्देवस्य निन्दापराधाभियोगेनाभियुक्ता भवन्तो दण्डभाज इति यदि दण्डप्रतीकारमपेक्ष्यते भवद्भिस्तदा तु चमसकृतं किञ्चिदुत्कृष्टतरं शिल्पं विधाय स्वर्गाध्यक्षस्येन्द्रस्य परितोषो विधीयताम्। तत एवापराधमुक्ता भविष्यन्ति भवन्त इति। तदित्थमग्निना भर्त्सितास्त एते चतुरशिल्पिनस्तदानींयुगे—आश्चर्य्योत्पादकानि नानाविधानि शिल्पानि रचयामासुः। इन्द्रार्थं धातुमयौ संश्लिष्टौ हरितवर्णौ द्वौ—हयौ, पृथिव्यां दिवि च समानरूपेण प्रचारिणौ निर्मितवन्तः। एतयोर्हर्य्यश्वयोः सम्बन्धादेव तदानीन्तनः स्वर्गाध्यक्षो मानुषेन्द्रो हरिवाहननाम्ना प्रसिद्धोऽभूत्। एवमेवाग्नये धातुमयो रोहितश्वाः सवित्रे श्यावाश्वः वायवे नियुताश्वः उषसे—अरुणो गावः, बृहस्पतये क्षणे क्षणे प्रतिक्षणं विविधवर्णेषु परिवर्तनशीला धातुमयी विश्वरूपाख्या गौः, रासभयुग्मं नासत्यदस्राभ्यां, पूष्णे—अजा, मरुद्भ्यः पृषदश्वः, सूर्याय हरिदश्वः, इत्येतानि देवताभेदेन तैस्तैर्देवैरादिष्टान्यतएव ऋक्संहितायामादिष्टोपयोगानीत्येवं प्रसिद्धानि पृथक् पृथक्दशविधानि शिल्पानि निर्म्मापयद्भिस्तैः स्वकीर्तिर्भौमत्रैलोक्ये प्रसारिता। स्वेच्छया चैकमपूर्वं चमसं, अश्वविरहितं दिवि च भुवि चाव्याहतगतिं, त्रिचक्रमुक्थ्यनामकं रथं, तृणादिनिगरणेन सदा दुग्धमेव दुग्धवतीमेकां सप्तधातुमयीं कामगवीमित्येतान्ययानि अद्भुतानि शिल्पानि निर्म्माय त एते मनुष्यलोकनिवासिनो मनुष्या अपि देवेन्द्रहरिवाहनकृपाभाजनाः सन्तः स्वर्गीया देवाः सञ्जाताः। इन्द्रसग्धौ (सहभोजने) सम्मिलिता एते सोमपानेनाभिनन्दिता इन्द्रेण। तत्रैव च सुधर्म्माभिधायां देवसभायां देवसभाविद्वान्—औतथ्यो ममतापुत्रो महर्षिर्दीर्घतमा इन्द्रनिदेशात् कीर्त्तिसूक्तेन एतानभिनन्दयामासेति स्पष्टं ऋग्वेदस्य प्रथममण्डले तेषु तेषु सूक्तविशेषेषु। विशेषजिज्ञासुभिस्तु श्रीगुरुचरणैः प्रकटितः—इन्द्रविजयाख्यो ग्रन्थो द्रष्टव्यः।

—क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओरियण्ट पेपर मिल्स

निम्नलिखतानि वस्तूनि निर्मीयन्ते

बन्धनाय:-

(१) एम्. जी. रिब्ड क्राफ्ट

(२) एम्. एफ्. अनरिब्ड क्राफ्ट

(३) अक्लेद्य (वाटरप्रूफ) क्राफ्ट

(४) क्रेप क्राफ्ट

लेखनाय, मुद्रणाय च:-

(१) श्वेतपत्रम्

(२) क्रीमरङ्गस्य

(३) अर्धश्वेतीकृतपत्रम्

(४) अश्वेतीकृतं पत्रम्

आवरणाय-पेटकानां, पुटकानां च निर्माणाय कार्टनबोर्ड, ग्रेबोर्ड, जुप्लेक्स, ट्रिप्लेक्स, कार्ट्रिज, टिकटबोर्ड, आवरणबर्ड प्रभृतिवस्तूनि निर्मीयन्ते।

ओरियण्ट पेपर मिल्स (सीमितम्)

प्रबन्धाभिकर्त्तारः-**बिरलाबन्धवः[स्वतन्त्रम् सीमितम्** बजरङ्गनगर, (उडिसा)

हरिनगर सूगर मिल्स लि०

*** फेक्टरी ***

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा-रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई-२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेनरस्गर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिपिः कामं पश्चात्पदाऽभवत्, परं मराठीभाषायाः प्रगतिरवरुद्धा जाता' इति नाऽनुभूयते। इदानीन्तु गुजराती-राज्यनिर्माणानन्तरं गुजरातीभाषाया देवनागरलिप्यां लेखनं मुद्रापणं च भवेत्—इत्येष कुतोऽस्ति निर्णयः।

वङ्गभाषाविषये चैका वार्ताऽन्याऽप्यस्ति—यदि तदानीं वङ्गभाषायै देवनागरलिप्याः पूर्णतया स्वीकारोऽकरिष्यत तदाऽऽधिक्येन सम्भवस्त्वयमेव यद् वङ्गभाषाभिज्ञानां वङ्गभाषाभाषिणाञ्च संख्याऽद्य द्वादशकोटितो न्यूना नाऽभविष्यत्, तत्फलस्वरूपे च राष्ट्रभाषाया अथवा राज्यभाषाया रूपे सैव स्वीकृताऽभविष्यत्, यतो हि भाषाभाषिणां सर्वाधिकया संख्यया सह सर्वश्रेष्ठस्य विपुलस्य च साहित्यस्यापि लाभस्तन्निर्णयानुसारेण राष्ट्रस्याऽभविष्यत्। वङ्गभाषाध्यायिनामवङ्गीयानां जनानां संख्याऽद्य लक्षावधिर्वर्तते। सौभाग्यञ्चेदं कयाचिदप्यन्यया भारतीयभाषया न लब्धम्। हिन्दीभाषाध्यायिनोऽहिन्दीभाषाभाषिणो जना अवश्यं संख्यायां सन्ति कोटिशः। परं तत्रास्ति कारणान्तरमपि। हिन्दीसाहित्यस्य विशालतायाः समृद्धेः सामर्थ्यस्य च कारणात् हिन्दीभाषाध्यायी अहिन्दीभाषाभाषी मनुष्यः कश्चन विरल एव।

अधुनापि देयं ध्यानम्

विशालराष्ट्रस्य तुलनायां सङ्कीर्णप्रान्तीयतायाः प्रलोभने नियतनस्य या त्रुटिस्तदानीं कृता, तस्याऽधुना तु मनाक् संशोधनं कर्तव्यम्। इदानीमपि वयं सावधाना भवेम, दूरदर्शितया च कार्यं कुर्याम तर्हि राष्ट्रस्य महत् कल्याणं सम्भवेत्।

विगते १९०५ तमवर्षीयसमये वर्तमानयुगे च किमप्यन्तरमवश्यमागतं वर्तते। तदानीमासीत् राष्ट्रभावना प्रखरा। उन्नततमाः प्रेरणाः सर्वत्र कुर्वन्ति स्म कार्याणि। व्यवहारस्योत्तरदायित्वं नासीदस्माकं स्कन्धेषु। अस्यां परिस्थितौ देवनागर-लिपिस्वीकारस्य प्रस्तावः सम्मुखमायात आसीत्। अद्याऽऽदर्शवादस्य व्यवहारेण सह समन्वयो भवेत्, राष्ट्रस्य चोत्कर्षः सिध्येत्—इति दायित्वमस्माकं स्कन्धेषु समापतितम्। अद्य वय चतुष्पथे तिष्ठाम इव। भारतं यथापूर्वं समर्थं प्रतिष्ठितं च जीवनं प्राप्तुं, संसारस्य गुरुत्वं च सम्पादयितुं गच्छदस्ति। अथवा नव्ययुगस्य चाकचक्ये निपत्य परकीयजीवनप्रणालीमङ्गीकृत्य, मिथः कलहं कृत्वाऽवनतिपथमनुसरत्, जगति तृतीयकक्षायाश्चतुर्थकक्षाया वैको देशो भवितुं याति। एतन्निर्णयस्तु अद्यतनीनेनाऽस्माकं नीतेर्निर्धारणेन प्राकट्यमवाप्स्यति।

प्राचीनां श्रेष्ठतां यदि वयं तुच्छां कल्पनाप्रसूताञ्च न मन्यामहे तर्हि सर्वप्रकारेणाऽस्माभिः प्रयत्नमनुतिष्ठद्भिर्देवनागरलिप्या सह राष्ट्रस्याऽऽत्मनः आविष्कारो यत्र पूर्णतया समभूत्—साऽमरवाणी संस्कृतभाषाऽपि अवश्यं स्वीकर्तव्या भविष्यति। संस्कृताध्ययनस्य प्रचलितायां प्रणाल्यां समुचितं परिवर्तनं विधाय तच्छिक्षाया अनिवार्यत्वं करणीयम्, पुरा यत्र संस्कृताऽनभिज्ञा जनाः सुसंस्कृताः प्रायो न परिगण्यन्ते स्म, तादगेव युगः सम्प्रति पुनः प्रत्यावर्तनीयश्च भविष्यति।

विपरीता परिस्थितिः

परमद्य यद्दृश्यमुपस्थितं वर्तते तत्सर्वं पूर्णतया विपरीतमस्ति। अद्य भाषाप्रान्तसम्प्रदायादीनां पंके रसमनुभवन्तो महान्तो महान्तो जना दरीदृश्यन्ते। यदातो हिन्दी राज्यभाषारूपे स्वीकृता जाता, तदा प्रभृत्येव हिन्द्यास्तथा हिन्दीभिन्नानां भाषाणाञ्च मिथः सुमहान् सङ्घर्षः प्रचलन् वर्तते।

एकतो हिन्दीभाषिजनताया मुखात्—हिन्दीसाम्राज्यस्य विस्तारस्य चर्चा श्रूयते। कदापि केनापि—अहिन्दीभाषिणा जनेन संस्कृतस्य समर्थनं कृतं भवेत्, तदा तस्मिन् आरोपः क्रियते—यत् संस्कृते भक्तिमनुदर्शयन्नयं दुर्जनो हिन्दीविषयेऽरुचिं विद्वेषञ्चैव प्रकट-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यति । केचन तु—नैतद्वक्तुमपि मनागपि सङ्कोचमनुभवन्ति यद् विगतेषु ५०–५५ वर्षेषु हिन्दीं प्रति विशेषरूपेण सर्वेषां समनोयोगप्रवृत्तेर्दर्शनात्–मैथिली–मागधी भोजपुरी–ब्रज–डिंगलप्रभृतिभाषाणामुपेक्षा समजनि । तासां च प्रगतेरवरोधेन ताः मृतप्रायाः सन्ति । तथैव यदि हिन्द्या अथ प्रचारेण भारतस्य अन्यान्यप्रादेशिकभाषाणां समुन्नतेर्विनाशः सम्भाव्यते, तर्हि तत्र हानेरथवा चिन्तायाः कापि नास्ति वार्ता ।

अन्यतो भारतीयसंविधाने भारतं सङ्घरूपेणास्ति स्वीकृतम् । भिन्नभिन्नप्रान्तानां राज्यत्वमुद्घुष्यते । प्रादेशिकभाषाणां विकासस्य वार्ता अपि शोश्रूयन्ते । शिक्षायास्तथा शासनस्य च सर्वेष्वपि क्षेत्रेषु प्रादेशिकभाषाणामेव प्रयोगं कर्तुमाग्रहः क्रियते । न सम्यग विज्ञातुं पारयामो यत्—परिस्थितावस्यां राष्ट्रस्य राष्ट्रियतायाश्च किं भविष्यति । शिक्षणालयेषु संस्कृताध्येतॄणां छात्राणां संख्या प्रतिवर्षमुत्तरोत्तरं क्षीणां दशामुपयान्तीयमद्य न गण्या इवाऽमूत् ।

हिन्दीभाषिप्रान्तेषु तु येषां छात्राणां संस्कृताऽध्ययनेऽभिलाषो भवेत्तर्हि तैर्विज्ञानस्य शिक्षा परित्यक्तव्या, भाषाचतुष्टयी च पठनीया भवति । इयत् मूल्यन्तु कश्चन विरल एव दातुं शक्नोति । परिणामोऽयं जायते यत्–संस्कृताध्ययनात् छात्रो विनिवर्तते । अस्य दुष्परिणामोऽद्य कामं न दृग्गोचरीभवेत्, परं २०–२५ वर्षाणामन्ते हिन्द्या सहैव सर्वा एव प्रादेशिकभाषाः क्षीणतामवश्यं यास्यन्तीति । संस्कृतस्य दुग्धेन पोषणमलभमानया कयापि भाषया पूर्णतया स्वोन्नति-सम्पादनस्याऽभिमानो नैव कर्तव्यः । संस्कृताश्रयं विना हिन्द्या दशा कियती शोचनीया भवति—इति तु प्रतिदिनमनुभूयते एव विद्वद्भिः । अस्माभिरियं हिन्दी राज्यभाषात्वेन तु स्वीकृता, परं तत् गुरुतरं दायित्वं निर्वोढुं हिन्दीभाषा प्रभवेत्—एतद्दृष्ट्वैव सा 'संस्कृतनिष्ठा' इति विशेषणेन विशेषिता ।

हिन्दीभाषा राज्यभाषैवं राष्ट्रभाषा वस्तुतस्तदैव भवितुं शक्ष्यति, यदा सा संस्कृतोन्मुख्येव स्थास्यति । अस्य स्पष्टार्थस्त्वमेव यद्–हिन्द्याः 'राज्यभाषे' त्युपाधिरयं भरतेन विहितं प्रभोः श्रीरामस्य पादुके शिरसि निधाय रामस्य प्रातिनिध्यरूपेऽयोध्याराज्यस्य कार्यभारस्य पर्यवेक्षणमिवास्ति । परं हिन्दीभाषिप्रान्तेष्वपि संस्कृताध्ययनं प्रति छात्राणां प्रवृत्तिः स्वल्पतमैव दृश्यते । वृक्षस्य मूले विच्छिन्ने जाते तस्य वृक्षस्य शाखाः पुष्पैः फलैश्च समृद्धा भविष्यन्तीति स्वभावात् प्रतीपमेतत्, सर्वथाऽसम्भवि च ।

'भिन्नभिन्नावयवानां समुन्नत्या सहैव सम्पूर्णस्य शरीरस्यापि कृते सुखस्य स्वास्थ्यस्य च लाभो भवेत् अयमेवास्माकं परम्पराप्राप्तः सन्मार्गो विद्यते । विचारमिममादाय यदि वयमग्रेसरा भवेम तदा तत्कालसंप्राप्तानां प्रलोभनानां दूरतः परित्यागः परमावश्यको भविष्यति । देशस्य समाजस्य च दैनन्दिनं जीवनमपि परिचालनीयमेव । अनुभवश्चायं यदद्यतन्याऽविकसितया हिन्दीभाषया राष्ट्रस्य सर्वाण्यमपि कार्याणि परिचालयितुं न शक्यन्ते । इतश्च मनोयोगं दत्वा यदि हिन्दीभाषिणो जनाः संस्कृतमङ्गीकुर्वन्ति, किन्तु अन्यान्यप्रादेशिकभाषाभाषिणः परिस्थितिवशात् संस्कृतं त्यक्तुं भवन्ति बाध्याः तदा तद्विषमदशायां हिन्द्या विरोधो वृद्धिमेव गमिष्यति, मिथो मनोमालिन्यं च प्रैधिष्यते । एवं राष्ट्रस्य स्वास्थ्यजनके विकासे नानाबाधा उत्पत्स्यन्ते । अस्याः परिस्थितेः परिणाम एक एव भवितुं शक्नोति यत् 'द्वयोः कलहे तृतीयस्य लाभः' इति लोकोक्तिरियमत्र याथार्थ्येन चरितार्था भविष्यति । आंग्लभाषाया दासत्वस्य, भारं वयमद्यवत् चिरकालं यावद् वक्ष्यामः । किमधिकं पुनर्भारतं भारतमेव न स्थास्यति ।

संस्कृतशिक्षाया अनिवार्यत्वम्

जानेऽहं विचारेणानेन प्रेरितः कांग्रेसस्य संसत्सदस्यो महामनाः चपलाकान्तभट्टाचार्यो लोकसभायामेकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान हस्तकला का केन्द्र है

राजस्थानी कला के नमूने खरीदकर अपने घरों को सुशोभित कीजिये

तथा

गृह उद्योगों को प्रोत्साहन दीजिये

★ हाथी दांत के खिलौने

★ लाख व नगीनों के कंगन

★ बंधाई व छपाई के स्कार्फ

★ जोधपुर की बनी शीतल जल की झारियां

★ चन्दन की लकडी के खिलौने

★ रंगीन एवं बंधेज की साडियां

★ पक्के रंग की चादर

★ लकडी एवं खश की बनी वस्तुएं

★ कलापूर्ण सामान

★ नीले व सफेद पाटरी के सामान

★ आकर्षक नमूने की दरियां

★ सांगानेरी रंगाई व छपाई के वस्त्र इत्यादि

★ उदयपुर के सुन्दर लकड़ी के खिलौने

★ जयपुर की कशीदा की हुई जूतियां व जूते

★ जयपुर की प्रसिद्धि-प्राप्त चूडियां व चूड़े

★ कोटा के सुन्दर डोरिये

प्रत्येक सरकारी विक्रय केन्द्र पर प्राप्त

राजस्थानी हस्तकला के नमूने अन्तर्राष्ट्रीय प्रदर्शनियों में भी ख्याति प्राप्त कर चुके हैं

राजस्थान हैण्डीक्राफ्टस एम्पोरियम
क्वीन्स वे लेन, नई दिल्ली

राजस्थान हैण्डीक्राफ्टस एम्पोरियम
जयपुर, जोधपुर व उदयपुर

राजस्थान राज्य द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खगोलवर्णनम्

(ले० श्रीमल्लिनाथचौमालः)

पूर्वानुवृत्तम्—

त्रिशंकुमंडलम् "अवाक्शिराः त्रिशंकुश्च तिष्ठात्वमरसंनिभः" इति वाल्मीकिः । मयूरमण्डलं "सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनः" इति वाल्मीकिः । एवमेव सर्वे ।

अथान्य प्रकारेण ताराव्यूहज्ञानम्—

सुमेरुतोऽयंहि कुमेरुपर्यन्तम्—
सत्क्रमो द्वादशमण्डलेषु ।
अजादिराश्याश्रितमण्डलानाम्—
द्रष्टुं तदर्थं रचयामि चित्रम् ॥९॥

व्यासार्धमानेन विधाय वृत्ते
भमण्डलस्यापरपूर्वखण्डे ।
याम्योत्तराख्यस्य समान्तराणि
कार्याण्यथ द्वादश मण्डलानि ॥१०॥

विधेयकमानीतवान् । तेन च हिन्द्या सहैव संस्कृतमपि राजभाषात्वेन मान्या भवेदिति सूचनां कृतवान् । संभाव्यते यदेष विधेयको विषयस्यास्य चर्चां कर्तुमेव सम्मुखभागतो भवेत् अत एवोक्तविधेयकचर्चाकाले यद्येतासां सर्वासां वार्तानां शान्तेन चेतसा विचारः क्रियेत चेत्तर्हि सर्वैरपि स्वीकर्तव्यमिदं भविष्यति यत् न्यूनान्यूनं प्रवेशपरीक्षापर्यन्तं संस्कृतस्याऽध्ययनस्यानिवार्यविषयस्वरूपेण प्रारम्भो न भवेत्, तावद् भारतमिदं समुन्नतिमार्गे नाग्रे गन्तुं कथमपि शक्नुयात् । विषयेऽस्मिन् संप्रति तर्कवितर्काणां नास्त्यावश्यकत्वम् । आम् , तत्स्वीकरणमात्रस्य तदनुसारेण निश्चयस्याद्यावश्यकता विद्यते ! एवं सञ्जाते विनिश्चये तु तत्कार्यान्वितं कर्तुं मार्गोऽपि मिलत्येवेति ।

★

भगोलचित्रे

उत्तर गोलार्द्धम्



पशुं त्रिकोणेऽजतिमिंगलौ
यज्ञकुण्डयामौ प्रथमे वृतौ च ।
चित्रक्रमेलाऽजवृषा घटी—
सुवर्णाश्रमश्चाढकमण्डलं तु ॥११॥

द्वितीयवृत्तेऽथ तृतीयवृत्ते—
युग्मोऽथ कालाख्यपुमान् शशश्च
कपोतलुब्धाऽर्णवयानचित्र—
पटाभ्रचत्वालमिताश्चतुर्थे ॥१२॥

अथारण्यमार्जारकीटौ शुनी
चैकश्रृङ्गी सरटपक्ष्मीनौ प्रसिद्धौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगोलचित्रे
दक्षिणगोलार्द्धम्



तथा पंचमे सिंहपुत्रोऽथ सिंहो
हृदाहिश्च षष्ठांशको वायुयंत्रम ॥१३॥

सप्तर्षयः श्वयुगलं करिमुण्डकन्या–
हस्तत्रिशंकुवनदंशकसंज्ञकानि ।
षष्ठेऽथ सप्तमवृतौ शिशुमारभूतेशौ–
तौल्यसिंहमहिषासुरवृतघूम्राः ॥१४॥

वृत्तोष्टमे हरकुलेशकिरीटसर्पा
याम्य त्रिकोणमथ वृश्चिकराशिपूर्वम् ।
नवमे तक्षको वीणा सर्पधारा धनुस्तथा–
यास्यं किरीटसंज्ञं च दूरवीक्षणवेदिके ॥१५॥

दशमे कवजम्बूकेशु गरुत्मदविष्ठिका ।
नक्षाणुवीक्षणे सिन्धुर्मयूराष्टांशकौ तथा ॥१६॥

एकादशे शिफा गोधा पक्षिराजाश्वकुंभकाः ।
ततो दक्षिणमीनश्चसारसश्चक्र भृत्तथा ॥१७॥

द्वादशे कश्यपीयं तु ध्रुवमाता तिमिंगिलः ।
राशिर्भास्करसंपातिहृदग्रावास्तथैव च ॥१८॥

अथान्यप्रकारेण तारामण्डलानां निवेशस्तज्ज्ञानां चाह । सुमेरुत उत्तरध्रुवात् कुमेरुपर्यन्तं दक्षिणध्रुवपर्यन्त द्वादशमण्डलेषु द्वादशवृत्तविभागेषु, अजादिराश्याश्रितमण्डलानां मेषादिराशय एवाश्रयो ज्ञानार्थमुपायो येषां वक्ष्यमाणमण्डलानां ताराव्यूहानां द्रष्टुं दर्शनार्थं अयं हि सत्क्रमः सरलरीतिरित्यर्थः । पूर्वोक्तध्रुववेष्टनक्रमादयं क्रमः श्रेष्ठः सरल इत्यभिप्रायः । तदर्थं चित्रं रचयामि यत्र मण्डलानां निवेशनेन तद्विषयकं स्फुटं ज्ञानं भवति । तद्वदाकारोऽपि । अथ चित्ररचना— व्यासार्धमानेन, अभीष्टत्रिज्याप्रमाणेन भमण्डलस्य अपरपूर्वखण्डरूपे वृत्ते विधाय अथ तत्र याम्योत्तरवृत्तस्य समानान्तराणि द्वादशमण्डलानि वृत्तानि कार्याणि (द्रष्टव्यं चि० २) अथ प्रथमे वृत्ते प्रथमे मण्डले च पशुमण्डलं, त्रिकोणमण्डलं अजोमेषः, मेषराशिमण्डलं, मीनमण्डलं, यज्ञकुण्डमण्डलं, यमीमंडलं च ज्ञेयं यथा चित्रे निवेशितं, तत्रस्थान एव ज्ञेयम् । द्वितीयवृत्ते चित्रक्रमेलमंडलं, अजो ब्रह्मा तन्मंडलं, वृषराशिमंडलं, घटीमंडलम्, सुवर्णाश्रममंडलं, आढकमण्डलम् च ज्ञेयम् । अथ तृतीये वृत्ते युग्मो मिथुनराशिमण्डलम्, कालपुरुषमण्डलम्, शशमण्डलम्, कपोतमण्डलम्, लुब्धकमण्डलम, अर्णवयानमण्डलम्, चित्रपटमण्डलम्, अभ्रमण्डलं, चत्वालमण्डलम् । चतुर्थे वृत्ते अरण्यमार्जारमण्डलम, कीटःकर्कराशिमण्डलम्, शुनीमण्डलम्, एकश्रृङ्गीयमण्डलम्, सरट-कृकलासमण्डलम, पक्षमीन पक्षवातो मीनस्य मण्डलम् । तथा पञ्चमे कृते सिंहशावकमण्डलम्, सिंहराशिमण्डलम्, हृदसर्पमण्डलम्, षष्ठांशमण्ड-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लम्, वायुयन्त्रमण्डलम्। अथ षष्ठे सप्तर्षिमण्डलम्, श्वयुगलमण्डलं, करिमुण्डमण्डलम्, कन्याराशिमण्डलम्, हस्तमण्डलम, त्रिशंकुमण्डलम, वनदंशको वनमक्षिका तन्मण्डलम्। अथ सप्तमे पश्चिमगोलार्धस्य प्रथमे वृत्ते (चि० ३) शिशुमारमण्डलम्, भूतेशमण्डलम्, तुलाराशिमण्डलम, शार्दूलमण्डलम् महिषासुरमण्डलम्, वृत्तमण्डलम्, धूम्रोधूम्राटमण्डलम्। अथाष्टमे वृत्ते हरकुलेशमण्डलम् किरीटमण्डलम्, सपमण्डलम्, वृश्चिकराशिमण्डलम्, याम्यत्रिकोणमण्डलम। नवमे तक्षकमण्डलम्, वीणामण्डलम्, सर्पधारामण्डलम्, धनराशिमण्डलम्, याम्यकिरीटमण्डलम्, दूरवीक्षणमण्डलम, वेदीमण्डलम्। दशमे वकमण्डलम्,

भगोलचित्रे
पश्चिमगोलार्द्धम्
उत्तरध्रुव



भगोलचित्रे
पूर्वगोलार्द्धम्
उत्तरध्रुव



शृगालमण्डलम्, सिन्धुमण्डलम्, मयूरमण्डलम्, अष्टांशकमण्डलम्। बाणमण्डलम्, गरुडमण्डलम् श्रविष्डामण्डलम्, मकरराशिमण्डलम्, अणुवीक्षणमण्डलं, एकादशे शिफामण्डलम्, गोधामण्डलम्, पक्षिराजमण्डलम्, अश्वमण्डलम्, अश्वरतमण्डलमिति केचित, कुम्भराशिमण्डलम्, दक्षिणमीनमण्डलम, सारसमण्डलम्, चंचुभृत् मण्डलम्। द्वादशे काश्यपीयमण्डलम्, ध्रुवमातामण्डलम्, मीनराशिमण्डलम्, भास्करमण्डलम्, सम्पातिमण्डलम, ह्रदमण्डलम्, ग्रावमण्डलम्। इमानि मण्डलानि सौम्यध्रुवतो याम्यध्रुवपर्यन्तं क्रमशो ज्ञेयानि। पूर्वभगोलखण्डे चित्रे पश्चिमभगोलखंड चित्रे च द्रष्टव्यानि। —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

स्वतन्त्रतादिवससमारोहः

प्रतिवर्षवत् अस्मिन्नपि वत्सरे स्वतन्त्रतादिवससमारोहः समस्तेऽपि भारते महता उत्साहेन पूर्णतमेन सम्भारेण च मानितोऽभूत् । अगस्तमासस्य १५ दिवसे सोमवारस्य प्रातःकाले भारतप्रधानमन्त्री श्रीनेहरूमहाभागो रक्तदुर्गस्य प्राचीरोपरि भारतीयं राष्ट्रध्वजं प्रास्फोरयन्, भारतस्य अपारजनतायाः सम्मुखे तमिमं राष्ट्रोत्सवं सममानयत् । अनुमानतस्तस्मिन् समये लक्षद्वयमिता जनता समवेताऽभूत्समारोहेऽस्मिन् । उत्सवस्य भूमिकां संसूच्य महामन्त्री जनतामिमां प्रार्थयत यत्—संकुचितां स्वार्थभावनां दूरे कृत्वा देशस्य तत्सम्बन्धिस्वाधीनतायाश्च सर्वतोभावेन संरक्षणमेव साम्प्रतं कर्तव्यम् । पञ्चाम्बुप्रदेशे भाषासम्बन्धे, प्रान्तविभागसम्बन्धे च यः कलहः प्रवृत्तः सोऽतीव हानिकारकः, देशस्य स्वरूपविपरीतः, स्वतन्त्रतायाश्च पक्षे सुतरां घातकः । स हि 'अकालीसम्प्रदायस्थान्' अतितरामभर्त्सयत्,ये हि पञ्चाम्बुप्रदेशस्य विभागं प्रार्थयन्ते । अयोग्यमस्तिष्का एव कस्याश्चिद् भाषायाः विरोधे कलहायन्ते । ये जनाः स्वकीयं प्रान्तं, स्वां भाषामेव च स्वदेशाऽपेक्षया महन् मन्यन्ते ते हि राष्ट्रस्य महतीं हानिं सम्पादयन्तीति बोद्धव्यम् ।

स्वतन्त्रताप्राप्त्यैव नास्माकं कर्तव्यस्य समाप्तिः । नाऽपि च स्वातन्त्र्याय युद्धमियता समाप्यते । स्वतन्त्रतायुद्धं तु सर्वदा प्रचलितं स्यात् । सेयं स्वतन्त्रता परिश्रमेण, बलिदानेन चापि सुस्थिरा भवेत् । उत्तरसीमायां यदिदं संकटं समुपस्थितं तद्विषये मार्मिकरूपेण सूचितम् प्रधानमन्त्रिणा-यद्वयं द्वितीयराष्ट्रभूमिं वा तद्विषयिणीं वार्तां वा न स्प्रष्टुमिच्छामः । किंतु यत्रात्माकं राष्ट्रस्य भूमिर्हितं वा आक्रम्येत नेदं कदाचिदपि सह्यं भवेत् । एवमेव 'गोआ' प्रदेशो नास्माभिर्विस्मृतः । ये हि तं प्रदेशमधिकुर्वन्ति, तान् वयं प्रतिक्षणं स्मरामः, शीघ्रमेव च तदिदं तेषां विदितं भवेत् । गोआप्रदेशस्योपरि अस्माभिरधिकारो न कृतः, तदिमस्माकं दुर्बलत्वं न विज्ञेयम् । तदिदमस्माकं धैर्यं, विवेकशीलत्वं चास्ति, यदस्माभिरद्यावधि स्वतन्त्रोऽपि हस्तो नास्य कृते प्रसारितः । 'पञ्चवर्षीययोजनायाः' उल्लेखं कृत्वा मन्त्रिणा सूचितं यदेतत् भारतराष्ट्रस्य जातीयं चित्रम् । अन्ते स्वतन्त्रतायाः कृते सम्पूर्णजनतायाः अभिनन्दनं कृत्वा मङ्गलकामना कृता यत् सम्पूर्णभारतीयजनतायै एव एवंविधाः सहस्रसहस्रमङ्गलदिवसाः सर्वदैव शुभसूचकाः शुभपरिणामदायकाश्च भूयासुरिति ।

राजस्थानराजधान्यां स्वतन्त्रतासमारोहः

एवमेव जयपुरराजधान्यामपि महतोत्साहेन सोयमुत्सवः सममान्यत । सचिवालयप्राङ्गणे (सेक्रेटरियेट) राज्यपाल श्रीगुरुमुखनिहालसिंहमहोदयेन सैनिकसमारोहस्याऽभ्यर्थना स्वीकृता । राज्यपालमहोदयेन यथैव राष्ट्रध्वजस्याऽऽरोपणं कृतं तथैव अश्वारोहसेनया सैनिकवाद्यध्वनिः सर्वतो ध्वनितः । एतदनन्तरं विभिन्नविभिन्नशिक्षासंस्थानां द्विसहस्रतोऽप्यधिकाश्छात्राः शारीरिकव्यायामस्य प्रदर्शनमकार्षुः । अतिकौशलेन भारतस्य राजस्थानस्य च मानचित्रमपि प्रादर्शयन् । ततः श्रीमत्या राज्यपालमहिष्या बालकेभ्यो मिष्टान्नवितरणमक्रियत ।

प्रातः नगरस्य प्रधानचतुष्पथ्यां (मानक चौक) मुख्यमन्त्री श्रीमोहनलालसुखाडियामहोदयो राष्ट्रध्वजं प्रास्फोरयत् । रात्रौ चाऽस्मिन्नेव स्थाने सार्वजनिकसभाया आयोजनमक्रियत । एवमेव नगरस्य विभिन्नविभिन्नसंस्थासु ध्वजारोपणमहोत्सवः सममान्यत । ध्वजारोपणमहोत्सवे प्रधानमन्त्रिणा प्रोक्तम् यत्—'सहस्रसहस्रनरनारीणां त्यागस्य, बलिदानस्य च परिणामस्वरूपे सेयं स्वतन्त्रताऽस्माभिः समधिगता । सोऽयं राष्ट्रध्वजोऽस्माकं त्यागस्य प्रतीकभूतः । सम्प्रति देशस्य सर्वात्मना उन्नयनमस्माकं कर्तव्येषु प्रधानतमम् ! अत एव देशस्य दीनतां दारिद्र्यं च दूरयितुं वयं संघर्षाय सर्वथा सज्जाः । यतो हि सर्वेषां राष्ट्राणां पुरतो भारतस्य महत्वं च स्वातन्त्र्यं च सर्वदार्थमस्माभिः स्थापनीयम् ।

स्वतन्त्रतादिवसस्य मङ्गलमहोत्सवं सर्वात्मना सम्मानयन्तो वयमपि भगवन्तं प्रार्थयामहे—

आदिकाले स्वतन्त्रस्य भारतस्य स्वतन्त्रता ।
लोकमङ्गलभूर्भूयाद् भव्योदर्का भुवस्तले ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुकथा

—ले० कमलानाथशर्मा

मम पितुरवस्था षष्टिवर्षासन्ना। वस्त्रविक्रयव्यवसाये स हि धनसंपन्न आसीत्। एकदा अकस्मात् हृद्रोगः, शरीरोष्मप्रवृद्ध्या भयानकी व्याकुलता चोदपद्यत। मलमूत्रयोर्द्वारे अपि रुद्धे, उदरं प्रफुल्लमभूत्। अतिकठिनतया डाक्तरेण नलिकाद्वारा मूत्रं निःसारितम्। अतिखेदोऽस्ति अस्यामेव अवस्थायां विंशतिदिनानि व्यतीयुः। अन्नं जलं च सर्वथा रुद्धम्। चिकित्सायां सहस्रानुमिता मुद्रा व्ययिताः। किन्तु न कोऽपि लाभोऽभवत्। डाक्तरवैद्यैर्विवशता प्रकटीकृता। गृहस्थैर्विवेकिभिः, वृद्धैश्च निश्चितं यत् अस्यामवस्थायां भेषजदानं केवलं कष्टप्रदानमेव। अतएव वयं त्रयोऽपि भ्रातरः साम्प्रतं गीतापाठमश्रावयाम। प्रत्येकाध्यायसमाप्तौ रामध्वनिं कुर्वन्तः कातरभावेन भगवतः प्रार्थनामकुर्म। एवं व्यतीयुः ३० घण्टाः।

अकस्माद् एको भव्यमूर्तिर्गृहाभ्यन्तरे समागत्य दुःखकारणमपृच्छत्। वयं सर्वामपि रोगकथां तस्मै न्यवेदयाम। सहसा महात्माऽसौ एकां पुटिकां दत्वाजलेन सहचूर्णं पाययितुमकथयत्। यत्र विश्वस्ता डाक्तरा अपि निराशा अभवन्, तत्र अनेन चूर्णं न किं भवेत्। इत्यासीदविश्वासः। किंतु इदानीं द्वितीय उपाय एव नाऽसीत्। अतएव सर्वेषां संमत्या तत् चूर्णमदीयत जलेन सह।

किन्तु आश्चर्यस्य घटना। एकघण्टानन्तरमेव पित्रा नेत्रे उद्घाटिते। मुखमपि यथावद् बभूव। मूत्रपुरीषयोर्द्वारे अपि यथावद्भूताम्। वैद्यडाक्तराः सर्वे चकिता अभवन्। देहत्यागोद्यतो नः पिता घण्टाद्वये स्वस्थः समभवत्। निर्बलता अवश्यमासीत्, किन्तु नवजीवनं तेन लब्धमिति सर्वेषां विश्वासोऽभवत्।

महात्मनस्तस्य दूरे दूरे अनुसन्धानमक्रियत, किन्तु न किञ्चित्फलमभूत्। असौ क आसीत्? किं वा गीतामाता? अथवा मूर्तिमान् रामध्वनिः?

मेरे पिता की अवस्था साठ वर्ष की थी। कपड़ों के विक्रय के व्यापारमें वे धनसम्पन्न थे। एक बार अचानक हृदय रोग और वृद्धावस्था की बड़ी व्याकुलता उत्पन्न होगई। मलमूत्र का द्वार भी रुक गया था और पेट फूल गया था। बहुत कठिनाई से डाक्टर द्वारा नली से मूत्र निकाला गया। बहुत दुःख है कि इसी अवस्था में २० दिन बीत गये। अन्न जल सभी रुक गये। चिकित्सा के लिए सैंकड़ों रुपये खर्च किए गए किन्तु कोई लाभ नहीं हुआ। डाक्टरों और वैद्यों ने विवशता प्रकट कर दी। सबों ने निश्चित किया कि इस समय दवा देना केवल कष्ट देना है। इसलिए हम तीनों भाइयों ने गीतापाठ आरम्भ किया। प्रत्येक अध्याय समाप्त होने पर कातरभाव से रामध्वनि करते हुए प्रार्थना करने लगे। इस प्रकार ३० घण्टे बीत गये।

अचानक एक भव्यमूर्ति ने द्वार के अन्दर आकर दुःख का कारण पूछा। हम सबों ने उनकी रोगकथा को निवेदन किया। महात्मा ने हमको एक पुड़िया देकर जलके साथ पिलाने को कहा। जब विश्वस्त डाक्टरों को भी निराशा होगई तब इस चूर्ण से क्या होगा? यही अविश्वास था किन्तु इसका दूसरा उपाय भी नहीं था। अतः सबों की सम्मति से चूर्ण दे दिया गया।

लेकिन आश्चर्य की घटना। १ घण्टे के बाद ही पिताजी ने आँखें खोल दीं। मुख भी उसी प्रकार हो गया। मलमूत्र के द्वार भी वैसे ही खुल गए। वैद्य और डाक्टर सभी चकित हुए। देह त्यागने वाले पिता दो घण्टे में बिलकुल स्वस्थ होगए। निर्बलता अवश्य थी किन्तु उन्हें नवजीवन मिल गया। यह सबों को विश्वास होगया।

महात्मा का दूर दूर तक अनुसन्धान किया किन्तु कोई नतीजा नहीं निकला। ये कौन था? क्या भगवान्! या गीतामाता? अथवा मूर्तिमान् रामध्वनि?

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

सुहृदि निरन्तरचित्ते गुणवति भृत्ये प्रियासु नारीषु ।
स्वामिनि शक्तिसमेते निवेद्य दुःखं जनः सुखीभवति।

जिसके मन में अपने प्रति कोई अन्तर, भेदभाव नहीं हो, ऐसे मित्र में, सेवा आदि उत्तम गुण वाले नौकर में, प्रिय स्त्रियों में, शक्तियुक्त स्वामी में अपना दुःख कह देने पर मनुष्य सुखी होता है। अर्थात् दुःख भार हल्का हो जाता है ॥१

वित्तं परिमितमधिकव्ययशीलं पुरुषमाकुलीकुरुते।
ऊनांशुकमिव पीनस्तनजघनायाः कुलीनायाः ॥२

अधिक खर्च करने वाले पुरुष को अन्दाज का मिला हुआ धन व्याकुल कर देता है। तङ्ग, या छोटा कपडा ऐसी कुलीन महिला को व्याकुल कर देता है जिसके स्तन और कमर के नीचे का हिस्सा पुष्ट (भारी) हो ॥२

गुणमधिगतमपि धनवानचिरान्नाशयति रक्षति दरिद्रः
मज्जयति रज्जुमम्भसि पूर्णः कुम्भो न खलु तुच्छः॥३

धनवान् किसी गुण [उपकारादि] को प्राप्त करके भी थोडे ही काल में उसको नष्ट कर देता है, भूल जाता है। भरा हुआ घडा जल के अन्दर रस्सी को डुबो देता है, किन्तु हल्का घडा (खाली) रस्सी को नहीं डूबने देता (भरे घडे के साथ यदि रस्सी रहती है तो वह भी डूब जाती है किन्तु खाली घडे के साथ वह भी जल पर तैरती रहती है ॥३

स्वल्पा इति रामबलैर्ये'न्यस्ता नाशये पयोराशेः।
ते शैलाः स्थितिमन्तो हन्त लघिम्नैव बहुमानः ॥४

छोटे समझकर जिनको श्रीराम की सेनाओं ने (अर्थात् सेतु बांधने वाले वानरों ने) समुद्र के गर्भ में नहीं डाला, वे ही पर्वत इस समय स्थित हैं (अर्थात् सेतुबन्धन के काम में बडे बडे पर्वतों को तो छांट छांट कर ले लिया गया था किन्तु छोटे पर्वतों को मतलब का नहीं समझ कर छोड दिया गया था। वे छोटे पर्वत ही अब तक स्थित हैं), अहा, छोटेपन से भी कहीं सम्मान, आदर, लाभ होता है ॥४

व्यथयतितरामुपेतः स्वस्थप्रकृतेरवद्यलेशोऽपि ।
भृशमुद्विजते चक्षुः सक्तेन रजःकणेनाऽपि ॥५

जिसकी प्रकृति स्वस्थ है, जो ठीक ठीक अपने कार्य कर रहा है, उसको समीप आया हुआ थोडा भी दोष (अनुचित, बुराई) अत्यन्त पीडा करता है। (देखिये) यह आंख, मट्टी का एक कण भी पड जाय तो अत्यन्त दुखी होती है। एक कण से भी जैसे आंख खटकने लगती है, इसी तरह रास्ते पर चलने वाले सज्जन को थोडा सा भी अनुचित बर्ताव बहुत दुःख पहुंचाता है ।५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[भारतीय स्वाधीनताक्रान्तेः (१९४२ई०) अवसरे स्थापितम्]

★ नयनाभिरामदृश्यैः ★ पुरस्कृतकथाभिः ★ रोमांचकारिघटनाभिः ओतप्रोतम्
★ हृदयग्राहिगाथा ★ मनोहरं मुद्रणम् ★ ज्ञानवर्धकं पारिवारिकं मनोरंजनम्

'देशमुख' हिन्दी साप्ताहिकम् प्रतिगुरुवासरमिदं पत्रं प्रामाणिकलेखैः, बालस्तंभैः, चित्रैः, व्यङ्ग्यचित्रैः शब्दचित्रैश्च सह चलचित्रदृश्यमयीं सामग्रीमुपहरति।
इदं भवत्परिवारस्य सर्वेभ्यः सदस्येभ्यो मनोरंजनसाधनानि समर्पयति एतस्य साहित्यं भवतो ज्ञानं वर्धयति, भवतो जीवने नवीनमुत्साहं भरति, स्फूर्तिमानयति। बौद्धिक-राजनैतिक-आर्थिक-सामाजिकविचारान् द्रढयति।

अतएव-सर्वत्र 'देशमुख' साप्ताहिकं सम्मान्यते, प्रख्यायते च।

❀ त्वरितं पठन्तु

समस्तभारते सर्वाधिकविक्रयाय प्रमाणितं सचित्रं हिन्दी-साप्ताहिकम्
महाराष्ट्रराज्यस्यैकलं संध्याकालसमाचारदैनिकम्

देशमुख
[सामाजिकक्रांतेः सचित्रं साप्ताहिकम्]
'DESHMUKH'
(Social Revolutionery Hindi Weekly)
पोस्ट बाक्स ६०२९ Post Box 6029
बम्बई–१२ (भारत) Bombay–12 (India)

❀ इष्टमित्रान् पाठयन्तु

पञ्चशील का प्रबल प्रचारक !

एकवर्षस्य मूल्यम्	१०)
षण्मासानाम्	६)
पुस्तकालयेभ्यः	३)

लेखकेभ्याश्चित्रकरेभ्यश्च निःशुल्कम्

प्रति सप्ताहं १६ पृष्ठानि बृहदाकारे। एकप्रतेः २५ नवपणाः। विशेषांका वार्षिकं निःशुल्कम्
देशमुखं भवदीयपरिवारस्य बालवृद्धनरनारीमातृभगिनीप्रभृतीन् सर्वान् कुशलान् नागरिकान् निर्माति
देशमुखं भवतो मित्रम्, परिवारसदस्यः, समयदर्शकश्च, समाजस्य समस्याः समादधाति।

"साप्ताहिक स्तम्भ"—बम्बई की रातें, देखी-सूनी बातें, कहो कैसे कही ? इनसे मिलिये, नई-पीढ़ी, मुस्कराहट का सेम्पुल, धरती गाती है, नये प्रकाशन, नवाब राजे-महराजे, श्रमिक-संगठन, विश्व एक नजर में, नेता के विचार, चित्र-कसौटी, शिक्षक-समाज, महिला जागरण, सितारों की कलम से, अर्ज करता हूँ, आपके पत्रों के उत्तर, देशमुख के साप्ताहिक चहरे, क्या खोया क्या पाया ? भारतीय मार्कीट व्यवसाय, पर्वत की वासनाएँ, अन्तराल की आत्मा (उपन्यास), वेश्यावृत्ति और उसका अन्त, कैसे हो ? नेहरू चाचा, परिवार विज्ञान के बढ़ते चरण, सयानों ने कहा, सम्पादक की डायरी, भूदान चर्चा कसौटी पर बापू ने कहा था ? अनमोल बोल, ये समाज के कोढ़, जलते पृष्ठ, ये अन्याय-अनाचार-उत्पीडन कैसा ? सफल जीवन की कुँजियां, ये पथभ्रष्ट ललनायें जब माता बनेंगी ? जाने-पहचाने-चेहरे, प्रेमकथा, मस्ती, कूटकथा, गूढ़जाल, रम्यकथायें, उन्माद, अजब कथायें, मील के खम्भे, स्वतन्त्रता के प्रहरी, भूत के गर्भ में छिपा इतिहास का एक पृष्ठ, घर-गृहस्थी की बातें।

★ एते भवतो रसिकप्रवृत्तिमुल्लासयिष्यन्ति, हृदयमाक्रन्दयन्ति, जीवनस्य विभिन्नावस्थानां दर्शनं कारयिष्यन्ति।

★★★ अद्यैव १०) शुल्कं प्रेषयित्वा देशमुखं पठत।

श्रीमान् वितरणनिर्देशकः, दैनिकदेशमुखम् (साप्ताहिकम्) पोस्टबाक्स-६०२९, बम्बई–१२ (भारत)

तडित्पत्रम्—'देशमुखी' बम्बई, Telegram : 'DESHMUKHI' Bombay.

सम्पर्क करें—पत्र विक्रेता, समाचार-प्रतिनिधि, फोटोग्राफर, विज्ञापन एजेंट, लेखकगण, चित्रकार,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

LIBRARY HARDWAR

भूमौ संदर्शितस्वर्गा दुर्गा दुर्गार्तिनाशिनी ।
भारते सर्ववर्गाणामपवर्गाय जायताम् ॥

वर्षम् १० | [illegible] | वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकप्रते चत्वारिंशत् नवपणाः (४० नयेपैसे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गागर में सागर

अणु-शक्ति के आविष्कार ने आज भौतिक-स्तर पर भी ज्ञान-योग आश्रित रस-रसायनों के सूक्ष्मीकरण सिद्धान्त को समझना आसान कर दिया है। एक विशिष्ट द्रव्य या धातु को यदि निरन्तर सूक्ष्म से सूक्ष्म (बारीक) किया जाय तो उस पदार्थ में निहित शक्ति प्रकट होने लगती है; रस-रसायनों के विलक्षण प्रभाव का यही रहस्य है। बैद्यनाथ रस-रसायन सैकड़ो-हजारों अग्निपुटों, औषध-संस्कारों और स्वरसभावनाओं के द्वारा सूक्ष्मीकरण की शास्त्र-सम्मत प्रक्रिया से तैयार होते हैं।

बैद्यनाथ

रस-रसायन

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

बैद्यनाथ सिद्ध मकरध्वज, बैद्यनाथ बसन्तकुसुमाकर रस, बैद्यनाथ पूर्णचन्द्र रस बृहत्, बैद्यनाथ स्वात चिन्तामणि रस बृहत्, बैद्यनाथ योगेन्द्र रस आदि आदि बैद्यनाथ रस-रसायन स्वयं स्फूर्त शक्तिपुंज होते हैं।

श्री बैद्यनाथ आयुर्वेद भवन प्राइवेट लि०
कलकत्ता · पटना · झाँसी : नागपुर · इलाहाबाद

भारतीय-औषधानां सर्वविश्वस्तं निर्माणकेन्द्रम्

श्री वैद्यनाथ-आयुर्वेद-भवनम्
(प्रायवेट लिमिटेड)
कलिकाता, पटना, झांसी, नागपुरम्, इलाह[ाबाद]

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्त भेषजानां सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्ये भेषजानीमानि लभ्यन्ते

राजस्थानस्य विक्रयकेन्द्राणि

कांसली आयुर्वेदिकस्टोर्स—जौहरी बाजार, जयपु[र]
जोधपुर आयुर्वेदिकस्टोर्स—सर्राफा बाजार, जोधपु[र]
अजमेर आयुर्वेदिकस्टोर्स—स्टेशन रोड, अजमे[र]

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारैस्वीकृता—

विषय-सूची

क्रम संख्या लेखा:	लेखका:	पृष्ठ संख्या
१. श्रीशारदाष्टकम्	श्रीज्ञानेश्वरशरणशर्मा शास्त्री, श्रीवृन्दावन	२७५
२. उपनिषदां वैशिष्ट्यम्	श्रीप्राणनाथपङ्कजः देहली विश्वविद्यालयः	२७६
३. खट्टरकाकाः	अनु० विद्याभूषण श्रीगणेशरामशर्मा, झालावाड़ः	२७७
४. वेदस्य सर्वविद्यानिधानत्वम्	स्व० श्रीमोतीलालशर्माणः मानवाश्रमः, दुर्गापुरा	२८१
५. रूप्यकमेकं क्व गतम् ?	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	२८४
६. खगोलवर्णनम्	श्रीमल्लिनाथ चौमालः	२८५
७. सम्पादकीयम्	सम्पादकः	२८८
८. वर्तमानसमये संस्कृतस्योपयोगिता	श्रीप्यारेमोहनशर्मा, खेतड़ी	२९१
९. अवकरे पतितो हीरकः	श्रीकमलानाथशर्मा, जयपुरम्	२९३
१०. सूक्ति-सुधा	सम्पादकः	२९४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर (राज०)

वर्षम् १० | आश्विनमासः, सं० २०१७ (अक्टूबर मासः सन् १९६०) | अङ्कः १२

श्रीशारदाष्टकम्

(ले० श्रीज्ञानेश्वरशरणशर्मा शास्त्री काव्यतीर्थम् , श्रीवृन्दावनम)

अहो शारदे ते पदाम्भोजदासा लभन्तेऽखिलं शास्त्रसारं हि सद्यः ।
कथङ्कारमज्ञानवारां निधेर्मां विना सेवया पारभूतं करोषि ॥१

कदाचिज्जगन्मातरुत्प्रेक्षमागस्त्वदीयं सुचिन्त्यं शुभं दिव्यरूपम् ।
भविष्यामि किं किञ्चिदज्ञानहीनस्त्वदीयोऽहमित्याशया प्रार्थयामि ॥२

चलच्छुभ्रवस्त्रावृते ! कुन्दगात्रे ! दधाने ! करे पुस्तकं चाक्षसूत्रम् ।
मनोमोददां वल्लकीं वादयन्तीं मरालासने भारति त्वां स्मरामि ॥३

टलन् भीमजाड्यान्धकारादहं ते पदद्वन्द्वभास्वद्विभामाश्रयामि ।
स्फुरच्छास्त्रतत्त्वः पवित्रं यशस्ते कदा शारदे गायमानश्चरामि ॥४

तवाङ्घ्रिं प्रपन्नोऽबुधोऽकिञ्चनो वा भवत्येव सद्यः सुधीर्वित्तवांश्च ।
त्रिलोकेश्वरि त्वादृशीं मातरं को लभेत प्रसीद प्रपद्येऽहमम्ब !

परावागधिष्ठात्रि नित्ये सुवर्णे चिदानन्दरूपे लसच्छ्वेतहारे !
विरञ्चीशशक्रादिभिस्संस्तुते त्वामहं शारदे ! बुद्धिदात्रि प्रपद्ये ॥६

यया लोकसृष्टिस्थितिप्लावनानि जगन्नायको संविधत्ते मुरारिः ।
यदंशा भवान्यादयस्तामहं त्वां सदा भावये भावगम्यस्वरूपाम् ॥७

सदा शारदेन्दुप्रसन्नानने शारदे ते कृपालेशतः प्राप्तविद्यः ।
व्रजाधीशरासेश्वरीप्राणनाथे रतिर्नन्दसूनौ भवेदालयं मे ॥८

इदं शारदाया यशोभिर्निबद्धम् पवित्रं मनोमोददं मञ्जुभावम् ।
पठन्तोऽष्टकं कोविदा शुद्धभावान्मुदं संलभन्तामिति प्रार्थयामि ॥ ९ ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनिषदां वैशिष्ट्यम्

(ले० प्राणनाथपंकजः देहली विश्वविद्यालयः)

भारतीयसंस्कृत्यां, वैदिकवाङ्मये, विश्वदर्शने चोपनिषत्साहित्यस्य शीर्षस्थानमस्ति। वेदानामन्तः–सारभूतो वेदान्तसिद्धान्तोऽस्मिन्नेव साहित्ये प्रतिपादितः। 'अध्यात्मविद्या विद्यानामि'ति भगवता कृष्णेन गीताया विभूतियोगे दशमाध्याये कथितम्। एतासूपनिषत्स्वेवाध्यात्मविद्यायाश्चर्चा वर्त्तते। भौतिकताप्रधानेऽस्माकम् संसारे अध्यात्ममेव गौरवं भारतस्य। अस्मिन्जगतीतले दृश्या विनश्वराः परिच्छिन्नाः—अदृश्या अविनश्वरा व्यापकाश्चोभयविधपदार्थाः। एकस्य रक्षणायान्यस्यावश्यकता नोपेक्षितव्या। परमध्यात्मम् मनुजस्य परमपुरुषार्थ इति निश्चितम्। वेदान्तस्येयं निश्चितधारणा उपनिषत्साहित्य एव वर्त्तते। इदमस्त्युपनिषज्ज्ञानं येन निखिलविश्वे भारतीयानां गौरवपताका स्थापिता। शार्मण्यदेशीयः शोपेनह्वायराभिधानो महान् दार्शनिकोऽपि उपनिषदां विषये मुक्तकण्ठेनावदत्—

From every sentence deep, original and sublime thoughts arise and the whole is pervaded by high and holy and earnest spirit......In the whole world there is no study, except that of originals, so beneficial and so elevating as that of the oupnakhat. It has been the solace of my life and it will be the solace of my death.

"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत्प्रत्यन्त्यभिसंविशन्ति। तद्ब्रह्म। तद्विजिज्ञासस्वे'ति–उपनिषदां मनुजं प्रति संदेशः। सांसारिक–पदार्थेषु भोगेषु सुखं नास्ति। यदि संसारपदार्थेषु शांतिरभविष्यत्तर्हि यमराजदत्तप्रलोभनं विहाय नचिकेता ब्रह्मविद्यां वेदान्तशिक्षां न अयाचिष्यत। यमराजो नचिकेतसं प्रत्युवाच—

"शतायुषः पुत्रपौत्रान् वृणीष्व
बहून् पशून् हस्तिहिरण्यमश्वान्।
भूमेर्महदायतनं वृणीष्व स्वयं
च जीव शरदो यावदिच्छसि॥"....[२]

परं नचिकेता जानाति स्म यदेभिः पदार्थैः सततं शान्तिर्न भविष्यति। अतएव स्पष्टमुक्तं तेन यमराजाय–

"श्वोभावा मर्त्यस्य यदन्तकैतत्-
सर्वेन्द्रियाणां जरयन्ति तेजः।
अपि सर्वं जीवितमल्पमेव-
तवैव वाहास्तव नृत्यगीतेः॥"....[२]

न वित्तेन तर्पणीयो मनुष्यो
लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।
जीविष्यामो यावदीशिष्यसि त्वं,-
वरस्तु मे वरणीयः स एव॥"...[३]

दृढधारणा चेयमुपनिषदां दार्शनिकानाम् "यदेकस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवति।"[४] निखिलजगत्यां यदि–उपनिषद्धारणा वर्तेत तदा न कुत्रचिदपि संघर्षोऽशान्तिर्वा भवेद्यतः,

'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते'[५]॥

यदा वासुदेवः सर्वमिति भावना मनुष्याणां हृद्यागच्छेत्तर्हि भ्रातृभाव आत्मभावश्च संसारमध्ये विचरेतामिति निश्चितम्। अस्ति व्यापकम् सर्वेष्वात्मतत्त्वम्—

'तदेजति तन्नैजति तद्दूरे तदन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥'[६]

१ तैत्तिरीयोपनिषद्–३।१।१। २ कठोपनिषद्–१।१।२३। ३ कठोपनिषद्–१।१।२६-२७। ४ छन्दोग्योपनिषद्– ५ ईशावास्योपनिषद्–६ ६ ईशावास्योपनिषद्–५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खट्टरकाकाः

(ले० श्री हरिमोहनझा महाभागाः, अनुवादकः—विद्याभूषण श्रीगणेशरामशर्मा, झालावाडः)

खट्टरकाका मन्दस्मितं कृत्वा प्रोचुः—अपि त्वं कुशलस्य अर्थं जानीषे ? अस्मत्पूर्वजाः प्रायेणानावृतपद्भ्यामेव चलन्तिस्म । अधुनेव तदानीमुपानहस्तु नैव बभूवुः । सर्वतो वनमेवासीत् । कुशाः (दर्भाः) निशिताग्रा अंकुशा इव तुदन्ति स्म । ते पदतले छिद्राण्यकुर्वन् । स्मृतिकाराश्चतुरा बभूवुः । 'कुशाः समुत्पाट्यन्ताम् !' इति लोकान् उपादिशन् । तैः पुनश्चिन्तितम्, 'नेत्थं कार्यनिर्वाहः स्यात् ।' अत एव हि कुशानामेतावन्माहात्म्यमुद्भावितम्—

इतिमान्यता यदा दृढ़ा स्यात्तदा मंगलमयमिदं जगत् भविष्यति । 'अशब्दमस्पर्शमरूपमव्ययं, तथारसं नित्यमगन्धवच्च यत्'[७] इदमात्मतत्त्वं ज्ञातव्यम् । 'यौवै भूमा तत्सुखं, नाल्पे सुखमस्ति । भूमैव सुखं भूमा त्वेव विजिज्ञासितव्यः'[८] । मायाबंधनमिदं वेदान्तदृष्ट्या तु मिथ्या त्रिषु कालेषु पर'मिन्द्रियाणि प्रमाथीनि हरन्ति प्रसभ मनः'[९] । अतः मिथ्यापि सत्यवत्प्रतीयते । उपनिषद्विद्याऽस्य बन्धोच्छेदस्य श्रवणमनननिदिध्यासनान्युपाया इति निष्कर्षेण स्थापयति । जीवत्वमस्मास्वारोपितम् । चिन्मयानन्दभूताः सच्चिदानन्दरूपाः परमांशाः वयम् ब्रह्मणः । 'ममैवांशो जीवलोके जीवभूतःसनातनः'[१०] इति गीता । सदसद्विवेकाभावे 'अहंकारविमूढात्मा कर्त्ताहमिति मन्यते'[११] । परम यदा ब्रह्मविद्यामुपैति तदा—'एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो'[१२] इति सनातनसत्येन परिचितो भवति । तदा नैव किंचित्करोमीति धारणा तस्मिन्वर्त्तते । अनासक्तरूपेण कर्मणि प्रवर्त्तते परं फलाकांक्षा न भवति—तदा स 'न हृष्यति न द्वेष्टि न शोचति न कांक्षति, शुभाशुभपरित्यागी'[१३] भवति ।

विश्वस्य कस्मिन्नपि साहित्य एतादृशो महान् दार्शनिकसिद्धान्तो न श्रूयते, न पठ्यते, न दृश्यते । उपनिषत्स्वेव मानवतायाः परमकल्याणकारकं पाथेयं वर्त्तते । अनयैव कल्याणकारिण्या आनन्दप्रदायिन्या अध्यात्मविद्यया पुरा कल्याणमभवत् । किंच अद्यापि भौतिकवादग्रस्तः, भोगवादकरेषु क्रीड़नकः मानवो यदि चेत् सुखं शांतिं प्राप्तुं शक्नोति तर्हि अनयैव अध्यात्मविद्यया । नान्यो मार्गः सुगमतरः ।

उपनिषज्ज्ञानं विश्वं सद्भावनां मैत्रीं च संदिशति । यदा मानवः मानवं बन्धुवद् ज्ञास्यति, यदा च—अयं परः निजो वेत्ति—इति भावनासमाप्तिर्भविष्यति, यदा च सर्वं खल्विदं ब्रह्म, ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीति धारणा जागरिष्यति तदा जगति कस्यचित् प्रकारस्य कलहस्य लेशोऽपि कथं वर्तिष्यते ? यदा च वयं ज्ञास्यामः अनित्याः सांसारिकपदार्थाः अस्थिराणि चैश्वर्याणि तदा क्षुद्रा महत्त्वाकांक्षा अधिकारलिप्सा वा नोत्पत्स्यते । सहअस्तित्वस्य सिद्धान्तं मन्यमानानि जीवेम शरदः शतमिति भावनया,मृत्योर्माऽमृतं गमय—इति प्रार्थनां कुर्वाणानि विभिन्नानि राष्ट्राणि भ्रातृत्वेन वर्तिष्यन्ते । उपनिषत् एतादृशमार्गम् प्रति अस्मान्नयति—जीवनं प्रति, सनातनत्वं प्रति, आनन्दं शाश्वतं प्रति—विश्वस्य साहित्ये नैतादृशी रचना—इति प्राच्यानां प्रतीच्यानां विदुषाम् सम्यग्मतं—एतदेव तासाम् वैशिष्ट्यम् ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत् ॥

---

७ कठोपनिषद्—१।३।१५। ८ छन्दोग्योपनिषद्—७।२३।१ ९ भगवद्गीता— १० भगवद्गीता—३।२७
११ छन्दोग्योपनिषत्—६।८।७ १२ गीता—१२।१७ १३ गीता—१५।७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कुशाग्रे वसते रुद्रः, कुशमध्ये तु केशवः ।
कुशमूले वसेद्ब्रह्मा, कुशान् मे देहि मेदिनि ।१।।"

अनेन तावत् सिद्धं समीहितम् । किमु वक्तव्यम् ? विवाहे, उपनयने, श्राद्धे तथा समस्तेषु च यज्ञकर्मसु कुशानां व्यवहारो निर्बाधं प्रचचाल । कुशासनानाम्, कुशमुद्रिकाणां तथा च त्रिकुशादीनां निर्माणार्थं लोकाः कुशानुत्पाट्योत्पाट्य संजगृहुः । भाद्रपदे मासि यदा वनानि सघनतामासादयन्ति, तदैव कुशोत्पाटनस्य विधेर्मुहूर्तदिनं विनिश्चितं तैः । विनैव जनान्, विनैव श्रमिकान्, केवलं पुण्यलोभस्याधारे सामूहिकरूपेण कुशोत्पाटनस्य विधिविधानमारब्धं राष्ट्रेऽत्र सर्वत्र । एतत्परिणामतस्तत आरभ्य स एव जनः 'कुशलः' अभिधीयते स्म, यो हि कुशानामुन्मूलने, तदुत्पाटने, सिद्धहस्तो भवति स्म । तदानीं कुशलप्रश्नस्यायमर्थो गृह्य ते स्म, 'अपि ते गृहे प्रचुराः पर्याप्ताश्च कुशा वर्तन्ते ?' इति । अये, तत्कालीना ऋषयश्चाणक्यस्यापि गुरव आसन् !

अहम्—खट्टरकाकाः, भवन्तस्तद्युगस्य साम्यमनेन वर्तमानेन युगेन कुर्वन्ति ? परं कुतः स हि सत्ययुगः, क्व चायं कलियुगः ! अन्तरं महदन्तरम् ॥

खट्टरकाका भंगायां कृष्णमरीचानि व्यामिश्रयन्तः प्रोचुः—अयि, भोः ! प्रतियुगं मनुष्यस्तु स एव भवति, परं तु देश-कालपरिस्थितयो मनुष्यं यथा नर्तयन्ति स तथैव नृत्यति । पश्य—

"कलिः शयानो भवति, संजिहानस्तु द्वापरः ।
उत्तिष्ठन् भवति त्रेता, कृतं सम्पद्यते चरन् ।।१।।"

पण्डितवर्या अस्येत्थमर्थं कुर्वन्ति यद्धि कलियुगे लोकाः शयाना वर्तन्ते, द्वापरे निद्राणा अभूवन्, त्रेतायामुत्तिष्ठन्त आसन् तथा सत्ययुगे चलन्तो बभूवुरिति । परमस्य वास्तवमर्थमहं ते निरूपयामि । तथा हि—

सत्ययुगेऽस्मत्पूर्वजा अपराधवृत्तयो वनेचरा इव बंभ्रम्यमाणा बभूवुः । स्वपरिग्रहपदार्थैः पशुभिश्च साकमद्यात्र श्वश्च परत्रेत्येवमितस्ततो बभ्रमुः । ततस्त्रेतायुगे किंचित् स्थिरतापद्यत । लोका गृहान् निर्माय स्वनिवासं चकल्पिरे, हलमाकृष्य कृषेः कर्माण्यारेभिरे । द्वापरयुगेऽपि सुखसाधनानि–जीवनोपादानानि–वृद्धिं जग्मुर्लोकाश्चानन्दमनुभवन्तो निद्रालुत्वं प्रपेदिरे । ततोऽधुना कलियुगे तु विलासितायाः कापि सीमैव नास्ते, इदानीं लोका निश्चिन्ताः सुखं शेरते । एवमेव मानवसभ्यतायाः क्रमविकाशो बोभूयमानः प्रचलितः प्रचलति च ।

अहम्—खट्टरकाकाः ! श्रीमन्तस्तु नव्यमेवार्थमुद्भावयन्ति । परन्त्वेतावत्तु मन्तव्यमेव स्याद्यत्तदानीं धर्मस्य महत्त्वं बभूव, इदानीं च धनस्य महत्त्वमास्त, इति ।

खट्टरकाका अब्रुवन्—अये, धनस्य महत्त्वं तु सार्वकालीनं शाश्वतिकं सार्वभौमं च वर्वर्ति । अद्यापि च धनबलात् सर्वथा सत्यमपि नन्वनृतं प्रमाणयितुं शक्यते । तदा कालेऽपि च सैवा परिस्थितिः समभूत् । उपनिषत्सु दृश्यताम्,—"हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् !"

अहम्—तदानीं समये देवतानां पूजा प्रतिष्ठा भवति स्म, अद्यत्वे सा धनिकानां भवति ।

खट्टरकाका भंगाया गुलिकां कुर्वाणा अभाषन्त—अये, यो हि धनवान् स एव देवः । देवताशब्दस्यार्थनिरुक्तिरास्ते, यो दीव्यति सः । राजानो दिव्यन्तं वेशं परिदधुः । एवमेवान्येषां शब्दानामपि चार्थेष्ववधीयताम् । 'ईश्वर' शब्दस्यार्थोऽस्ति, ऐश्वर्यवान् । 'लक्ष्मीपते'रर्थः सम्पत्तिवान् । 'नारायणस्या'र्थोऽस्ति यो हि जलप्रासादेषु निवसति सः । 'गरुडवाहन'स्यार्थः—यः शीघ्रगामिना यानेन यातायातं करोति सः । 'प्रजापतेरर्थः'—यः प्रजानां स्वामी, सः । 'हर'स्यार्थोऽस्ति राजस्वापहारको जनः । 'चतुर्भुजस्या'र्थो यस्य बाहुबलं सर्वतः प्रसृतं स्यात् सः । 'पंचमुखस्या'र्थो यः पञ्चव्यक्तीनामाहारांशान् भक्षयति, सः । अये, एवमेव देवताशब्दस्यार्थो भवति धनवान्, धनवान् !

अहम्—किन्तु सर्वारम्भेषु सर्वदा सर्वादौ गणेश एव पूज्यते ?

खट्टरकाकाः—आम्, सत्यमेतत् । 'गणेशस्या'र्थोऽस्ति गणस्य समूहस्य दलविशेषस्य वा स्वामी । तदानी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्तने समये दलपतयो गजमुखा बभूवुस्तथा सर्वसाधारणाः प्रजाजनास्तद्द्वाराक्रान्ता मूषिका इव भवन्ति स्म । तस्मादेव हि गणेशो मूषिकवाहनः प्रोच्यते । एतत्सर्वं ननु रूपकं नाम !

खट्टरकाकाः पिष्टां भंगागुलिकां सलिलकणैः सलीलं स्नेहयन्तोऽब्रुवन्—'दृश्यताम्, प्राक् लघु-लघूनि मंडलानि (दलानि) आसन् । अत एव गणेशादेव हि 'श्रीगणेशो' बभूव । तत्पश्चाद्यदा राजानः प्रासादभवनेषु भूरि भोगान् भुञ्जन्तो विहर्तुमारेभिरे, तदाप्सरसामालये विहरणशीलानामिन्द्रादीनां कल्पनाऽक्रियत । यदा ह्येकच्छत्राश्चक्रवर्तिनः सम्राजो बभूवुस्तदा 'एकमेवाद्वितीयं ब्रह्म !' सेय कल्पना समभूत् । अये, देवतागणाः सामन्तवादस्य प्रतीकानि वर्तन्ते, ब्रह्मा च साम्राज्यवादस्य प्रतीकमास्ते ।

अहमवदम्—खट्टरकाकाः, भवन्तः किमपि ब्रुवन्तु परन्तु तत्कालीने समये सामाजिकी व्यवस्था कीदृशी शोभना सर्वाङ्गसुन्दरी चासीत् । वर्णाश्रमधर्मोऽवलोक्यताम् ।

खट्टरकाका ऊचुः—अये, तदा बुद्धिर्ब्राह्मणायत्ता बभूव, परं बलं तदधीनं नासीत् । बलं क्षत्राधीनं बभूव परन्तु बुद्धिस्तदधीना नो बभूव । इमे ब्राह्मणाः प्रतिपदं शास्त्रार्थानाविर्भावयन्ति स्म, क्षत्राश्च तेऽनुक्षणं शस्त्रास्त्राण्युत्तोलयन्ति स्म ।

अहम्—खट्टरकाकाः, ते खलु सिद्धान्ताननुसेरुः । खट्टरकाकाः पात्रे भंगारसं निर्गालयन्तोऽब्रुवन्—अये, न सिद्धान्ताननुवर्तन्ते स्म तेऽपि तु महामूढा बभूवुरिति ज्ञातव्यम् । यदा यदा ब्राह्मणानां मनोभ्रमावेशो भवति स्म तदा तदा ते वचनरचनां कुर्वन्ति स्म । क्षत्राणां च यदा मनोभ्रमो जायते स्म तदा ते प्रणं प्रतिज्ञां वा कुर्वन्ति स्म । अये, नन्वहं पृच्छामि भोः ! यदि कश्चिद्राक्षसो धनुर्भङ्गमकरिष्यत्तदा विदेहो महाराजो जनकः किं कर्तुमपारयिष्यत् ? यदि कश्चित् चाण्डाल एव हि लक्ष्यवेधमकरिष्यत्तदा द्रुपदराजः किं चेष्टितुं प्राभविष्यत् ? सर्वेऽपि ते विक्षिप्ता आसन् । सिद्धान्तानुवर्तने मदोद्धता आसन् । केचिद्वचनपरिपालनायाकिञ्चनत्वं किम्पचत्वं चाङ्गीचक्रिरे । केचन स्वाभिमानरक्षार्थं प्राणोत्क्रान्तिकरा अभूवन् । अस्मिन्नेव मनोभ्रमावेशे संख्यावन्तो राजानो मृत्युमालिलिङ्गुः, असख्या राजरमण्योऽग्निदाहैः प्राणांस्तत्यजुः, अस्मिन् व्यतिकरे कियन्तो वा न राजप्रासादा नष्टा भ्रष्टाः परिमुषितारच नो बभूवुः । समस्तो हीतिहास एभिरेव तथ्यैः परिपूर्णोऽस्ति !

अहम्—खट्टरकाकाः, ते लोकाः शूरा वीराश्चासन् ।

खट्टरकाकाः—न हि, न हि मूर्खा मन्दधियो बभूवुरित्युच्यताम् । रीतिर्नीतिर्मर्यादादिकं सर्वमस्मज्जीवनसौकर्यापेक्षया विहितमास्ते, न तु वयं तदपेक्षया स्मः सृष्टाः संसारेऽस्मिन् ।

अहम्—परन्तु स खल्वादर्शानां युगो बभूव । दृश्यताम्, तदानीमतिथिसत्कारस्य कीदृङ्महामहिमासीत् ।

खट्टरकाका भंगारसे शर्करां व्यामिश्रयन्तः प्रोचुः—अये, तदानीं ब्राह्मणतल्लजाः क्वचिदतिथित्वेन जग्मुस्तदा ते जाज्वल्यमानाग्निरूपा एव गच्छन्ति स्म । दृश्यताम्—"वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहम् ।" (कठोपनिषद्) अर्थात्—ब्राह्मणदेवताः साक्षात् प्रज्वलदग्निरूपा भवन्ति । तात्पर्यमेतद्यद्धि तेभ्योऽग्निस्वरूपेभ्यो ब्राह्मणेभ्यः समिधो वा भोजनादिकं वा तत्कालमेव सुलभं कर्तव्यमभूत् । नो चेत् गृहस्थानां कुशलं नासीत् । अतिथेरिच्छापूर्त्यवजातायां गृहस्थानां बालेषु, पशुषु च विपज्जालं निपतेत् । (इष्टापूर्ते पुत्रपशूंश्च सर्वान् एतय वृक्ते··· यस्यानश्नन् वसति ब्राह्मणो गृहे) अहो, क्व नु बतावमं शरीरम्, ततः पुनस्तस्यैवोदरस्यातितुच्छस्य पूर्तये नन्वेतावानेषः प्रपञ्चः । यदा शरीरस्य किमपि महत्त्वमेव नास्ति, तदा ते स्वचरणसेवां किमर्थमकारयन् ? अपरेभ्यस्तु 'अतिथिदेवो भव !' इत्युपादिदिशुः परं यदि कश्चित् पथभ्रष्टो विभ्रान्तो वातिथिस्तद्गृहं व्रजति स्म तदा ते क्रोधाध्मातास्तं 'गोघ्न' इति संज्ञया व्याजह्रुः अद्यापि संस्कृतभाषाकोषेष्वतिथिशब्दस्य पर्यायो 'गोघ्न' इत्युपलभेत नाम नूनम् !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहम्—खट्टरकाकाः, भवन्तस्तु सर्वमपि विचित्र-मत्यद्भुतमेवालपन्ति। तदान्ततः केन वा सिद्धान्तेन व्यवहर्तव्यम् ?

खट्टरकाकाः—नास्ते कोऽपि तादृशः सिद्धान्तो यो हि केवलं गतानुगतिकं वान्धानुकरणप्रायं व्यवहर्तव्यः स्यात् ?

अहम्—परन्तु 'सत्ये नास्ति भयं क्वचित् ?

खट्टरकाका—एतन्नन्वसत्यम्। सत्ये चापि भयं क्वचित्। यदि सन्निपातरोगिणे सत्यं तथ्यं च प्रोच्येत, तदा तदातङ्कादेव तस्य प्राणा विनश्येयुः। येन सिद्धान्तेन प्राणहानिर्मरणमेव निष्पद्येत स कस्मै व्रतोपयोगाय स्यात् ?

अहम्—'अधिकस्याधिकं फलम्' इति नीतेर्वचनम्।

खट्टरकाकाः—एतदपि चासत्यम्। यदि चेममेव हि सिद्धान्तं मत्वा व्यवहारः क्रियेत तदा महानेवानर्थः स्यात्।

अहं चकितो भूत्वापृच्छम्—तत्कथं, खट्टरकाकाः !

खट्टरकाकाः प्रोचुः—'अधिकस्याधिकं फलम्', तर्हि यद्योदनं घण्टापर्यन्तमधिकं पाचनाय चुल्यां संस्थापनीयम् ? सूपे द्विगुणमात्रायां लवणः प्रक्षेपणीयः ? चतुश्शेरप्रमाणं घृतं पेपीयेत ? अष्टौ भार्याः परिणेयाः किम् ? अये, इत्थ विधानि वचनानि तु 'रोचनार्था फलश्रुतिः !' इतिवत् केवलं वाग्व्यवहारायैव कथनाय श्रवणाय च भवन्ति।

अहम्—नीतिकाराः कथयन्ति-'श्वो मयूरादद्य कपोतो वरम्।' इतिवत् श्वः कर्तव्यं कर्माद्यैव क्रियताम्, अद्यतनं चाधुनैव सम्पाद्यतामिति।

खट्टरकाकाः—अयि भोः ! एतत् सर्वं मनोभ्रमः। मया श्वो मर्तव्यमस्ति, तर्हि किमद्यैव प्राणानुत्सृजेय ? आश्विने मासयेकोद्दिष्टं कर्तव्यमास्ते तत्किमस्मिन्नेव मासे कुर्याम् ? पञ्चवर्षानन्तरं कन्यकाया विवाहः कर्तव्योऽस्ति स किमस्मिन्नेव हायने विधीयताम् ? सायं शौचं कर्तव्यमस्ति, तदधुनैव कुर्यां किम् ? प्रत्येकं कर्मणि स्वबुद्धेरुपयोगः कर्तव्यः। केवलं गड्डुरिकाप्रवाहन्यायेनान्धानुसरणात् सिद्धान्तोपलब्धिरपि दुर्लभा स्यात्।

अथ खट्टरकाकाः भंगारसं निर्गाल्य बिन्दुद्वयं भूमावुत्सृष्टवन्तस्ततः पात्रमुद्धृत्योद्धृत्य सगटगटाशब्दं सर्वमपि तद्रसं पपुः।

अहमवदम्—काकाः ! मुख्यो विषयस्तु मया विस्मृतः। अद्य तावत् ब्रह्मपुर्यामष्टयाममखण्डकीर्तनं सम्पद्यमानं वर्वर्ति। तत्र चलिष्यन्ति किं भवन्तः ?

खट्टरकाकाः प्रोचुः—अयि भोः ! वने चौरव्याघ्रादिभ्यस्त्राणार्थं वृन्दवृन्दं सामूहिकं कीर्तनं क्रियेत तदा तु तस्य संगतिः कथमपि बुद्धिग्राह्या युक्तियुक्ता च भवेत्। परं त्वस्मिन् समये मध्येग्रामं सुस्फीतं प्रकाशभास्वरे दिवसे सगलास्फालमाक्रोशात् को लाभः ? अहं रामनाम जापे समाधिमातिष्ठेयं चेत्ततश्चौराः सर्वस्वमपहृत्य पलायेरन्।

अहमब्रुवम्—तथाखण्डहोमोऽपि च प्रवर्तमानोऽस्ति। बहूनि महाभाण्डान्यापूर्यापूर्य तत्र घृतमानीयमानमास्ते।

खट्टरकाकाः स्वशिर आहन्यमाना अवदन्—हा हन्त, हन्त ! बुद्धिमन्तः ! अये, यदा दीपशलाकाया अस्तित्व न बभूव, तदास्मत्पूर्वजा घृतं हुत्वा हुत्वाग्निं समजीवयन् इदानीं यदा दीपशलाका विद्यमानास्ते, तदा महापात्रभरितस्य प्रचुरस्य घृतविनाशस्य का नु व्रतावश्यकता ? सर्पस्तु संसृत्य संसृत्य ननु कुतो वा क्व नु जगाम, वयमद्यावधि तद्घर्षणरेखामेव ताडयन्तो मोदामहे। युगः परिवर्तितः, परिस्थितिः पर्यवर्तत, परन्तु वयं प्राचीनायाः संस्कृतेर्डिण्डिममाहन्यमाना मन्यामहे यद्वयं धर्मरक्षां कुर्वाणाः स्मः। धन्या, धन्यधन्या सैषा बुद्धिः।

खट्टरकाका भंगानिष्पेषणीं शिलां पाषाणं च गृहीत्वा तत उत्थाय प्रतस्थिरे।★

★सैषा कथा कहानीत्याख्याया हिन्दीमासिकपत्रिकायाः जनवरी ६० दिनस्याङ्कात् साभारमुद्धृत्य संस्कृतपाठकानां कृतेऽनुवादिता। —अनुवादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधानत्वम्

पूर्वानुवृत्तम्— मान्याः श्रीमोतीलालशर्माणः, मानवाश्रमः, दुर्गापुरा

एवमेव सिन्धुनदप्रान्ते आर्य्यायणस्य पूर्वीयसीमायां सरस्वतीनगरे, तन्नद्याश्च तटे वैज्ञानिकतत्त्वानां परीक्षणाय 'सूर्य्यसदनाख्यं' एकं बृहन्मन्दिरं विज्ञानभवनमपि तत्समयस्यापूर्वा कृतिरासीत्। तस्य विज्ञानभवनस्यार्द्धो भागो भूगर्भे, अर्द्धश्च भूपृष्ठे-इत्याश्चर्य्यमयी स्थितिः। विशुद्धपाषाणमयं तदिदं भवनं सूर्य्यप्रतिमा-युक्तमासीदित्यपि श्रूयते। सोऽयं सूर्य्यः पृथिवीतले निबिडान्धकारे—एकत्र स्थितः सन्नपि सर्वतः संवृतस्याप्यागारस्यास्य प्रातःकालमनु सायमन्तं प्राकृतिकसूर्य्यसत्तात्मके-अहःकाले प्रकाशित एवेति महदाश्चर्य्यमासीत्। अपि च तत्सूर्य्यचक्रं द्विधा-विभक्तमासीत्। तयोश्चैकं चक्रमुत्तरायणकालस्वरूपसमर्पकं षण्मासपर्य्यन्तमुदेतिस्म,-अपरञ्च दक्षिणायनस्वरूपसमर्पकं षण्मासपर्य्यन्तम्। तथाह्युक्तमभियुक्तैः—

चक्रद्वितये चैकं भवति निगूढं सदैकवद् ददृशे।
षण्मासैः पर्य्यायाद् दृष्टमदृष्टं बभूव तच्चित्रम्॥१॥

एतच्चक्रादस्ताद् भूमौ चक्रं समाहितं धरुणे।
ऊर्ध्वस्य सूर्य्यरश्मिग्राहि परीक्षास्ति तत्रैव॥२॥

तदेतत्सर्वं विज्ञानभवनरहस्यं—

यदयातं शुभस्पती वरेयं सूर्यामुप।
क्वैकं चक्रं वामासीत् क्व देष्ट्राय तस्थथुः॥१॥

द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः।
अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः॥२॥

ऋक्संहिता १०।८५।१५,१६।

इत्यादिरूपेण—ऋग्वेदस्य दशममण्डले साटोपेन निरूपितं दृष्टम्।

अपिच-ऋग्वेदे 'प्राचीसरस्वती'ति नाम्ना प्रसिद्धायाः, साम्प्रतं तु 'बालकशभील' इत्थं प्रतीताया नद्याः समीपे 'उत्तररूस' प्रान्ते स्वर्गधरुणाख्यमेकं विचित्रमिन्द्रादेशतो विनिर्मितमद्भुत शिल्पमासीत्। तत्र-अश्मापृश्निः, उक्षाः, समुद्रः, अरुषः, सुपर्णः—इत्येते पञ्चभावा विद्यन्तेस्म। अश्मापृश्निः कल्पितः सूर्य्य आसीत्। स एष सूर्यो धातुमये सप्तमुखयुते-एकाश्वे प्रतिष्ठितः सन् सदा प्रकाशितो देवेन्द्रस्य कीर्त्तिध्वजस्थानीय आसीत्। तस्यैतस्य स्वर्गधरुणस्य 'ब्रध्नस्य विष्टप' मित्याख्यस्य—

इन्द्रो दिवः प्रतिमानं पृथिव्या विश्वा
वेद सवना हन्ति शुष्णम्।
महीं चिद्द्यामातनोत् सूर्येण चास्कम्भ
चित् स्कम्भनेन स्कम्भनीयान्॥१॥

ऋक्संहिता १०।१११।५।

उक्षा समुद्रो अरुषः सुपर्णः
पूर्वस्य योनिं पितुराविवेश।
मध्ये दिवो निहितः पृश्निरश्मा
विचक्रमे रजसस्पात्यन्तौ॥२॥

ऋक्संहिता ५।४७।३।

इत्यादिरूपेण दशम—पञ्चम-मण्डलादिषु वैशद्येन निरूपणमिति तत्रैव द्रष्टव्यम्॥

आसीद्देवयुगे शिल्पविद्यायां चरमतां गता सुप्रसिद्धा मयजातिः। तारासुरसमये सामनामकः प्रसिद्धः शिल्पी मयवंशावतंसो भूप्रदेशे भिन्न-भिन्नप्रदेशेषु हिरण्य-रजत-लौहमयानि त्रीणि पुराणि निर्म्ममे। तान्येतानि पुराणि पुराणेषु मायापुराणीति निगद्यन्ते। तूरपर्वतस्य दक्षिणोपत्यकायां भौमत्रैलोक्याः पृथिवीलोके आयसं पुरम्, द्यु स्थाने-सौवर्णं पुरं, 'महीसागर' इति-पुराणेषु, 'भूमध्यसागर' इति साम्प्रतं, 'मेडिट्रे नियेन्सी' ति पाश्चात्येषु-प्रसिद्धस्य पश्चिमसागरस्य पूर्वतटेऽन्तरिक्षे राजतं पुरमासीत्। विद्युन्माली नामासुरो लौहपुरस्य, अम्बुजाक्षो राजतपुरस्य, तारकश्च सौवर्णपुरस्य-अध्यक्ष आसीत्। तिस्रोऽप्येताः पुर्य्यः प्रतिपुष्ययोगेऽन्योऽन्यं समवेता, एकीभूताः सत्योऽन्तरिक्षे विचरन्तिस्मेति महदाश्चर्य्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत एव च सैषा त्रिपुरसमष्टिः—'त्रिपुरी' नाम्ना प्रसिद्धिमागात्। आश्चर्य्यशिल्पप्रणीता निराधारमूर्ध्वं स्थातुं शक्या सैषा त्रिपुरी-अन्ततो महीसागरकूले-एव भगवता शङ्करेण विद्ध्वस्ता-सती समुद्रगर्भे विलीनेति तत एवारभ्य स एष महान् देवः-'त्रिपुरारिः' इत्याख्याभाक् सञ्जातः। त्रिपुरासुरं त्रिपुरं च विदीर्य्यास्मिन्नेव समुद्रतटेऽवभृथस्नानं कृतं तेन देवाधिदेवेनेति पुराणेष्वेतत्स्थानं सर्वतीर्थनाम्ना प्रसिद्धम्। ऐतिह्ये चैतत्स्थानमद्यापि 'ट्रिपुली' तिं-नाम्ना निगद्यते। स एष ट्रिपुलीप्रदेशस्त्रिपुरी-शब्दस्यैवापभ्रंश-इति मन्ये। तदेतत् त्रिपुरविज्ञानं तत्तद्ब्राह्मणविशेषेषु, मत्स्यादिपुराणेषु च वैशद्येन निरूपितं द्रष्टव्यम्।

इदमत्रावश्यमवधेयम्-यद् विद्यमानेष्वप्याविष्कारेषु तस्मिन् युगे—आविष्कारोपयोगविषये पूर्ण नियन्त्रणमासीत्। आविष्कारा अन्ततो घातकाः, अशान्तिकराः, उत्पातजनका एवेति मन्वानैर्महर्षिभिर्देवैर्वा तत्तद्देश—काल—पात्रविशेषेष्वेव ते ते—आविष्कारा नियती-कृता इत्यस्ति तेषां दूरदर्शिता। सैषा आविष्कारगाथा संक्षेपेण प्रदर्शिता।

अथ च भौतिकतत्त्वविज्ञानसम्बन्धेऽपि किञ्चित्—वक्तुमवशिष्यते। अद्यतना हि विद्वांसः हीट, लाइट-इलेक्ट्री-त्थं त्रीणि ज्योतींषि परिपश्यन्ति। तदिदं सर्वं ज्योतिर्विज्ञान-मस्माकं पदार्थविज्ञानकाण्डे-अग्नावेवान्तर्भूतम्। पूर्वोक्तास्त्रयोऽपि भावाः क्रमशः ताप-प्रकाशविद्युद्रूपा एव। तापलक्षणोऽग्निः तदिदं पार्थिवं ज्योतिः। प्रकाशलक्षणोऽयमिन्द्रः आदित्यो वा। तदिदं दिव्यं ज्योतिः। **'रूपं रूपं मघवा बोभवीति' 'इन्द्रो—रूपाणि करिक्रदचरत्'** इति हि महर्षयः प्राहुः। विद्युल्लक्षणो वायुः तदिदमान्तरीक्षं ज्योतिः। अग्निरेव घन-तरलबाष्पावस्थाभिरग्निश्च भवति वायुश्चेन्द्रश्चेत्युक्तं पूर्वम्। अग्नि—विद्युदादित्या एव त्रीणि ज्योतींषीति स्पष्टं—'प्रजापतिः **प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी'** इत्यादिरूपेण यजुःश्रुतौ। तत्र अग्निरनेकविधः—सत्याग्नि-देवाग्नि-आङ्गिरसोऽग्नि-प्राणाग्नि—भूताग्नि—पावकाग्नि—प्रहृताग्नि—आहृताग्नि—उद्धृताग्नि—संहृताग्नि—भेदतः। वायुश्च-अङ्गभेदेन एकादशविधः। त एते रुद्राः। रुद्रवायोः सप्तविधा मरुन्नामानो वायव उत्पद्यन्ते। तथा-चोक्तं—'मरुतो रुद्रपुत्रासः' इति। सप्ताप्येते मरुद्वायवः-इन्द्रप्रवेशात्-प्रत्येकं पुनः सप्तसप्तावयवा इति कृत्वा एकोनपञ्चाशत्संख्याका भवन्ति। तैश्च समीरणाख्यस्त्वगिन्द्रियेण प्रत्यक्षीकृतः स्थूलवायुर्वातनामा उत्पद्यते योगजः। **'वात आवात भेषजम्'** इति हि वैज्ञानिका आहुः। युवारेव ऋतधर्म्मेण विद्युत्प्रवर्त्तकः। आपः—वायुः—सोमाः—इत्येते ऋतभावाः। अहृदयमशरीरं ऋतमिति ऋतलक्षणम्। अप्—सम्बन्धादेव—वायुर्विद्युद्रूपे परिणतो भवतीति साधूक्तं—**'विद्युद्वा अपां ज्योतिः'** इत्येवंरूपेण यजुषा। सैषा विद्युत्—सौम्य, सौर, ध्रौव-भेदेन त्रिधा विभक्ता द्रष्टव्यास्मद्विज्ञानकाण्डे। तत्र सौरी-विद्युदेवेदानीं प्रकाशमानाऽवलोक्यते। सूर्य्यः खलु आपोमये पारमेष्ठ्यसमुद्रे गर्भीभूतोऽश्वमूर्त्तिः। अनेनैवाश्वमूर्त्तिना सूर्य्येणाश्वमेधयज्ञस्य स्वरूपनिष्पत्तिरित्यभिप्रेत्यैवाह वाजिश्रुतिः—

"एष वा अश्वमेधो य एष तपति। तस्य संवत्सर आत्मा। अयमग्निरर्कः। तस्येमे लोका आत्मानः। तावेतावर्काश्वमेधौ। सा उ पुनरेकैव देवता भवति-मृत्युरेव। अप पुनर्मृत्युं जयति, नैनं मृत्युराप्नोति, मृत्युरस्यात्मा भवति, सर्वमायुरेति, आसां देवतानामेको भवति—य एवं वेद"—"असौ वा आदित्योऽश्वः। तेऽश्वं श्वेतं दक्षिणां निन्युरेतमेव-य एष तपति"।

सैषा प्रथमा विद्युत्सौरी। अन्या च ध्रुवनक्षत्रात् प्राणरूपेण विनिर्गता भूपिण्डाकर्षिणी 'ध्रौवविद्युत्'। पृथिवीतः पञ्चविंशतिसंख्याके महाव्रतनामकेऽहर्गणे प्रतिष्ठिता-आत्मज्योतिःप्रवर्त्तिका तृतीयान्या सौम्या विद्युत्। तत्सम्पादनायैव महाव्रताख्यं यज्ञकर्म सम्पादयन्ति यज्ञविदो वैज्ञानिकाः। सर्वं चैतद् विद्युत्प्रपञ्चमिन्द्रतत्त्वे—एवान्तर्भूतमिति कृत्वा आह—**'विद्युद्वा इन्द्र'** इति। विद्युदिन्द्रपरिज्ञानात् सर्वमिदं विज्ञातं भवति—इति हि कौषीतकिनः—आमनन्ति। यथाहि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"प्रतर्द्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च, पौरुषेण च। तं हेन्द्र उवाच–प्रतर्द्दन! वरं ते ददानीति। स होवाच प्रतर्द्दन त्वमेव मे वृणीष्व, यं त्वं मनुष्याय हिततमं मन्यसे इति। त–हेन्द्र उवाच–एतदेवाहं मनुष्याय हिततमं मन्ये, यन्मां विजानीयात्। प्राणोऽस्मि प्रज्ञात्मा। विद्युद्धेन्द्रः इति।

स एष इन्द्रपदार्थः–उत्तेजनाक्रमणस्तम्भननियन्त्रणोत्कोषणोत्क्रमणभेदादनेकधा विभक्तः। रूपाणामधिष्ठाता, विभक्तिभावात्मकस्य व्याकरणस्य सञ्चालकः, आयुः प्रवर्त्तकः, गतितत्त्वसञ्चालकः आसुप्राणविनाशकः सोऽयमिन्द्रः कर्म्मभेदादनेकधा विभक्तः सन् पृथक् पृथङ् नामरूपैर्व्याख्यायते तत्र तत्र श्रुतिषु। सर्वभूतप्रवर्त्तकस्य मर्त्याकाशस्य-आलम्बनभूतः, प्राणात्मको योऽयममृताकाशरूपः सर्वव्यापक इन्द्रः सोऽयं 'शुन' नाम्ना ऋग्वेदे प्रथितः। अस्मिन् महावकाशे तस्यैव विद्यमानत्वात् तत्स्थानं 'शुने हितम्' इति निर्वचनेन 'शून्य' मिति निगद्यते। नायं शून्यशब्दः पदार्थाभावबोधकः। अपितु-शुनेन्द्रमयः स प्रदेशः, इत्येव व्याचष्टे शून्यशब्दः। तमेतं शुनमिन्द्रं निरूपयन्नाह महर्षिः—

शुनं हुवेम मघवानमिन्द्रमस्मिन्
भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं
वृत्राणि सञ्जित धनानाम्॥

ऋक्संहिता १०।८६।१८

यथाहि—निरुक्तविज्ञानक्रमेण-'सुन्दर' शब्दः सुद्दर-सुत्थर-सुथर-इत्येवं विविधरूपेषु परिवर्त्तमानः साम्प्रतं प्रान्तीयभाषायां '**सुथरा**' इत्येवं रूपेण परिणतो दृश्यते, तथैव सोऽयं सर्वव्यापकतत्त्वावबोधकः-इन्द्रशब्दोऽपि क्रमेण 'इन्दरः' 'इत्थरः' इत्येवंरूपेण परिणतः सन् '**ईथर**' भावे परिणतो जात इत्यनुमातुं शक्यते। पाश्चात्येषु 'ईथर' नाम्ना प्रसिद्धः पदार्थः सर्वत्र व्याप्तः। इन्द्रोऽपि प्राणशक्तिप्रदः–'**नेन्द्रादृते पवते धाम किञ्चन**' इत्येवंरूपेण सर्वत्र व्याप्त इति कृत्वा मन्ये योऽयमस्माकमिन्द्रपदार्थः, स एव तेषां 'ईथर'-इत्येतत् सर्वं रहस्यं परीक्षासाध्यं विज्ञानम्।

पाश्चात्यविदुषा श्रीन्यूटनमहोदयेन योऽयमाकर्षणसिद्धान्तः, केन्द्रापकर्षिणी विद्या वा आविष्कृता, सैषा पूर्वमेवाविष्कृता वेदपुरुषेण। केन्द्राधीनमेव वस्तुनः सत्ता। केन्द्रविच्युतौ सर्वं विच्युतं भवति। तमेतं केन्द्रविद्यारहस्यमाकर्षणसिद्धान्तं वा प्रतिपादयन्नाह वेदपुरुषः—

प्रजापतिश्चरति गर्भेऽन्तरजायमानो
बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह
तस्थुर्भुवनानि विश्वा॥

—यजुःसंहिता

सर्वं चेदमस्माकं पदार्थविज्ञानं बलतत्त्वाधीनमेव। बलानां सम्बन्धतारतम्यादेव सर्वमुत्पद्यते, विनश्यति च। तदिदं बलं स्थिरधर्म्मप्रयोजकं, अस्थिरधर्म्मप्रयोजकं, सव्यपेक्षधर्म्मप्रयोजकमिति कृत्वा प्राधान्येन त्रिविधम्। स्थिरधर्म्मास्तत्र प्रथमाः—भारः, आयतनम्, स्थानविरोधः, विभाज्यता, सान्तरत्त्वम्, सङ्गठनम्, स्थितिस्थापकत्त्वम्, चापनम्, जड़त्त्वम्, अविनश्वरत्त्वमित्येवं रूपेण दशविधाः। द्वितीयाश्चास्थिरधर्म्माः–शैत्यं, आकुञ्चनं, कठिनत्त्वं, वर्णरूपत्त्वम्, क्षणभङ्गुरत्त्वं, घनत्त्वं, द्रवत्त्वं, विरलत्त्वमित्येवंरूपेणाष्टविधाः। तृतीयाश्च सव्यपेक्षधर्म्माः–नोदनाबलं, केन्द्रापगबलं, आकर्षणबलमिति कृत्वा त्रिविधाः प्रत्येतव्याः।

तत्र तावन्नोदनाबलं प्रथमं—गतिबलं, बलोपनिषत्, समदिग्बलम्, नानादिग्बलम्, प्रतिदिग्बलमित्येवं पञ्चविधम्। आकर्षणबलञ्च—वस्त्वाकर्षणं, व्यवकलिताकर्षणं, माध्याकर्षणं, रासायनिकाकर्षणं, आणविकयोगाकर्षणं, सन्निकर्षबलं, अनुलग्नताबलं, संसक्तबलं, कैशिकबलं, शोषणं, चोषणमिति कृत्वा दशविधम्। सोऽयमाकर्षणसिद्धान्तो विशदीकृतः सिद्धान्तशिरोमणिकर्त्रा श्रीमता भास्कराचार्य्येणापि। तथाहि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूप्यकमेकं क्व गतम् ?

दीनानाथत्रिवेदी 'मधुपः' जयपुरम्

यया रीत्या कृतः प्रश्नो वर्तते विदुषां मुदे ।
तस्याऽधुना समाधानं तया रीत्या विधीयताम् ॥

आसन् त्रयः सखायः । एकदा भोजनार्थं ते भोजनालयमेकमगच्छन् । तत्र त्रिभिरपि तैर्यथेष्टं भुक्तम् । तदनन्तरं तत्रत्यः परिचारकः समागत्य १५ पञ्चदशरूप्यकाणां भोजनमूल्यसूचकपत्रं (बिल) तेषां पुरतः समुपास्थापयत् । तद्विलोक्य ते त्रयोऽपि पञ्च पञ्च रूप्यकाणि तस्मै सेवकाय प्रायच्छन् । एवं स भृत्यस्तानि पञ्चदशरूप्यकाणि समादाय स्वस्वामिने दातुमुद्यतोऽभूत् । तदा तस्य प्रभुणा भणितम्—रे तेभ्यस्त्रिभ्योऽपि केवलं दशरूप्यकाण्येव ग्रहीतव्यान्यासन्, कुतः पुनस्त्वया पञ्चदश गृहीतानि । अतः पञ्च रूप्यकाणि तेभ्यः प्रत्यावर्तनीयानीति ।

तथेत्युक्त्वा स सेवको रूप्यकपञ्चकमादाय तेषु द्वे रूप्यके तु स्वयं स्वस्यैव पार्श्वपुटके (पाकिट) रक्षितवान् । शेषाणि त्रीणि रूप्यकाणि च विभज्य तेभ्यस्त्रिभ्यः एकैकं प्रत्यावर्तितवान् ।

एवं त्रयाणामपि तेषां मित्राणां पञ्च-पञ्च-रूप्यकाणां पूर्वं व्ययः समजनि किन्तु यदैकमेकं रूप्यकं—भोजनालयाध्यक्षेण प्रत्यावर्तितं—तैस्त्रिभिरपि पुनर्लब्धं तदा तेषां पार्श्वतः एकैकस्य मित्रस्य चतुर्णां चतुर्णां रूप्यकाणामेव व्ययो जातः । एवं योगेन केवलं द्वादश रूप्यकाण्येव व्ययितानि जातानि, रूप्यकद्वयञ्च भृत्येन गृहीतम् । इत्थं सर्वयोगेन च सर्वाण्यपि रूप्यकाणि चतुर्दशैव भवन्ति । रूप्यकमेकं कुत्र गतम् ।

आकृष्टशक्तिश्च मही तया यत्
खस्थं गुरु स्वाभिमुखं स्वशक्त्या ।
आकृष्यते तत् पततीव भाति
समे समन्तात् क्व पतत्वियं खे ॥

एवं सति कः खलु आकर्षणसिद्धान्तस्य प्रथमद्रष्टेति त एव पाश्चात्यद्रष्टारः प्रष्टव्याः । अन्यानि च पदार्थविज्ञानसम्बन्धे—ऋषिविज्ञानम्, पितृविज्ञानम्, देवताविज्ञानम्, गन्धर्वविज्ञानम्, पशुविज्ञानमित्यादीनि—अनेकानि खण्डविज्ञानानि । ऋषितत्त्वं प्राथमिकं, ततः पितॄणां विकासः, ततो देवाश्चासुराश्चोभये प्राजापत्याः । एतैरेव पदार्थैः सम्भूय भौतिकपदार्थानां स्वरूपनिष्पत्तिः क्रियते—इत्याह भगवान् मनुः—

ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः ।
देवेभ्यश्च जगत् सर्वं चरं स्थाण्वनुपूर्वशः ॥

सोऽयं पदार्थतत्त्वसम्बन्धी प्रथमः प्रस्तावः संक्षेपेण प्रदर्शितः । —क्रमशः

शोकसंवादः—हा हन्त, न केवलं राजस्थानस्यापितु भारतस्य विभूतिभूतो वेदविज्ञानमार्तण्डो वेदवीथिपथिकः पं० श्री मोतीलालशास्त्री २० सितम्बरदिवसे हृद्रोगवशात्स्वर्गवीथिपथिकोऽभूदिति संवादं ददतो वयं महान्तं शोकभारं बिभृमः । श्रीशास्त्रिमहोदयो भारतीयसंस्कृतेर्वैदिकसाहित्यस्य चाधिकारी विद्वानासीत् । विद्यावाचस्पतिश्रीमधुसूदनओझामहाभागस्य मुख्यशिष्यस्यास्य "वेदस्य सर्वविद्यानिधानत्व" मित्याख्यो धारावाहिको लेखो भारत्यां प्रकाश्यमानोऽस्ति । भगवानस्यात्मने शाश्वतीं शान्तिं प्रदेयात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खगोलवर्णनम्

पूर्वानुवृत्तम्

(ले० श्रीमल्लिनाथ चौमालः)

अथ ताराणां वर्णस्तत्सम्बन्धश्च

श्वेतारुणश्यामलपीतधूम्रा-
नीलादिवर्णा बहुशोऽत्र ताराः।
काश्चित् पृथक् चारभृताः परास्तु
संबद्धचाराः सुधियां प्रसिद्धाः ॥१६

अथ काश्चित्ताराः श्वेतवर्णाः काश्चिदरुणवर्णाः, श्यामवर्णाः, पीतवर्णाः, धूम्रवर्णाः नीलवर्णाः, एवं नानावर्णात्मिकास्ताराः सन्ति। तथाऽत्र बहुशस्ताराः पृथक् चारभृताः पृथक् २ गतिकाः, परास्तु संबद्धचाराः सन्ति। एवं ताराः सुधियां विद्वत्सु प्रसिद्धा सन्ति। अत्रैतदुक्तं भवति। न हि सर्वा एव तारा एकवर्णात्मिकाः, नहि च केवलं पृथक् चारभृताः, नहि च सम्बद्धचाराः, किन्तु ता नानावर्णात्मिका काश्चित् पृथक् गतिकाः, काश्चित्सम्बद्धगतिकाः सन्ति। यथा मृगशिरानक्षत्रस्योत्तरपार्श्वे या तारा सा रक्त वर्णा या दक्षिणपार्श्वे सा नील वर्णा। एवं सर्वेषु व्यूहेषु नानावर्णाः। यथा सप्तर्षिमण्डलस्य पंचताराः सम्बद्धचारभृतास्तथाऽन्ये द्वे तारेऽपि मिथः सम्बद्धचारे। तथा पञ्चानां पृथग्गतिः अन्ययोश्च पृथक्। एवमेव वशिष्ठाऽरुन्त्योरपि सम्बद्धगतिः।

अथ प्रकाशस्य गतिवेगः

तत्त्वेन्दुनागाशुगसंमितानि
प्रभासहस्राणि तु योजनानाम्।
कालेन सैषा विकलात्मकेन
चरत्युदग्रेण जवेन युक्ता ॥२०

सा एषा प्रभा प्रकाशः उदग्रेण जवेन युक्ता अतिवेगेन युक्ता विकलात्मकेन कालेन एकस्यां विकलायां तत्त्वेन्दुनागाशुग ५८१२५ सम्मितानि योजनानाम् सहस्राणि चरति गच्छति। अतोऽस्य वेगस्य किं कथनं स्यात्, अतीन्द्रियो वेगोऽयम्। तथापि विद्वद्भिर्निर्धारित एव।

अथवा सूक्ष्मा गतिः

सहस्रविघ्नाष्ट शराशुगानि-
प्रभाप्रमाणेन तु योजनानि।
कालस्य सैषा विकलात्मकेन
गच्छत्युदग्रेण जवेन युक्ता ॥२१

अथ प्रकाशस्य गतिर्वेगः। उदग्रेण अतिशीघ्रेण जवेन वेगेन युक्ता एवं प्रभा कालस्य विकलात्मकेन प्रमाणेन एकस्यां विकलायां सहस्रनिघ्नाष्टशराशुगानि ५५८००० योजनानि गच्छति। एकस्यां कलायाम् ३३४८०००० । एकस्मिन् दिने २००८८०००० । साधारणदृष्ट्या एकस्मिन् वर्षे प्रकाशस्य गतिः ७३३२१२०००००० वस्तुतस्तु प्रति वर्षात्मिका गतिरेषा पारमार्थिकी ७३३७२७८७-१०००। वर्षस्य ३६५।१५।२४।३० दिनादिकत्वात्। एषा योजनात्मिका प्रकाशस्य गतिः। भारतीय प्रमाणेन।

अथ भानां दूरत्वादीनाह

पद्मत्रयादप्यतिविप्रकृष्टा-
स्तारा भुवो या अतिसन्निकृष्टाः।
सांव्यब्धिवर्षैरतिविप्रकृष्टात्-
प्रभेति तारानिकरादिहास्मान् ॥२२॥

तद्विप्रकर्षातिशयात्प्रतापः-
प्रभापरं भूमिमुपैति ताभ्यः।
ज्ञातश्च सूर्यस्य ततो ग्रहादे-
र्न तारकाणामतिविप्रकर्षात् ॥२३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि ताराणां दूरत्वं ज्ञातुं न शक्यते,तथापि विद्वद्भिर्यन्निर्धारितं तदाह । यास्तारा भुवोऽति सन्निकृष्टा अत्यन्तं समीपास्ताः पद्मत्रयादपि अतिविप्रकृष्टा अधिकदूरस्थाः । ता अति निकटतमस्थाभ्यस्ताराभ्योऽपि, अतिविप्रकृष्टाद्धेतोरिह पृथिव्यां अस्मान् प्रति प्रभा सांघ्र्यब्धिवर्षैः सपादचतुर्भिर्वर्षैरेति भूमिमायातीत्यर्थः । सांघ्रिचतुर्भ्योऽपि वर्षेभ्योऽधिकसमयेन तारानिकरादतिसन्निकृष्टात् प्रभा भूमिमेतीत्यभिप्रायः ॥२२॥ तस्मादेव विप्रकर्षातिशयात् , अत्यन्तदूरत्वात् ताभ्यस्तापो भूमिं नोपैति, परं प्रभा भूमिमुपैति । सूर्यस्य तापो ज्ञातः । परन्तु अतिविप्रकर्षात् तारकाणां तापो न ज्ञातः । यद्यपि तारकाणामपि तापोऽनुमानाज्ज्ञातस्तथापि साधारणमनुष्याणां सूर्यतापवत् प्रत्यक्षं न भवतीत्यर्थः । अत्रैतदुक्तं भवति तारा निकटे या भूमिसमीपतरास्ता अपि पद्मत्रयादपि अधिकदूरस्था अतो दूरस्थानां तु का कथा । अत्र मृगव्याधमण्डलस्य या स्थूलतरास्तारा यां च लुब्धक इति कथयन्ति, सा तारा सर्वाभ्यस्ताभ्यो निकटतमा निश्चिता । मृगव्याधस्य पृथिवीतो योजनात्मकमन्तरम् च ३१२५०००००००० एतन्निश्चिम । अत एतदन्तरे प्रकाशस्य वार्षिकगत्या भक्ते $\frac{३१२५००००००००}{७३३२१२००००००} = ४\frac{१}{५}$ लब्धानि सपादचत्वारि वर्षाणि । स्वल्पान्तरत्वात् । वस्तुतस्तु अस्मादप्यधिकः समयो लगति । मृगव्याधात् यदि अद्य प्रकाशश्चलेत् तदा स पृथ्वीं प्रति सांघ्रिचतुर्वर्षानन्तरमागमिष्यति । स्वातिनक्षत्रस्य या भास्वत्तारा तस्याः दूरत्वम् पृथिवीतः १४६४१७४०० ००००००० सार्धजलधितुल्यम् । एतस्मिन् प्रकाश गत्या भक्ते लब्धानि $\frac{१४६४१७४००००००००}{७३३२१२००००००} =$ २०० द्विशतवर्षाणि । यदि स्वातितोऽद्य प्रकाशस्य चलनं भवेत्तदा पृथिव्यवधि आगमने द्विशतानि वर्षाणि लगन्ति । अतोऽमीषां दूरत्वं न हि बुद्धिग्राह्यम् । अतीन्द्रियमेव । एवमेवानेकासां ताराणां दूरत्वं निश्चितं विद्वद्भिः । स्वातिनक्षत्रस्य द्रष्टव्यो व्यासो यश्च योजनात्मक प्रमाणेन ८०००००० एतन्मितोऽस्ति । यश्चास्मदीयसूर्यस्य व्यासस्यैकसप्ततिगुणः । तथास्य घनफलम्-अस्मदीयसूर्यस्य घनफलात् ३५५००० एतदधिकम् । अतः स्वातिनक्षत्रस्य तारा अस्मदीयसूर्याणां सार्धत्रिलक्षाणां तुल्या । लिखितं च शास्त्रे प्रलयकाले द्वादशसूर्यास्तपन्तीति,परमिह तु सार्धत्रिलक्षसूर्याः अतः किं वक्तव्यमस्य तापस्य । एकेन केनचिद्विदुषा स्वातिभस्य तापं ज्ञातुमित्थं प्रतिपादितम् । यदि सौरचक्रस्य सर्वे ग्रहा उपग्रहाश्च स्वातिभं परितस्तथा स्थापिताः कार्याः, यथा सूर्यपरितः स्थिताः सन्ति । तदा बुधस्तु एतादृश आकृष्टो भविष्यति यश्च स्वातिभस्याभ्यन्तरे ३१२५०० एतैर्योजनैः प्रवेशं करिष्यति । शुक्रपृथिव्योरपि सैव गतिर्भविष्यति या अग्निपर्वतस्यान्तिके लघुतमस्य तुषारखण्डस्य भवति । एवं प्रजापतिव्यूहस्य ब्रह्महृदयाख्यतारायाः व्यासः १७५०००० योजनमितः । ब्रह्महृदयोपि, ४००० चतुः सहस्रसूर्यैस्तुल्यः । अतः एतेषां महतामपि महतां सूर्याणां परब्रह्मण एव ज्ञानम् । मानवबुध्याऽग्राह्य-विषयः । अस्माकं स्वकीयसूर्यस्य पृथिव्याश्चाभिमानं यदिमौ महान्ताविति । परन्तु विचारदृशा प्रतिभात्येतत् , वस्तुतोऽस्मदीयसौरचक्रमस्मिन्नाकाशे रजःकणादपि लघुभूतम् ।

इमास्ताराः प्रायःसूर्याश्चलाश्च
स्वयं प्रकाशा निरपेक्षचाराः-
सूर्या असंख्या निजमण्डलस्य ।
केन्द्रस्वरूपा विचरन्ति तेषां
ताराख्यया सर्वजने प्रसिद्धिः ॥२४॥

जवाच्चरन्तोऽपि विहाय सीमे-
तापप्रकर्षात् प्रचुरप्रकाशाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान हस्तकला का केन्द्र है

राजस्थानी कला के नमूने खरीदकर अपने घरों को सुशोभित कीजिये

तथा

गृह उद्योगों को प्रोत्साहन दीजिये

★ हाथी दांत के खिलौने
★ लाख व नगीनों के कंगन
★ बंधाई व छपाई के स्कार्फ
★ जोधपुर की बनी शीतल जल की झारियां
★ चन्दन की लकड़ी के खिलौने
★ रंगीन एवं बंधेज की साड़ियां
★ पक्के रंग की चादर
★ लकड़ी एवं खश की बनी वस्तुएं
★ कलापूर्ण सामान
★ नीले व सफेद पाटरी के सामान
★ आकर्षक नमूने की दरियां
★ सांगानेरी रंगाई व छपाई के वस्त्र इत्यादि
★ उदयपुर के सुन्दर लकड़ी के खिलौने
★ जयपुर की कशीदा की हुई जूतियां व जूते
★ जयपुर की प्रसिद्धि-प्राप्त चूड़ियां व चूड़े
★ कोटा के सुन्दर डोरिये

प्रत्येक सरकारी विक्रय केन्द्र पर प्राप्त

राजस्थानी हस्तकला के नमूने अन्तर्राष्ट्रीय प्रदर्शनियों में भी ख्याति प्राप्त कर चुके हैं

राजस्थान हैण्डीक्राफ्टस एम्पोरियम
क्वीन्स वे लेन, नई दिल्ली

राजस्थान हैण्डीक्राफ्टस एम्पोरियम
जयपुर, जोधपुर व उदयपुर

राजस्थान राज्य द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अंग्रेजीभाषा भारतीयस्यात्मनोऽभिव्यक्तेर्न जातु साधनम्

केन्द्रीयसूचनामन्त्रिणो डा० श्रीकेसकरमहोदयस्य 'हिन्दीदिवससमारोहे' नवदेहल्यां मार्मिकमभूद् भाषणम्। तेन हि सोपपत्ति समर्थितं यद् वैदेशिकी सेयमिंगलिशभाषा भारतीयस्य आत्मनः, संस्कृतेर्वा अभिव्यञ्जनस्य न भवितुमर्हति साधनम्। यद्यपि वर्तमानकाले आङ्गलभाषा यथाकथंचित्कार्यनिर्वाहिका (कामचलाऊ) विद्यते, किन्तु निकटभविष्यत्येव तत्स्थाने काचिद् भारतीया भाषा स्थापयिष्यते। तत्स्थानं 'हिन्दी' एव ग्रहीतुं योग्या। "सा अन्यान्यासु भाषासु श्रेष्ठा" इति न, किन्तु "सा अतिसरला, समग्रे भारते प्रचरिता, प्रचारयितुं शक्या च इत्येव कारणम्।

तदिदं सर्वैः संमतं यद् यदि देशस्यैकता संरक्षणीया तर्हि मिथो व्यवहारे, राजकीयकार्येषु च भाषापि काचिदेकैव रक्षणीया। हन्त तदिदं दुर्भाग्यमेवाऽस्माकं यत् साम्प्रतं विवशतया एका विदेशीया भाषा एकतासूत्रस्य सम्बन्धनार्थमस्माभिराश्रिता। अनेन नेदं कश्चिद् जानातु यदहम् आङ्गलभाषायास्तत्साहित्यस्य वा विरोधी अस्मि। किन्तु वयं सर्वदार्थं काञ्चिद् विदेशीयां भाषां राष्ट्रभाषासिंहासने न स्थापयितुमर्हामः। यतो हि न तया भारतीयस्यात्मनः, संस्कृतेर्वा अभिव्यक्तिर्भवितुमर्हति। स्वर्गीया सरोजिनी नायडू आंग्लभाषायाः साधीयसी कवयित्री आसीत् किन्तु अंग्रेजीसाहित्यस्याभ्यन्तरे न कुत्रचित्तस्याः स्थानम्। यदि तत्परिवर्ते सा यदि देशीयभाषायां परिश्रममकरिष्यत्, तर्हि न केवलं भारते एव, अपि तु संसारमात्रे तस्याः ख्यातिरभविष्यत्।

हिन्दीभाषाया विषये अहिन्दीभाषिणः प्रान्ताः संदेहं वहन्ते, भयं च प्रदर्शयन्ति, किन्तु तस्य अपाकरणं कर्तव्यं भविष्यति। अहिन्दीभाषिषु प्रान्तेषु हिन्दीप्रचारकार्यम्, अहिन्दीभाषिणामेव हस्ते समर्पणीयं भवेत्। एवं कृते हिन्दीविरोधः स्वयमेव दूरे भवेत्। यदि च केचिद् विरोधिनोऽपि भवेयुस्तर्हि तेषां संख्या न

स्थिरा इवेद्यन्त उदीर्णवेगाः—
पोता इवांभस्यतिविप्रकर्षात् ॥२५॥

ये च स्वयं प्रकाशा न हि च चन्द्रवत्तेषां प्रकाशकोऽन्यः। कश्चित् निरपेक्षचारा न हि च ग्रहवत्तेषां चरणं सापेक्षम्। इमे सूर्या आकाशेऽसंख्या अनेके सन्ति। ते च निजमण्डलस्य स्वकीयग्रहचक्रस्य केन्द्रस्वरूपा विचरन्ति गच्छन्ति, तेषां सूर्याणां सर्वजनेषु ताराख्यया ताराः इति नाम्ना प्रसिद्धिः। इमे सूर्यास्तपप्रकर्षात्तापाधिक्यात प्रचुरप्रकाशा, विहायसि आकाशे, जवात् अति वेगात्चरन्तो गच्छन्तोऽपि अतिविप्रकर्षात्, उदीर्णवेगा अम्भसि पोता इव स्थिरा ईद्यन्ते। अत्रैतदुक्तं भवति। इमास्ताराः प्रायः सूर्या एव अस्मदीय-सूर्यवत। तथा सर्वा गच्छन्त्येव, परन्तु जवाच्चरन्त्योऽपीमाःअतिविप्रकर्षात् अत्यन्तदूरत्वात् स्थिरा इवेद्यन्ते। यथोदीर्णवेगाः पोता अत्यन्तदूरस्थिता जले समुद्रस्य जलेऽति वेगेन गच्छन्तोऽपि किंचित्समयपर्यन्तं स्थिरा इव भान्ति। तथैवेमास्तारा अपीति ज्ञातव्यम्। स्वातिनक्षत्रं प्रति विकलायां सेकेण्डेति प्रसिद्धायां पंचाशद्योजनानि गच्छति। रोहिणीनक्षत्रं प्रतिवण्टायां चतुर्योजनतुल्यम् अस्मत्तो दूरं याति एवं सहस्त्राणि नक्षत्राणि गच्छन्ति। सप्तर्षिमण्डलस्य तारकाणां चलनं तु प्रागभिरपि प्रतिपादितम्। परं तत्र पञ्चतारकाणां गतिः सम्बद्धा। तथैव द्वितारकयोरपि। वशिष्ठारुन्धत्योस्तु सदैवागमनं भवतीति विद्वद्भिर्निश्चितम। इति श्रीगोलनवांकुरे भगोलाध्यायो द्वितीयः।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्चित् गणनीया भवेत्। न च ते हिन्दीप्रचारं रोद्धुं शक्नुयुः।

शिक्षायां सुविधा

एतदनन्तरं लोकसभाध्यक्षः श्रीअनन्तशयनम् अय्यङ्गारः समभाषत—'हिन्दी एव अस्माकं राष्ट्रभाषा' इति सर्वैः स्वीकृते, अस्माकमग्रिमं कर्तव्यं भवेद् यत्तस्याः शिक्षणे अस्माभिः सर्वविधा सुविधा सम्पादनीया। सा च लोकप्रिया आपादनीया। समारोहाध्यक्षो राजस्व मन्त्री श्री बी० गोपालरेड्डीमहोदयः समभाषिष्ट यत्प्रत्येक-हिन्दीभाषिणा मेयं प्रतिज्ञा कर्तव्या स्याद् यदहं लोकानां हिन्दीशिक्षणे प्रचुरं सहायतां कुर्यामिति। तदनन्तरं स हि हिन्दीपरीक्षामुत्तीर्णवद्भ्यो विद्यार्थिभ्यः प्रमाणपत्राणि व्यतरत्। समारोहेऽस्मिन् श्री के० सी० रेड्डी, श्रीनन्दा, श्रीजगजीवनरामप्रभृतीनां शुभकामना संदेशाश्च समपठ्यन्त।

भारतस्य सत्यहितैषिणः संप्रति संप्रसीदेयुर्यत् पश्चिमदेशीयभाषाभ्यो लब्धव्युत्पत्तिका अपि महाभागाः साम्प्रतं स्वदेशीयभाषाया महत्त्वं परिचिन्वन्ति। तद्दिनमदूरे यस्मिन् सर्वेऽपि भारतीयाः शिक्षिताः संभूय हिन्दीभाषया, तदनन्तरं तज्जनन्या संस्कृतभाषया च भारतस्य वास्तवं हितं संपाद्य यशस्विनः, पूर्ववत्सर्वेषां च शिक्षका भविष्यन्ति। चराचरनायकः संपादयतादचिरादेव तदिदं समीहितमिति किं नाम विस्तरेण ?

तृतीयायां 'पञ्चवर्षीययोजनायां विशेषः

भारतस्य शासनकर्णधाराः 'पञ्चवर्षीयां योजनां' राष्ट्रस्य सर्वसम्मत्या निर्धार्य तदनुसारमग्रे देशस्य परिष्कारं, समुन्नतिं च सम्पादयन्तीति विदितमेव देशस्य वृत्तान्तविदां पाठकानाम्। अद्यावधि पञ्चवर्षीययोजनाद्वयं निर्धारितं, तदनुसारं भारते कृषिविज्ञानादीनां प्रचारश्च प्रक्रान्तः। इदानीं द्वितीया योजना सेयं समाप्ता। तृतीयायां योजनायां किं किं समावेशयितव्यमिति शासकानां विचाराः प्रचलन्ति। तदनुसारं तृतीयाया योजनायाः 'पाण्डुलिपिः' 'मसविदा' सम्प्रति प्रस्तुता। अस्यां योजनायां भारते 'वैज्ञानिकी, प्राविधिकी' (तकनीकी) च शिक्षां प्रधानतया स्वीक्रियेत, इति सोयं प्रथमावसरः। वैज्ञानिकशिक्षा सेयं परिचाल्येत सुविधानुसारमेतदर्थम् 'अखिलभारतीयवैज्ञानिकशिक्षापरिषत्' अपि सर्वराष्ट्रसंमत्या संस्थाप्येत।

भारते वर्तमानकाले १८६०० अष्टादशसहस्र-संख्याकाः माध्यमिकविद्यालयाः (हाईस्कूल, हायरसेकेण्डरीस्कूल) सन्ति। तेषां द्वादशसहस्रसंख्यकेषु विद्यालयेषु विज्ञानस्य शिक्षा दीयेत, इति नवीनपाण्डुलिप्यां स्थिरीकृतम्। द्वितीयपञ्चवर्षीययोजनायाम्, अद्यावधि प्रतिशतं त्रिंशत् विद्यार्थिनो वैज्ञानिकशिक्षां प्राप्नुवन्ति किन्तु तृतीयायामस्यां योजनायां प्रतिशतं चत्वारिंशत् विद्यार्थिनो विज्ञानशिक्षां प्राप्तुं प्रभवेयुरिति दृढयोजना। विश्वविद्यालयेषु संप्रति नवलक्षमिताः शिक्षार्थिनः सन्ति, तेषु केवलं १४००० चतुर्दशसहस्रविद्यार्थिनः स्नातकोत्तरकार्यं कुर्वन्ति। द्वितीययोजनायां एतेषां संख्यायां केवलं चतुःशतानां (४००) वृद्धिरभूत्। अतएवं सर्वदृष्ट्या निर्धार्यते यत् स्नातकोत्तरकार्ये भारतराष्ट्रं सर्वतः पश्चात्पदम्। किन्तु तृतीयायामस्यां योजनायां सेयं संख्या प्रकामं वृद्धिमाप्नुयादिति कर्णधाराणां निश्चयः।

तृतीयायां योजनायां विज्ञानशिक्षायाः कृते पर्याप्ता धननीवी निर्धारिता। तृतीययोजनायामस्यां सामान्यशिक्षायाः कृते ३७० कोटिमुद्राव्ययो निर्धारितः, किन्तु केवलं विज्ञानशिक्षार्थं १३० कोटिमुद्राणां व्ययः साम्प्रतमेव स्वीकृतः। प्राचीनविद्यालयानां परिचालनाय १६० कोटिरूप्यकाणि व्यवस्थापितानि। अतः सर्वसारः सोयं यत् सामान्यशिक्षाकार्ये यावान् धनव्ययो निर्धारितः, तस्य तृतीयांशो वैज्ञानिकशिक्षायां प्राविधिकशिक्षायां च विनियुक्तो भवेदिति पाण्डुलिपेर्निश्चयः। (अत्रेदं बोध्य यत्—प्रथमपञ्चवर्षीययोजनायां सामान्यशिक्षायाः षष्ठो भागो वैज्ञानिकशिक्षायामासीद्विनियुक्तः। द्वितीयपञ्चवर्षीय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओरियण्ट पेपर मिल्स

निम्नलिखितानि वस्तूनि निर्मीयन्ते

बन्धनाय:-
(१) एम्. जी. रिब्ड क्राफ्ट
(२) एम्. एफ्. अनरिब्ड क्राफ्ट
(३) अक्लेद्य (वाटरप्रूफ) क्राफ्ट
(४) क्रेप क्राफ्ट

लेखनाय, मुद्रणाय च:-
(१) श्वेतपत्रम्
(२) क्रीमरङ्गस्य
(३) अर्धश्वेतीकृतपत्रम्
(४) अश्वेतीकृतं पत्रम्

आवरणाय-पेटकानां, पुटकानां च निर्माणाय कार्टनबोर्ड, ग्रेबोर्ड, डुप्लेक्स, ट्रिप्लेक्स, कार्त्रिज, टिकटबोर्ड, आवरणबर्ड प्रभृतिवस्तूनि निर्मीयन्ते।

ओरियण्ट पेपर मिल्स (सीमितम्)

प्रबन्धाभिकर्त्तार:-बिरलाबन्धव:[स्वतन्त्रम् सीमितम् बजरङ्गनगर, (उडिसा)

हरिनगर शूगर मिल्स लि०

*** फेक्टरी ***

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—
मर्यादा—रामनगर [चम्पारन]

प्रधानकार्यालय—
२०७, कालबादेवी रोड, बम्बई—२

दूरभाषयन्त्रम्-
'क्रिसूगर' [बम्बई]

निर्मातार:—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेनरक्षुगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तमानसमये संस्कृतस्योपयोगिता

(ले० प्यारेमोहनशर्मा, प्रधानाचार्यः संस्कृतविद्यालयस्य, खेतडी)

प्रायः जनाः कथयन्ति यद्वर्तमानकाले संस्कृतस्य दैनिकजीवने नास्त्युपयोगः। कथनमिदं समाश्रित्यैव हृदि नानाविधाः भावाः प्रादुर्भवन्ति। एतेषामेव भावानां यदा प्राचीनार्वाचीनप्रकाण्डपण्डितानां युक्तियुक्तैर्भावैः सामञ्जस्यं संस्थापयामः तदा करतलामलकवत् स्पष्टमिदं प्रतिभाति यत् संस्कृतस्य वर्तमाने जनजीवने तथैवास्त्युपयोगः यथा किल प्राक्काले।

भारतस्य प्राक्तनः समयः कीदृश आसीत् नास्ति साम्प्रतं तस्य महिम्नो वर्णनमावश्यकम्। परमेतावज् ज्ञान मावश्यकं यत् यदा वर्तमानसंसारस्य सभ्यतमाः देशाः सभ्यतायाः धूमिलां कल्पनामपि कर्तुं समर्था न आसन् तदानीमेवास्मिन् देशे सभ्यतायाः ज्ञानस्य च प्रचण्ड-भानुः स्वीयं प्रखरकिरणजालंप्रासारयत्। तदानीमेव भारतीया आबालवृद्धाः स्वात्मपरात्मज्ञाने सन्निपुणाः समभवन्। प्रज्वलितं प्रमाणमत्र विश्वस्य विदुषां लेखिनी-एव। चण्डभानोः तेनैव रश्मिजालेन तमोराशिसमाच्छादिते संसारे सभ्यतायाः मार्गः प्रकाशितः। परन्तु साम्प्रतं हिन्द्यामेका लोकोक्तिर्वर्तते यत् "गुरु तो गुड ही रह गये और चेले शक्कर बन गये।" इत्यनुसारं संस्कृतभाषायाः नास्त्युपयोगः इति डिण्डिमः समुद्घोष्यते।

संस्कृतभाषा एवास्माकं देशस्य प्राचीनतमा भाषा। अस्यामेव भाषायां मुनयो विद्वांसः कवयः सर्वे एव स्वीयमलौकिकं मेधामाधुर्यं समपूरयन्। तेषां विलक्षणं ज्ञानमस्यामेव भाषायां सन्निहितम्। तस्य ज्ञानं च संस्कृत-भाषायाः सम्यगध्ययनेनैव भवितुं शक्नोति। अपरं च भारतीयाः मन्यन्तां न वा, परं सर्वे लोकाः कथयन्ति यत् संस्कृतभाषा एव भारतस्य प्राचीनतमो निधिर्वर्तते। यदि चायमेवास्माकं निधिस्तर्हि किमस्माकं निधेर्ज्ञानमस्मत्कृते नापेक्षणीयम्?

वयं लोके विलोकयामो यत् यदि कस्यचित् परिवारस्य कश्चनपूर्वजः स्वीयं कमपि निधिं कुत्रापि गुप्त-स्थाने परित्यज्य देवलोकं प्रयाति तदा तदीयः परिवारस्तं गुप्तनिधिं परिमार्गयितुं यथाशक्यं पूर्णं यतते। तथैवास्माकं प्राचीनज्ञाननिधेरन्वेषणायास्माभिरपि सततं सोत्साहं यतनीयम्। पुनश्च प्राप्ते सति अस्मिन्, तद्ज्ञानधनमस्मत्कृते तथैवोपयोगि सेत्स्यति यथा किल तत्परिवाराय तद्धनम्। यद्यपि निधिर्वर्तते न वेति सन्देहस्तावत्कर्तुं शक्यते परं सन्देहवशात् चेत्तत्र प्रवृत्तिरेव न स्यात्तर्हि कथं नाम निश्चयः स्यात्। अपरं च खनिजपदार्थः यत्र कुत्रापि समुपलभ्यते। तत्र पूर्वमेव न भवति पूर्णो-निश्चयः, अपितु कठिनपरिश्रमपूर्वकं तत्र यत्नो विधीयते। पश्चादेव वाञ्छितप्राप्तिः।

यद्यपि धनेन साकमस्यास्तुलना नोचिता। यतो हि अस्यां निहितं ज्ञानधनं तदपेक्षयाधिकं लाभप्रदं समग्र-राष्ट्रस्योन्नत्यै च भविष्यति। परं सर्वतःप्रथममतीवतदावश्यकं यदस्योपादेयतायां विश्वसिमः। यतोहि यथा गुप्तधन-राशेरनिश्चयात्मके कालेऽपि तत्रात्यधिकमनोयोगेन कठिनपरिश्रमेण च कार्यकरणमावश्यकं, तथैवात्रापि। यावन्न संस्कृतस्य गहनतममध्ययनं क्रियते न तावत्प्राप्तुं शक्यते तदन्तर्निहितं ज्ञानधनम्।

योजनायां सामान्यशिक्षाव्ययस्य चतुर्थो भागः परिगृहीतोऽभूत्।

एवं विज्ञानशिक्षायाः कृते भारतस्य सर्वेऽपि शिक्षा-कर्णधाराः पूर्णप्रयत्नेन परिलग्नाः। युगानुकूला सेयं शिक्षेति को वाऽयस्या विषये प्रतीपं प्रतिपादयेत्। सर्व-सहायकश्चराचरनायकः संसाधयेदस्मत्समीहितमिति सर्वेऽपि शिक्षापक्षपातिनः परमेश्वरं प्रार्थयेरन्निति किं वाऽधिकविस्तरेण।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तमाने युगे विज्ञानस्य प्रभुत्वं, संस्कृते च विज्ञानं परिपूर्णमस्ति। परं निखिलमपि तदीयं विज्ञानं कपोलकल्पनामात्रं कल्पयित्वा हास्याय कल्प्यते। परं भवन्त एव विचारयन्तु यत् वायुयानानांमाविर्भावात् प्राक् संस्कृतग्रन्थेषु समागतं विमानवर्णनं काल्पनिकत्वेनैव मन्यन्तेस्म। तथा चन्द्रलोकसूर्यलोकयात्रामपि काल्पनिकत्वेनैवोररीकुर्वन्तिस्म। अद्य तत्सर्वं सम्मुखे दृष्ट्वापि कथं साम्प्रतमपि संस्कृतभाषायां वर्णितं तद्विज्ञानजातं मिथ्यात्वेन स्वीक्रियेत ? कथनस्यायमेव सारांशे यत् संस्कृते सर्वं सन्निहितम्। अतोऽस्मिन् वैज्ञानिके युगे तस्यान्वेषणं कृत्वा तेन जनजीवनं लाभान्वितं कर्तव्यम्। तदा स्वयमेवास्या उपादेयता सर्वेषां समक्षे समायास्यति।

भारतीयाः सप्तसु लोकेषु सर्वत्र यान्तिस्म। भारतीयानां सविधे नानाविधानि प्रक्षेपणसंहारास्त्राण्यासन्। सर्वं समायाति वर्णनं नानाग्रन्थेषु। परं तस्य पारिभाषिकं तथा प्रत्यक्षीयं ज्ञानमाप्तुं परमावश्यकमन्वेषणम्। सर्वमेतत्तदैव संभवितुं शक्नोति यदा भाषायामस्यामनुरागः समुद्भवेत्। यदि सर्वकारः सर्वं संसाधयेदित्यस्ति—अस्माकं दृढा विचारधारा तर्हि नाप्तुं शक्यते पूर्णं साफल्यम्। न हि सर्वकारः कमप्यापणपुरुषं कथयति यत् स स्वीयापणप्रचारात्मकं पत्रादिकमाङ्ग्लभाषायां लिखेत्। न चास्मान् कथयति यत् वयं स्वीयं नाम R. M. Sharma आदि रूपेणैव लिखेम, परमेषास्माकं पारतन्त्र्यसूचिका मनोवृत्तिः। अतोऽस्त्यावश्यकं यत् सर्वविधैरुपायैः सर्वस्य भारतीयस्य हृद्यनुरागमुत्पादयामः। यावन्न तथानुरागमुत्पादयिष्यामो, न तावात्किमपि भवितुं शक्यति।

संस्कृतस्योपयोगिता भारतीयजनजीवने पदे पदे परिलक्ष्यते। भारते सर्वत्र जन्मतः मरणपर्यन्तं सर्वमपि संस्कारजातं संस्कृतेनैव सम्पाद्यते। भारतस्य सर्वासां भाषाणां जननी एषैव। अनयैव पूर्यते राष्ट्रभाषायाः हिन्द्याः शब्दकोषः। भारतीयानां कृते चेयमस्ति मातृस्थानापन्ना। किं कोऽपि पुरुषः स्वीयवार्धक्यवलीपलितायाः मातुरनादरं कृत्वा, तस्याः निष्कासनं च कृत्वा परां रमणीं समाहृत्य सभ्यसमाजे सम्मानितं स्थानं प्राप्तुं शक्नोति ? साम्प्रतं रूसाद्याः सर्वे देशाः भारतं भर्त्सयन्ति। विजयलक्ष्मीपण्डितमहोदया यदा राजदूतरूपेण 'रूस' देशे गता तदा तत्र तया हिन्द्यां लिखितं स्वीयं राजदूतप्रमाणपत्रं समुपस्थापितम्। परं किञ्चित्कालानन्तरमेव तत्रत्येन केनाप्यधिकारिणा पृष्टं यदस्मिन् प्रमाणपत्रे हिन्दीभाषाया अशुद्धयः सन्ति, चेदाज्ञा स्यात्तर्हि संशोधयामः। इति निवेदिता सा तत्र स्वीयभाषादौर्बल्यं चाजानात्। किमिदं नास्ति गर्हणीयम्।

अतः स्पष्टं यत् यदि वयं संसारस्य सभ्यतमेषु देशेषु स्वीयं सम्मानितं स्थानमभिलषामस्तर्हि संस्कृतभाषायाः समुपयोगः प्रतिदिनं समधिकं कर्तव्यः। संस्कृतभाषायां संस्कृताः सन्तो भारतीयाः स्वीयं नैतिकं जीवनं पुनः प्राप्स्यन्ति। चरित्रनिर्माणे संस्कृतभाषया यादृक्षं साहाय्यमस्माभिः प्राप्तुं शक्यते न तादृक्षं केनाप्यन्येन मार्गेण। वर्तमानं जनजीवनं सर्वत्राशान्तप्रायं परिलक्ष्यते। तत्र हेतुः संस्कृतभाषायाः शिक्षणक्रमे अवहेलनैव। अतः संस्कृतस्य दैनिकजीवने सदुपयोगः सर्वदा कर्तव्यः। अस्याः सदुपयोगेनैवास्माकमभीष्टसिद्धिः सेत्स्यतीत्यलम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113545

लघुकथा

अवकरे पतितो हीरकः

—ले० श्रीकमलानाथशर्मा

अहं व्यापारकार्येण राजपुरात् धुंधुकाग्रामं गन्छन्नासम् । अतएव विद्युत्शकटि(बस)मारुह्य तस्मात् स्थानादचलम् । मम समीपस्थे आसने एव एको राजकीयो द्रव्यसंग्रहकर्ता अपि अतिष्ठत् । आवां वार्तालापे संलग्नौ अभूव, एतस्मिन्नेव समये साक्रोशः शब्दः कर्णयोरगच्छत्—"चाण्डाल ! शकटिमारोढुमिच्छसि, समीपे एकोऽपि पणो नास्ति । कस्मिन्नपि दिने त्वमपि मरिष्यसि, ममापि वेतनं हारयिष्यसि" । मया पृष्ठं परावृत्य दृष्टं—शकटेः सोपानोपरि एको दीनो बालको लम्बते, शकटिकर्मचारी च तं प्रतिषेधति" ।

शकटेर्घर्घराऽऽरवे बालकस्य शब्दो नाऽश्रूयत । किन्तु बालकोऽसौ किञ्चिद्वदति स्म । द्रव्यसंग्रहकर्ताऽपि तं बालकमपश्यत् । स हि सदयमवदत्—"अरे ! अयं तु स एव बालकोऽस्ति, येन मम वस्त्रादिभारः शकट्यामारोपितः" । तेन शकटिकर्मचारिणं प्रति प्रोक्तम्—"द्वारमुद्घाट्य अन्तर्नीयतां दीनोऽयं बालकः" ! कर्मचारिणा प्रत्युक्तम्–'एवंविधानां तिरस्कार एव योग्यः । अहम् अग्रिमे विश्रामे एनम् अवतारयिष्यामि ।' राजकीयोऽधिकारी तूष्णीमभूत् ।

क्षणे एव द्वितीयो ग्रामः समागमत् । शकटिर्यथैव स्थिराऽभवत्तथैव दीनः स बालकः शकटेरन्तः आरुह्य एकं पटसंपुटकम् (बटुआ) द्रव्यसंग्रहकर्तुरग्रे निधाय अवादीत्—"श्रीमन् ! यथैव वस्त्रादिभारमादाय शकटिं भवान् आरोहत् तथैव द्रव्यसंपुटकः सोयं नीचैरपतत् । शकटिश्च सवेगमचलत् । अहम् इदमादाय भवते प्रतिदातुम् शकटेर्द्वारे लम्बमानः अभवम्, किन्तु मम शब्दो न केनचिदपि श्रुतः । इदानीं स्वीयं द्रव्यं परिगणयतु भवान्, यथावदस्ति न वा ?"

कर्मचारी पटसंपुटकमुद्घाट्य सर्वमपश्यत्–लोकेभ्यः संगृहीतानि अष्टशतमुद्राणां शुल्कपत्राणि (नोट) यथावत्

मैं व्यापार के काम के लिए राजपुर से धुंधका नामक गांव जारहा था। अतः बस में चढ़कर उस स्थान से चल दिया । मेरे आसन के पास एक राजकीय चंदा इकट्ठा करने वाला भी बैठा था । हम बातचीत में व्यस्त थे कि इसी समय शब्द कानों में सुनाई दिया—"चाण्डाल ! बस में चढ़ता है और पास में एक पैसा भी नहीं है । किसी दिन तू भी मरेगा और मेरा भी वेतन छुटायेगा ।"

मैंने पीछे मुड़कर देखा कि बस की सीढ़ियों पर एक गरीब लड़का लटका हुआ है और कन्डक्टर उसे डांट रहा है ।"

बस की घर्र घर्र में बालक की आवाज नहीं सुनाई दी । किन्तु बालक कुछ बोलता था । चंदा इकट्ठा करने वाले ने उस बालक को देखा । दया के साथ वह बोला—'अरे यह तो वही बालक है, जिसने मेरे वस्त्रादि गाड़ी में रक्खे थे ।" फिर वह कन्डक्टर से बोला—"दरवाजा खोल कर इस बालक को अन्दर लेलो न ।" कन्डक्टर ने कहा–"यह तो अपमान के ही लायक है । अगले विश्राम (स्टॉप) पर इसे उतार दूँगा ।" अधिकारी चुप रह गया ।

थोड़े ही क्षणों में दूसरा स्टॉप आगया । जैसे ही बस रुकी, वैसे ही उस गरीब बालक ने बस के अन्दर आकर एक बटुआ चंदा इकट्ठा करने वाले को दिया–"श्रीमान् ! जैसे ही आप वस्त्रादि लेकर गाड़ी में चढ़े वैसे ही यह बटुआ नीचे गिर गया था और गाड़ी चल दी थी । मैं इसी को श्रीमान को देने के लिये बस के दरवाजे पर लटका हुआ था लेकिन मेरे शब्दों को किसी ने नहीं सुना अब अपने रुपयों को गिन लीजिए–उतने ही हैं या नहीं ?

कर्मचारी ने बटुए को खोलकर सब देखा–आदमियों से इकट्ठे किये हुए आठसौ रुपये यथावत् थे । गद्गद

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

विश्वासप्रतिपन्नानां वञ्चने का विदग्धता।
अङ्कमारुह्य सुप्तानां हन्तुः किं नाम पौरुषम् ॥ १

जो आदमी भरोसे पर टिके हुए हैं (हमारा विश्वास करते हैं), उनके ठगने में कौन सी चतुरता है ? गोद में सिर रखे हुए आदमियों को जो मारदेता है उसकी क्या बहादुरी है ॥१

परं पलिकायेन कर्तव्यः श्रुतसंग्रहः ।
न तत्र धनिनो यान्ति यत्र यान्ति बहुश्रुताः ॥२

बाल सफेद हो गये हों (बुढ़ापा आगया हो) तौभी शास्त्र आदि की अच्छी बातों का संग्रह करना चाहिये । जहां धनी लोग (धनसंपन्न बड़े आदमी) नहीं पहुंचते, वहां बहुश्रुत अर्थात् पढ़े लिखे सब तरह चतुर आदमी पहुंचते हैं । २

अमृतवाणी

निर्मिते च कस्मिन्नपि कार्ये तस्य संचालनस्य महान् भारः तत्कार्यस्य महत्तां जानतां जनानां स्कन्धेषु आपतति । येन उद्दिष्टेन ध्येयेन वा तत्कार्यम् आरब्धं, तदुद्दिष्टसिद्धिं यावत् तस्य कार्यस्य प्रेरणम् , तस्य अभ्युत्थानं, पतनाच्च तस्य रक्षणम् इत्येतस्य भारोऽपि तेषु एव तिष्ठति । संघस्य वयं स्वयं-सेवकाः भारमिमं विशेषतया एव वहामः । यतः न निद्राधीनैः न वा भ्रान्तैः न वा बुद्धिशून्यतां गतैः अस्माभिः इदं कार्यम् अङ्गीकृतमस्ति । सुविचार्य एव अस्य अंगीकारः कृतः । अतः इष्टं ध्येयं यावत् तत् अस्माभिः एव नेतव्यम् । न खलु अगतिकतया, अपि तु आत्मविश्वासेन उत्साहेन च अस्य कर्तव्यस्य पूर्तिः अस्माभिः कर्तव्या ।

आसन् । गद्गदहृदयः कर्मचारी बालकाय पञ्चमुद्राणां शुल्कपत्रं दातुमैच्छत् । किन्तु बालकोवदत्—"मम जीवननिर्वाहोपयुक्तं द्रव्यं प्रत्यहं सेवाकार्येण प्राप्यते । नाऽहमिदं ग्रहीतुं वाञ्छामि । शकटिचालकाय मम आरोहणशुल्कम् (किराया) कामं दीयताम् ।" इत्युक्त्वा, किञ्चिदपि अप्रतीक्ष्य; स हि शकटेः अवारोहत् ।

हृदय होकर कर्मचारी बालक को पांच रुपये देने की इच्छा करने लगा । किन्तु बालक बोला—"मेरे जीवन निर्वाह के लायक धन मैंने इस सेवा कार्य से ही प्राप्त कर लिया । अब मैं कुछ भी लेना नहीं चाहता । कन्डक्टर को मेरे बस में चढ़ने का किराया सिर्फ दे दीजिए ।" यह कह कर कुछ भी प्रतीक्षा न कर, वह गाड़ी में से उतर गया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेतावनी

यह सूचना दी जाती है कि यहां जो ट्रेड मार्क्स व लेवल तथा उनकी मुखाकृति और वनावट अंकित है, उनके आयुर्वेद सेवाश्रम लि., उदयपुर, प्रमुख स्वत्वाधिकारी एवं रजिस्टर्ड मालिक हैं। उक्त कथित ट्रेड मार्क्स एवं लेवल्स- ट्रेड मार्क्स ऐक्ट १९४० के अन्तर्गत रजिस्टर्ड हैं, जिनकी संख्या प्रत्येक के नीचे अंकित हैं।

हमें यह मालूम हुआ है कि हमारे उपरोक्त ट्रेड मार्क्स यां इनसे रंगने योग्य नकलें कुछ व्यापारियों एवं निर्माताओं द्वारा अनाधिकारिक रुप से की जा रही हैं। ऐसा करना (हमारे) अधिकारों का उल्लंघन माना जाता है। कोई भी व्यक्ति जो इनकी नकल करते या ऐसे अधिकारों का उल्लंघन करते पाया गया तो उस पर क्रिमनल व सिविल दोनों कोर्टों में कड़ी से कड़ी कार्यवाही की जायेगी।

SEVASHRAM PRODUCTS REGD. TRADE MARK UDAIPUR

नं. १२७३५३—१२७३५४

BRAHMI-AMLA OIL DELICATELY PERFUMED
ब्राह्मी आँवला तैल
आयुर्वेद सेवाश्रम लि. उदयपुर.

नं. १२८५७७

BRAHMI-AMLA OIL
ब्राह्मी आँवला तैल
आयुर्वेद सेवाश्रम लि. उदयपुर.
AYURVED SEVASHRAM LTD., UDAIPUR

नं. १८६२३८

सेवाश्रम का काला दन्त-मञ्जन
★ आयुर्वेद सेवाश्रम लि. उदयपुर ★

नं. १२८५७६

आयुर्वेद सेवाश्रम लिमिटेड, उदयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

[भारतीय स्वाधीनताक्रान्तेः (१६४२ई०) अवसरे स्थापितम्]

Digitized by Arya Samaj Foundation Chennai and eGangotri

★ नयनाभिरामदृश्यैः ★ पुरस्कृतकथाभिः ★ रोमांचकारिघटनाभिः ओतप्रोतम्

★ हृदयग्राहिगाथा ★ मनोहरं मुद्रणम् ★ ज्ञानवर्धकं पारिवारिकं मनोरंजनम्

'देशमुख' हिन्दी साप्ताहिकम् प्रतिगुरुवासरमिदं पत्रं प्रामाणिकलेखैः, बालस्तंभैः, चित्रैः, व्यङ्ग्यचित्रैः शब्द-चित्रैश्च सह चलचित्रदृश्यमयीं सामग्रीमुपहरति ।

इदं भवत्परिवारस्य सर्वेभ्यः सदस्येभ्यो मनोरंजनसाधनानि समर्पयति एतस्य साहित्यं भवतो ज्ञानं वर्धयति, भवतो जीवने नवीनमुत्साहं भरति, स्फूर्तिमानयति । बौद्धिक-राजनैतिक-आर्थिक-सामाजिकविचारान् द्रढयति ।

अतएव-सर्वत्र 'देशमुख' साप्ताहिकं सम्मान्यते, प्रख्यायते च ।

❀ त्वरितं पठन्तु

समस्तभारते सर्वाधिकविक्रयाय प्रमाणितं सचित्रं हिन्दी-साप्ताहिकम्

महाराष्ट्रराज्यस्यैकलं संध्याकालसमाचारदैनिकम्

देशमुख

[सामाजिकक्रांतेः सचित्रं साप्ताहिकम्]

'DESHMUKH'

(Social Revolutionery Hindi Weekly)

पोस्ट बाक्स ६०२६ Post Box 6029

बम्बई–१२ (भारत) Bombay–12 (India)

❀ इष्टमित्रान् पाठयन्तु

पञ्चशील का प्रबल प्रचारक

एकवर्षस्य मूल्यम्	१०)
षण्मासानाम्	६)
पुस्तकालयेभ्यः	३)

लेखकेभ्याश्चित्रकरेभ्यश्च निःशुल्कम्

प्रति सप्ताहं १६ पृष्ठानि बृहदाकारे । एकप्रतेः २५ नयपणाः । विशेषांका वार्षिकं निःशुल्कम्

देशमुखं भवदीयपरिवारस्य बालवृद्धनरनारीमातृभगिनीप्रभृतीन् सर्वान् कुशलान् नागरिकान् निर्माति

देशमुखं भवतो मित्रम्, परिवारसदस्यः, समयदर्शकश्च, समाजस्य समस्याः समादधाति ।

"साप्ताहिक स्तम्भ"—बम्बई की रातें, देखी-सूनी बातें, कहो कैसे कही ? इनसे मिलिये, नई-पीढ़ी, मुस्कराहट का सेम्पुल, धरती गाती है, नये प्रकाशन, नवाब राजे-महराजे, श्रमिक-संगठन, विश्व एक नजर में, नेता के विचार, चित्र-कसौटी, शिक्षक-समाज, महिला जागरण, सितारों की कलम से, अर्ज करता हूँ, आपके पत्रों के उत्तर, देशमुख के साप्ताहिक चहरे, क्या खोया क्या पाया ? भारतीय मार्कीट व्यवसाय, पर्वत की वासनाएँ, अन्तराल की आत्मा (उपन्यास), वेश्यावृत्ति और उसका अन्त, कैसे हो ? नेहरू चाचा, परिवार विज्ञान के बढ़ते चरण, सयानों ने कहा, सम्पादक की डायरी, भूदान चर्चा कसौटी पर बापू ने कहा था ? अनमोल बोल, ये समाज के कोढ़, जलते पृष्ठ, ये अन्याय-अत्याचार–उत्पीडन कैसा ? सफल जीवन की कुँजियां, ये पथभ्रष्ट ललनायें जब माता बनेंगी ? जाने-पहचाने-चेहरे, प्रेमकथा, मस्ती, कूटकथा, गूढ़जाल, रम्यकथायें, उन्माद, अजब कथायें, मील के खम्भे, स्वतन्त्रता के प्रहरी, भूत के गर्भ में छिपा इतिहास का एक पृष्ठ, घर-गृहस्थी की बातें ।

★ एते भवतो रसिकप्रवृतिमुल्लासयिष्यन्ति, हृदयमाक्रन्दयन्ति, जीवनस्य विभिन्नावस्थानां दर्शनं कारयिष्यन्ति ।

★★★ अद्यैव १०) शुल्कं प्रेषयित्वा देशमुखं पठत ।

श्रीमान् वितरणनिर्देशकः, दैनिकदेशमुखम् (साप्ताहिकम्) पोस्टबाक्स-६०२६, बम्बई–१२ (भारत)

तडित्पत्रम्—'देशमुखी' बम्बई, Telegram : 'DESHMUKHI' Bombay.

सम्पर्क करें—पत्र विक्रेता, समाचार-प्रतिनिधि, फोटोग्राफर, विज्ञापन एजेंट, लेखकगण, चित्रकार,

प्रकाशक:—जयबहादुरसिंह पता:—गोपालजी का रास्ता, जयपुर (राजस्थान)
मुद्रक:—श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2010

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar